I WAS able to secure two palm-leaf manuscripts of the *Śrīharicarita* from Sri V. Ramachandra Sastri of Narasapur, West Godavari District in Andhra Pradesh, India. Sri V. Ramachandra Sastri is a retired Tahsildar, and is the son of the late Sri Vemuri Ramagovinda Sastri who was, I am told, a great Sanskrit scholar. Sri V. Ramachandra Sastri informs me in his letter of 29 November 1971, that his father, the late Vemuri Ramagovinda Sastrin, worked as a senior Sanskrit Pandit in Taylor High School in Narasapur, from 1902 to 1930, and that he was born in the year 1866 and passed away in 1939 at the age of 73. Sri Ramachandra Sastri writes that he was told by his father that his grandfather (the late Rajappa Sastrin, i.e. father of Vemuri Ramagovinda Sastrin) was also a Sanskrit Pandit, and Ramagovinda Sastrin's grandfather too (whose name was not given in the letter) was a great Sanskrit scholar. I am also informed in the same letter that the palm-leaf manuscripts he gave me came down in the family from earlier people (i.e. were not collected by his father).

The author of the *Śrīharicarita* mentions himself as belonging to the Śrīharikula, whereas the name of the family with whom these manuscripts were found is

known as the Vemuri family. It seems therefore that the *Śrīharicarita* was not the work of a member of the Vemuri family, but that this family only preserved the manuscripts carefully. When these manuscripts were first collected (i.e. whether by the father, or grandfather of the late Ramagovinda Sastrin, or by a still earlier member) is not known. Sri Ramachandra Sastri presumes that the palm-leaf manuscripts came down from earlier members of the family. In this connection I was able to gather only this much information after long correspondence with different people. For this information and for the valuable manuscripts of the work, I am highly grateful to Sri V. Ramachandra Sastri of Narasapur.

I could not find any entry of the work or the author in any of the available printed catalogues of Sanskrit manuscripts. I also wrote to several individual scholars, but could not get any information from them.

I should like to give below an account of the two palm-leaf manuscripts in Telugu characters of the *Śrīharicarita* which I used for this edition.

MS. A. This is the complete manuscript, and there are 98 leaves in all. The leaves are about 18 inches long, and 1½ inches wide. The first leaf has 6 lines on each side, and the remaining leaves have 7 lines on each side. Also, when the canto happens to end in the middle of a leaf, the remaining part of that leaf is left blank, and the subsequent canto is started only on the next leaf. There are about 80 syllables in each line. The handwriting

seems to be uniform and the same from the beginning till the end.

MS. B. This one is not complete, and there are 97 leaves in all, of which leaf 92 is slightly damaged, and the leaves from 93 onwards are badly damaged. Some portions of the 15th canto, and large portions of the 16th canto are lost in these damaged leaves. The leaves are about 20 inches long, and 1¾ inches wide. The first side of the first leaf has 8 lines, and the remaining have 7 lines on each side. The letters are sometimes bigger than those of the MS. A. There are about 74 syllables in each line in the first 5½ leaves. Unlike MS. A, this MS. clearly shows writing by different hands in some places. From the second side of leaf 56 to the first side of leaf 60, the handwriting is different, and the letters are larger in size. There are about 62 syllables in each line in this handwriting. After leaf 60, the first handwriting seems to appear again. From 78, side one, to 83, side one, the handwriting seems to be a third one, different from the other two. There are 71 syllables in each line in this writing. Side 2 of leaf 78 is left blank, as on the previous side canto 13 is completed. Canto 14 starts on leaf 79. The handwriting of the remaining leaves seems to be the same as that at the beginning of the manuscript.

I have recorded in the notes all the differences between the two manuscripts either in words, or in feet, or in halves, and even in complete verses. One manuscript does not seem to be a copy of the other, because of clear differences in the form of additional

verses sometimes (see note on verse 69 of the second canto, and the first note on the last verse of 11th canto) and at others of entirely different halves and other readings.

In view of the readings such as the ones found in the manuscripts in verse 14 and verse 111 of the second canto, and in verse 102 of the third canto, none of the manuscripts could have been written by the author of the work himself. Also I do not think that any of these manuscripts could have been written under his supervision during his lifetime, as in that case he would not have allowed such mistakes as these to occur in the manuscripts. I am unable to say anything more in the matter, because of lack of evidence.

T. VENKATACHARYA

ABBREVIATIONS

1. MS. A = A palm-leaf manuscript of the *Śrīharicarita* in Telugu characters (about 98 folios—complete text). Collected from a private source.

2. MS. B = Another palm-leaf manuscript of the *Śrīharicarita* in Telugu characters (91 folios in good condition, up to some portions in the 15th canto; of the remaining six folios, the leaves from 93 onwards are badly damaged). Also in these five leaves the broken parts both on right and left sides to the extent of four inches are completely lost. Only a fragment in the middle has escaped serious damage. This is also collected from the same private source.

3. *V.R.* = The *Vālmīki-Rāmāyaṇa*, text only. Complete. Edited by Pt. Sivaramasarma Vasistha. Published by Chowkhamba Vidyabhavan, Varanasi, 1957. (Only this text was available to me here.)

श्रीहरिचरितस्य विषयानुक्रमणी

तत्र प्रथमसर्गे

पार्वती-विघ्नेश्वर-सरस्वतीभ्यो नमस्कारः । अयोध्यावर्णनम् । दशरथवर्णनम् । दशरथस्य पुत्राभावात् चिन्ता । अमात्यानां निवेदनम् । पुत्रकामेष्टिविधानम् । अत्रान्तरे अमरैर्विष्णवे रावणपराभवप्रतिपादनम् । हरेर्दशरथतनयरूपेणावतरणार्थं निश्चयः । पुत्रेष्टिहुतानलादाविर्भूतेन पुरुषेण पायसप्रदानम् । देवीभिस्तत्पानम् । राम-लक्ष्मण-भरत-शत्रुघ्नानां जननम् । क्रमशः प्रवर्धमानेषु राजपुत्रेषु विश्वामित्रस्य तत्रागमनम् । मखरक्षणार्थं तेन रामलक्ष्मणयोर्नयनम् । तेन ताभ्यां बलातिबलाख्यविद्याप्रदानम् । ताटकावधः । ससैन्यसुबाहुवधः मारीचोत्सारणं च ।

द्वितीयसर्गे

विश्वामित्रेण रामलक्ष्मणयोर्मिथिलां प्रति नयनम् । मध्येमार्गम् अहल्याशापविमोचनम् । मिथिलाप्राप्तिः । शैवधनुर्भञ्जनम् । सीतादिविवाहनिर्णयः । दशरथाद्यानयनम् । रामस्य सीतापाणिग्रहणम् । लक्ष्मणस्य ऊर्मिलया विवाहः । माण्डविका-श्रुतकीर्तिभ्यां भरत-शत्रुघ्नयोर्विवाहः । दशरथरामादीनां स्वगृहं प्रति प्रस्थानम् । मध्येमार्गं भार्गवस्याविर्भावः । रामकृतः परशुरामगर्वभङ्गः ।

तृतीयसर्गे

दशरथस्य रामपट्टाभिषेकचिकीर्षा । तथा निर्णयः । मन्थराकृता कैकेयीचित्तविक्रिया । कैकेय्या वरद्वयप्रार्थनम् । रामनिर्वासनकथनम् । रामेण सहैव वनगमनार्थं सीताया लक्ष्मणस्य च निश्चयः ।

चतुर्थसर्गे

रामेण वनगमनाय दशरथानुज्ञाप्रार्थनम् । सीतालक्ष्मणसहितस्य रामस्य निर्गमनम् । दशरथविषादः । कौसल्याविलापः । दशरथेन पूर्ववृत्तजरदन्धशापकथनम् ।

निर्गतस्य रामस्य गङ्गातीरे गुहेन समागमः। रामस्य क्रमेण भरद्वाजाश्रमप्रवेशः। ततश्चित्रकूटगमनम्। दशरथस्य रामविरहविषादेन मरणम्। भरतस्य अयोध्यां प्रति वार्ताहरैरानयनम्। रामनिर्वासनेन भरतस्य विषादः। रामानयनाय भरतस्य प्रस्थानम्। क्रमेण भरतस्य रामदर्शनम्। पितृमरणनिवेदनम्। भरतप्रार्थनया रामेण पादुकाप्रदानम्। भरतस्य निवर्तनम्।

पञ्चमसर्गे

सीतालक्ष्मणसहितस्य रामस्य दण्डकारण्यप्रवेशः। विराधवधः। शरभङ्गाश्रमगमनम्। शरभङ्गस्य तनुत्यागः। तदनु सुतीक्ष्णदर्शनम्। अत्रिमहामुनिदर्शनम्। अगस्त्यदर्शनम्। रामाय ऐन्द्रधनुषः सायकानां खड्गस्य कवचस्य च अगस्त्येन प्रदानम्। तदनु गौतमीतीरे पञ्चवटीगमनम्। तत्र मुनीनामसुरपीडातः स्वसंरक्षणप्रार्थनम्। रामेणाभयप्रदानम्। शूर्पणखाया आगमनम्। तस्याः शृङ्गाराभासः। लक्ष्मणेन तत्कर्णनासाच्छेदः। खर-दूषण-त्रिशिरसां सबलानां हननम्। रावणाय शूर्पणखाकृतं राम-सीतादिवर्णनम्। रावणस्य सीतापजिहीर्षा।

षष्ठसर्गे

रावणेन मारीचप्रेषणम्। कनकमृगरूपेण मारीचकृतं प्रतारणम्। भिक्षुरूपधरेण रावणेन सीतापहरणम्। जटायुःप्रतिरोधः। जटायुषो मुमूर्षुता। रावणेन स्वैरं सीताहरणम्। सीताविषादः। मध्येमार्गं गिरिशृङ्गे सीतया आभरणादिप्रक्षेपः। मारीचहननानन्तरं लक्ष्मणेन सह प्रतिनिवृत्तस्य रामस्य सीताया अदर्शनेन विषादः। सीतामन्विष्यतोस्तयोर्जटायुर्दर्शनम्। ततः सीतापहरणवृत्तान्तज्ञानम्। सीतां विचिन्वतोस्तयोः कबन्धदर्शनम्। कबन्धतनुत्यागः। शबरीदर्शनम्। सुग्रीवमैत्री कार्येति तया रामाय कथनम्। रामस्य सीतां प्रति चिन्ता।

सप्तमसर्गे

रामलक्ष्मणयोः पम्पातीरप्राप्तिः। हनूमदागमनम्। सुग्रीववृत्तान्तनिवेदनम्। सुग्रीवदर्शनम्। सुग्रीवेण सीताप्रक्षिप्ताभरणप्रदर्शनम्। सुग्रीवमैत्री। सुग्रीवेण वालिवैरकारणनिवेदनम्। दुन्दुभिवृत्तान्तकथनम्। वालिहननम्। ताराया आगमनम्।

अष्टमसर्गे

ताराविषादः। तारासान्त्वनम्। सुग्रीवस्याभिषेचनम्। अङ्गदस्य यौवराज्यम्। सुग्रीवसाहायकं प्रतीक्षमाणस्य रामस्य सीताविरहविषादः। सुग्रीवबोधनार्थं लक्ष्मणप्रेषणम्। सुग्रीवागमनम्। सीतासंदेशावगमाय वानराणां प्रेषणम्। तैः क्रमेण संपातिदर्शनम्। ततः रावणेन लङ्कायां स्थापिता सीतेत्यवगमनम्। सीतादर्शनार्थं गमनाय हनूमत्प्रोत्साहनम्।

नवमसर्गे

हनूमतः समुद्रलङ्घनम्। सुरसानिरोधः। ततो मोचनम्। मैनाकस्य मध्ये प्रादुर्भावः। सिंहिकानिरोधः। सिंहिकामरणम्। सुवेलप्राप्तिः। लङ्काधिदेवतया हनूमतो निरोधः। पराजितया तया मार्गदानम्। राजमन्दिरप्राप्तिः। इतस्ततो भ्रमणम्। पुष्पकादिदर्शनम्। सीताविलोकनम्। त्रिजटया स्वप्ननिवेदनम्। अवसरं प्राप्य हनूमता रामकथाकथनम्। सीतायै रामाङ्गुलीयकप्रदानम्। हनूमत्कृतं सीतासान्त्वनम्। सीतया चूडामणिदानम्। रामप्रत्ययार्थं सीतया काकासुरवृत्तान्तकथनम्।

दशमसर्गे

पुनरपि हनूमत्कृतं सीतासान्त्वनम्। तदनु हनूमत्कृतं वनभञ्जनम्। अक्षस्य वधः। इन्द्रजिता हनूमतो ब्रह्मास्त्रेण बन्धः। रावणसमीपनयनम्। लङ्कादाहः। पुनः सीतादर्शनम्। स्वस्थानं प्रति निर्गमनम्। अब्धितरणम्। अङ्गदादिभ्यः समुद्रलङ्घन-सीतादर्शनादिवृत्तान्तकथनम्। वानराणां मधुवनध्वंसमधुपानादि। हनूमत्कृतसीतावार्ताहरणनिवेदनम्। रामाय सीताचूडामणिदानम्। सत्वरमभिगन्तव्यमिति हनूमता प्रार्थनम्।

एकादशसर्गे

सुग्रीवशासनेन वानरसेनानिर्गमनम्। रामाद् भीतस्य जलधेर्दिव्यरूपेणागमनम्। विश्वकर्मतनय-नलद्वारा सेतुबन्धः कारयितव्य इति जलधिकथनम्। सेतुबन्धः। असुरैः रणाय रावणप्रोत्साहनम्। विभीषणकृतं तद्वारणम्। रावणकृतं विभीषणापसारणम्। विभीषणकृता रामशरणागतिः। शुकसारणनाम्नोर्दानवयोर्वानरसैन्यमध्ये चररूपेण प्रचारः। गृहीताभ्यां ताभ्यां रावणसंनाहादिनिवेदनम्। अङ्गददौत्यम्। रावणस्य पुरगोपनप्रयत्नः। दशमुखस्य समरोन्मुखता।

द्वादशसर्गे

रामेण अभियानप्रकारसंविधानम् । वानरराक्षससैन्ययोः समरसंरम्भः । अन्तर्धानगतस्य इन्द्रजितो मायायुद्धम् । तद्विद्धानां जाम्बवदादीनां यथापूर्वस्थितिसंपादनम् । कपिराक्षसबलयोः महत् कदनम् । रावणेन शैवीशक्तिप्रयोगः । तेन लक्ष्मणस्य मूर्च्छा । रामेण रावणशस्त्रादिनिकर्तनम् । रावणस्य रणे श्रान्तस्य रामेण मोचनम् । रणात् प्रतिनिवृत्तस्य रामस्य मूर्च्छितलक्ष्मणदर्शनेन विलापः । संजीवनीसमानयनाय हनूमतो गमनम् । वृत्तान्तमिममवगत्य हनूमत्प्रयत्नविघटनाय रावणेन कालनेमिप्रेरणम् । मध्येमार्गं मिथ्यापरिव्राजकरूपेण कालनेम्यवस्थानम् । मकरीबहुलं सरः प्रति स्वान्तेवासिद्वारा जलपिपासोर्हनूमतो नयनम् । तत्र हनूमतो मकरीग्रहः । तेन मकर्या हननम् । विगतशापतया मकर्या बुधाङ्गनारूपस्य निजस्य प्राप्तिः । तया मायिमस्करितत्त्वकथनम् । हनूमता मस्करिरूपधरस्य राक्षसस्य हननम् । हनूमता द्रोणाचलानयनम् । मध्येमार्गं हनूमतो दर्शनेन भ्रात्रपकारकोऽयमिति भरतस्य संदेहः । संदेहनिवृत्तिः । हनूमदानीतदिव्यौषधिदानेन लक्ष्मणस्य सुप्तोत्थितस्येव समुत्थानम् । पुनरिन्द्रजिता रणे नागास्त्रप्रयोगेण रामादीनां क्षणमचेतनतापादनम् । गरुडसमागमेन दैवात् संपन्नेन नागास्त्रबन्धाद् रामादीनां मोचनम् । कुम्भकर्णवधः । पुनरिन्द्रजितो लक्ष्मणेन समरम् । लक्ष्मणेन ऐन्द्रास्त्रप्रयोगेण रावणेर्हननम् । रामरावणयोर्युद्धस्य वर्णनम् । अगस्त्यकृतो रामाय आदित्यहृदयोपदेशः । रामप्रयुक्तेन ब्रह्मास्त्रेण रावणस्य वधः ।

त्रयोदशसर्गे

रामविजयेन सर्वेषामानन्दः । देवैः कृतो रामस्तवः । सीताया रामसमीपागमनम् । तस्याः वह्नौ विशुद्धिः । सीतालक्ष्मणसहितेन रामेण साकं पुष्पकमधिरुह्य सुग्रीवादीनाम् अयोध्यादर्शनाय प्रस्थानम् । भरद्वाजाश्रमप्राप्तिः । रामदर्शनार्थं श्रुतवृत्तान्तस्य भरतस्य निर्गमनम् । रामस्य अयोध्याप्राप्तिः । राज्यभारनिर्वहणार्थं भरतकृतं रामं प्रति प्रार्थनम् । रामपट्टाभिषेकः । सर्वेषामानन्दः । सुग्रीवविभीषणयोः स्वस्वदेशप्रापणम् ।

चतुर्दशसर्गे

पार्वतीप्रार्थितेन महेश्वरेण रामराज्यकथावर्णनम् । रामे राज्यं शासति अगस्त्यादीनां कदाचित् तत्रागमनम् । अगस्त्यकृतं पुलस्त्यचरितवर्णनम् । पुलस्त्याद् विश्रवसो जननम् । ततो राजराजस्य जननम् । सुमालिसुतायां कैकस्यां विश्रवसा रावणस्य

जननम् । तदनन्तरं तस्यामेव कुम्भकर्णस्य शूर्पणखायाः विभीषणस्य च जननम् । बहुविधरावणचेष्टितवर्णनम् । तपश्चरणेन ब्रह्मसकाशाद् रावणस्य वरप्राप्तिः । कुम्भकर्णविभीषणयोरपि ततो वरप्राप्तिः । वैश्रवणस्य (कुबेरस्य) रावणकृतं लङ्कातो निर्वासनम् । तस्य अलकाप्राप्तिः । रावणस्य इन्द्रादपजयः । इन्द्रजिता शंकराराधनम् । ततो वरप्राप्तिः । तेन इन्द्रस्य पराजयः । रावणेन कुबेरात् पुष्पकापहरणम् । रावणेन कैलासचालनम् । शिवकृतो रावणगर्वभङ्गः । रावणकृतः शिवस्तवः । शिवात् तस्य वरप्राप्तिः । चन्द्रहासासिलाभश्च । रावणेन राजकन्यकायाः (वेदवतीनाम्न्याः) दर्शनम् । तत्कृतो रावणशापः । अनरण्यमहाराजकृतो रावणशापः । रावणकृतं कस्याश्चिद् रजस्वलाप्सरस्त्रियो बाधनम् । तत्स्त्रीप्रियेण मुनिना तस्याः मकरीत्वप्राप्तिशापः । वायुसुतग्रहणात् शापावसानमिति कथनम् । तत्कृतो रावणशापोऽपि । परस्तात् उद्धतस्य रावणस्य दुश्चेष्टितानि । इन्द्रादीनां पीडनम् ।

पञ्चदशसर्गे

वालिसुग्रीवचरितवर्णनम् । कदाचित् वालिकृतो रावणगर्वभङ्गः । कार्तवीर्यार्जुनकृतो रावणगर्वभङ्गः । रावणस्य बलिसद्मप्राप्तिः । बलिदैत्यं प्रति अस्मन्नाथो भवेति रावणेन प्रार्थनम् । बलिदैत्यकृतं तत्प्रत्याख्यानम् । पुरुषोत्तमकृतो रावणपराभवः । पुनरपि रावणस्य दुश्चेष्टितानि । इत्थं कथाः कथयित्वा अगस्त्यस्य रामस्तुतिपूर्वकं निर्गमनम् । रामराज्यवर्णनम् । शूद्रमुनेर्हननम् । द्विजशिशूज्जीवनम् । काकगृध्रविवादकथा । विजयेन अमात्येन जनापवादप्रकाशनम् । तदनु सीतापरित्यागः । वाल्मीक्याश्रमे कुशलवयोर्जननम् । वाल्मीकिकृतास्तयोर्जातादिसंस्क्रियाः । तेनैव कृतस्तयोः रामायणोपदेशोऽपि ।

षोडशसर्गे

लवणासुरकृतं मुनिजनपीडनम् । शत्रुघ्नेन लवणासुरवधः । भरतेन गन्धर्वाणां हननम् । भरतपुत्रयोः पुष्कलतक्षयोः स्वमातुलपुरे राज्याभिषेकः । रामेण अनन्तमखविधानम् । अश्वमेधाय हयविसर्जनम् । हयस्य वाल्मीकितपोवनप्रवेशः । लवेन तस्य बन्धः । लक्ष्मणादिभिस्तस्य समरम् । तत्र रामागमनमपि । कुशेन संग्रामः । रामादीनां निःसंज्ञता । सीतया हयविसर्जनपूर्वकं संग्रामात् कुशस्य लवस्य च नयनम् । पुनः प्राप्तसंज्ञानां रामादीनाम् अविदितवृत्तान्तानां प्रतिपक्षादर्शनेन हयस्य नयनम् । हयमेधे कुशलवाभ्यां सहितस्य वाल्मीकेरागमनम् । कुशलवकृतं रामायणगानम् । रामस्यापि साक्षात् तच्छ्रवणम् । वाल्मीकिना कुशलवौ रामस्यैव सुताविति निवेदनम् । सीतातत्त्वप्रवेदनं च ।

सीतायाः भूदेव्या साकं तिरोधानम्। कुलगुरुकृतं रामसान्त्वनम्। अथ रामप्रत्यानयनाय देवकृतं वैकुण्ठात् कालप्रेषणम्। द्विजरूपधरेण कालेन रहसि रामाय देवसंदेश-निवेदनम्। अत्रान्तरे दुर्वाससः प्राप्तिः। लक्ष्मणकृतं रामाय तदागमननिवेदनम्। दुस्तरसंधाभङ्गेन लक्ष्मणस्य पूर्वं प्रस्थानम्। कुशलवप्रतिष्ठापनम्। दिवं प्रति रामप्रस्थानम्।

श्रीहरिचरितं महाकाव्यम्

श्रीहरिपद्मनाभशास्त्रिविरचितम्

प्रथमः सर्गः

वितरतु मतिमतिविमलां सोमा सोमावतंसवामाङ्कम् ।
यदपाङ्गसकृत्संगव्यासंगा[1] सिद्धिरर्थसार्थस्य ॥ १ ॥

करिवदनं तं कलये करिवदनन्तप्रदानदक्षकरम् ।
यच्चरणाब्जस्मरणं शरणं निर्विघ्नकार्यसिद्धीनाम् ॥ २ ॥

श्रीहरिचरितमुदारं रचयितुमनसो ममाखिलाधारम् ।
अनवधिकरुणाजलनिधिरधिरसनं शारदा सदा नयतु ॥ ३ ॥

श्रीलीलांसलकोसलभूषा भुवि कापि पूरयोध्येति ।
विक्रमविजितसुरासुररविकुलराजन्यराजधान्यस्ति ॥ ४ ॥

अधरितहरिहयनगरी नगरीतिविराजमानसंवरणा ।
अरिघातनपरपरिघापरिधुतरिपुराजमानसंवरणा ॥ ५ ॥

[1] *Vyāsaṅga* seems to be in the sense of *vilamba*, i.e. delay. See Mallinātha on *Raghu*. X. 6 (*avyākṣepo bhaviṣyantyāḥ kāryasiddher hi lakṣaṇam*), where he explains *avyākṣepa* as *gamyasya avyāsaṅgaḥ=avilamba iti yāvat*. The meaning intended here seems to be *yadapāṅgasakṛtsaṅga eva vyāsaṅgaḥ=vilambaḥ yasyāḥ siddheḥ sā*.

नूनं ननु सुरनगरी न गरीयस्तास्पदं तुलारूढा ।
आस्तेऽधस्तादेषा गुर्वी सोच्चैस्तरामतो हेतोः[1] ॥ ६ ॥

कनकक्षितिधरलज्जाजनकश्रीरत्नरञ्जितैरंजितैः ।
सोत्सेधैर्निजसौधैरुत्सेधयतीव गर्वमीशाद्रेः ॥ ७ ॥

रत्नैस्तरुणीरत्नैर्भुक्तिभिरत्यन्तभक्तिभिः सुभगा ।
अतिशेते न पुरं कां सोद्यानैर्धूतमानसोद्यानैः ॥ ८ ॥

मङ्गलतूर्यनिनादैः [2]पिङ्गलवासःप्रियास्पदं तदिदम् ।
हस्त्यश्वरथपदातिस्वस्त्ययनं स्वःश्रियं[3] श्रिया जयति ॥ ९ ॥

मङ्गलवादविशारदपिङ्गलनागोक्तिकोविदाः[4] कवयः ।
खण्डितनास्तिकजनतापण्डितजनतात्र भाति राजनता ॥ १० ॥

चतुराननवाग्व्यवहृतिचतुराननसद्द्विजप्रजाधन्या ।
जन्यान्यदुरासदपरपुरविजयानन्यवृत्तिराजन्या ॥ ११ ॥

[1] This is similar to what Murāri says in the following:

anena rambhoru tavānanena tuṣārabhānos tulayā dhṛtasya,
ūnasya nūnaṃ paripūraṇāya tārāḥ sphuranti pratimānakhaṇḍāḥ.
(*Anargha.*, VII. 81)

[2] *Piṅgalavāsaḥpriyāspadam*, etc. seems to imply that in the city of Ayodhyā one could see the yellowish brown clothes worn by the people, and find auspicious events taking place frequently. The *piṅgala* clothes are generally associated with, and are characte istic sights of, auspicious occasions even now in India.

[3] *Svaḥśriyam* is in the sense of *svargaśriyam*.

[4] It is not clear whether *maṅgalavādaviśārada* is intended to be an adjective to *Piṅgalanāga* or *kavayaḥ*. The latter is better. *maṅgalavādaviśāradāśca piṅgalanāgoktikovidāśca kavayaḥ. Piṅgalanāgokti* means Piṅgala's *Chandaśśāstra*.

अलकापुरपतितुलनाफलकातिधनाढ्यसद्गणिग्विपणिः ।
त्रैवर्णिकोपचारोत्सववत्सिद्धार्थसच्चतुर्था [1]सा ॥ १२ ॥

भाक्ताभाक्तसमाश्चितभक्ताभक्ता[2] हरौ परैकदृशः ।
तत्रैवासन् न्वमला कुत्रापि न तादृशी गुणोज्ज्वलता ॥ १३ ॥

वैवस्वतमन्वाद्या देवसमानाः पुरीं तु तां क्रमशः ।
परिपालयांबभूवुर्दशरथनामाथ नाकमिन्द्र इव ॥ १४ ॥

तत्पुरपरिपालयितुर्दशरथनाम्नोऽथ राजराजर्षेः ।
[3]अन्तति संततिविरहाज्जीवनमुज्जीवितप्रतापयशः ॥ १५ ॥

श्रीमति तस्मिन्नित्थं तन्वति चिन्तां समेत्य तदमात्याः ।
धृत्वा राजनियोगं योगं राज्ञे व्यजिज्ञपन् विज्ञाः ॥ १६ ॥

प्राज्ञाः प्रज्ञाकुशला यज्ञेनाराध्य देवतास्ताभ्यः ।
वाञ्छितमनवाप्यतया लाञ्छितमप्यञ्जसा प्रयान्तीति ॥ १७ ॥

[1] The last two syllables are not clear in the MSS. Perhaps the expression is *-saccaturthā sā*, and is intended in the sense of (*siddhārthaḥ*) *san=sādhuḥ*, *caturthaḥ=caturtho varṇaḥ*, *yasyāṃ sā*.

[2] The expression is clearly legible in the MSS. But the meaning is not clear to me.

[3] The line is very clear in the MSS. But the meaning is not clear to me. *Ujjīvita* is perhaps in the sense of *uddhṛtajīvita*, i.e. lifeless or useless. *Antati* seems to be in the sense of *antaivācarati* (looking like the worst one). *Anta* is noted in the dictionaries in the sense of 'the lowest' or 'the worst'. The idea intended seems to be that because of the lack of *santati*, all his *pratāpa* and *yaśas* (valour and fame) were useless, and consequently his life looked to him like the worst one, not worth living.

इत्युक्तवत्सु तेषु प्रत्युद्बुद्धस्मृतिः सुमन्त्रोऽथ ।
स्वाख्यां चरितार्थयितुं चख्यावत्यन्तपूर्ववृत्तान्तम् ॥ १८ ॥

राजन्नद्य चिरंतनवृत्तान्तं स्मारितोऽस्मि किंचिदहम् ।
तथ्यं कलय वचस्तत् पथ्यं च भणामि यन्महर्षिपदम् ॥ १९ ॥

पुत्रो भविता भवतां राजा पूजात ऋष्यशृङ्गमुनेः ।
इति वाचमवोचन्मे गोष्ठीसक्तः सनत्कुमार इति ॥ २० ॥

सचैश्रुतिपुटसुधया कथयाथ तयातिहृष्टधी राजा ।
वरयूपचिते चक्रे सरयूतीरे महाक्रतुं विधिवत् ॥ २१ ॥

अथ दशरथराजस्य प्रार्थनयारुन्धतीपतिप्रमुखाः ।
प्रारेभिरे सुतेष्टिं [1]वैभाण्डकमग्रतो निधायैव ॥ २२ ॥

स्वदशामाविष्कर्तुं त्रिदशास्तु तदैव पद्मयोनिमुखाः ।
कलशोदधिमासेदुः पौलस्त्योपप्लुताः परेशाय[2] ॥ २३ ॥

तत्र भुजंगमपुंगवतल्पे वरहंसतूलिकाकल्पे ।
पदपरिचर्यापरया रमणीमणिनानुरञ्जितं रमया ॥ २४ ॥

कुलशीलवयोरूपैरलसीकृतदिव्यसुभ्रुवा च भुवा ।
चलशीलितचेतस्करतुलसीदलदामपेशलोरस्कम् ॥ २५ ॥

श्रितजनतैकविधेयं श्रीदेवीभागधेयमाध्येयम् ।
प्रत्यक्तयावसेयं परितः परिवीतपीतकौशेयम् ॥ २६ ॥

[1] Vaibhāṇḍaka is Vibhāṇḍakasuta=Ṛṣyaśṛṅga-muni.

[2] Monier Williams notes Pareśa as one of the names of Viṣṇu, found in the Purāṇa-s.

अरुडाराधनचतुरैर्गरुडादिभिरङ्घ्रिसेवकैरभितः ।
संस्तुतमाश्रितभव्यैः प्रस्तुतविभवं महर्षिभिर्दिव्यैः ॥ २७ ॥

कनकासनकाशनकृतसनकादिमुनीशसंनुतैश्वर्यम् ।
लोकानन्दविधायकराकाविधुबिम्बराजमानास्यम् ॥ २८ ॥

रविशतकोटिसमानच्छविकोटीरच्छटास्फुरच्छिरसम् ।
मणिमयकुण्डलमण्डितगण्डं कनकाङ्गदान्तदोर्दण्डम् ॥ २९ ॥

श्रीमणिदर्पणकौस्तुभमणिवनमालामनोहरोरस्कम् ।
फुल्लसरोरुहलोचनमुल्ललदलकान्तकान्तिमत्तिलकम् ॥ ३० ॥

संश्रितरक्षणदक्षिणवीक्षणपरिसंचितोरुकारुण्यम् ।
अभिनवजलधरलीलासुभगमभिप्रेक्ष्यचारुतारुण्यम् ॥ ३१ ॥

करिवरवरदमुदारं करुणामयमूर्तिमार्तमन्दारम् ।
आनन्दमयाकारं स्वानन्दघनं घनाघनाकारम् ॥ ३२ ॥

अरिजनकालात्मानं परिजनचिन्तामणिं चिदात्मानम् ।
मणिमयभूषणभूषणमणिममहत्त्वादिभूषितानुचरम् ॥ ३३ ॥

जगदुदयाप्ययमूलं[1] जगदीश्वरशब्दशक्तिसन्मूलम् ।
अजमजितमपतितं च त्रिजगति पतितैकपावनाभिख्यम् ॥ ३४ ॥

[1] *Apyaya* is in the sense of *vināśa* or *vilaya*. See *Bhāgavata* (VII. 10. 44), *sargasthityapyayeśasya*, etc. quoted in this context by Apte.

वीणागानविशारदनारदसंगीतसंगतश्रवसम् ।
लीलापरवशचेतो[1]नीलासंभाव्यमानसौभाग्यम् ॥ ३५ ॥

चन्दनचर्चितदेहं मन्दस्मितसुन्दराननाम्बुरुहम् ।
छत्रितफणिराट्फणकं स्वःस्त्रीकरधूतदिव्यचामरकम् ॥ ३६ ॥

श्रुतिशिखरशिखरशेखरमघलङ्घनजाङ्घिकीकृतानुचरम् ।
मघवन्मुखमखभुङ्निर्दुःखश्रीसौख्यमूलदोर्लीलम् ॥ ३७ ॥

वरपुरुषार्थचतुष्टयविश्राणनदक्षदोश्चतुष्टयकम् ।
भुवनत्राणपरायणममरा नारायणं मुदा ददृशुः ॥ ३८ ॥

दुर्लभदर्शनदर्शितफलसिद्धिविशुद्धबुद्धयोऽथ बुधाः ।
मुखरितदिक्प्रणुतीस्तस्मै चक्रुः प्रदक्षिणप्रणतीः ॥ ३९ ॥

कुशलप्रश्नानुमितप्रेम्णे पुरुषोत्तमाय ते तस्मै ।
दुर्दमरावणदोर्बलदुर्ललितपराहतं स्वराचख्युः ॥ ४० ॥

तेजसि तस्य सुरारेः के जडभावं न लेभिरे नृहरे ।
कुहरे क्वापि हरेऽसौ कौशिकवत् कौशिको दिनं नयति ॥ ४१ ॥

[1] In the Vaiṣṇavism of Rāmānuja's school, Nīlā is a Devī. Cf. Vedāntadeśika's *Nīlātuṅgastanagiritaṭī*, etc. Also see the following by Veṅkaṭādhvarin:

līlālolatamāṃ ramām agaṇayan nīlām anālokayan
muñcan kiṃca mahīm ahīśvaramayaṃ mañcaṃ haṭhād vañcayan,
ākarṣan dvijarājam apy atijavaṃ hā hanta lokāntarāt
goptuṃ śaurir uditvaratvara upaid grāhagrahārtaṃ gajam.

(*Viśvaguṇādarśacampū*, I. 32)

कालयति न कालस्तं किं तु स्वयमेव काल्यते तेन ।
बाहुलकादाख्येयं बहु मनुते देव कर्मसाधनताम् ॥ ४२ ॥

पाशनिबद्धतयासौ पाशी न तु पाशवत्तया परया ।
अनवधिनवनिधिधनदो धनदोऽप्यनुजीविवज्जिजीविषति ॥ ४३ ॥

लीलानालारूढो रावणमैरावणो निरीक्ष्याग्रे ।
शङ्कास्तम्भितचरणो लङ्कारथ्यासु कृष्यते दनुजैः ॥ ४४ ॥

वृद्धश्रवसा साकं रुद्धं सुरकीर्तिमण्डलं सकलम् ।
उद्धर्तुं त्वं पुनरपि बद्धश्रद्धो भव प्रभोऽसीशः ॥ ४५ ॥

अथ संश्रुतबुधवचसा कथितारिवधेन तेन देवेन ।
दशरथतनयीभावो द्वारतया पर्यभाव्यरातिजये ॥ ४६ ॥

विधिरथ विदिततदन्तःकरणो रणमूर्ध्नि तत्सहायार्थम् ।
जनयत सनयांस्तनयान् इति वाचमुवाच देवता दिवि ताः ॥ ४७ ॥

अथ ता जनयामासुस्तनयाननयारिदुर्जयांत्सनयान् ।
तैः पूर्णा गौरभवत् कपिगोपुच्छाच्छभल्लयोनिभवैः ॥ ४८ ॥

हरिरपि वञ्चनचतुरश्चतुरः स्वांशान् विधाय मेधावी ।
दशरथमहिषीगर्भादाविर्भावाय निश्चिकाय मनः ॥ ४९ ॥

अथ पुत्रेष्टिहुतानलकुण्डात् कोऽपीन्दुकोमलः पुरुषः ।
आविरभूदमृतोपमपायससंपूर्णहेमपात्रकरः ॥ ५० ॥

पायसममृतप्रायं प्रायच्छद् भूभृते मुदा स पुमान् ।
तेन जहर्ष महर्षी राजा द्विजराजराजमानास्यः ॥ ५१ ॥

मणिमौक्तिकहेमरजतभूमीधनधान्यधेनुदानैश्च ।
सममृत्विग्भिः सभ्यानिभ्यः संपूर्णमानसांश्चक्रे ॥ ५२ ॥

कौसल्याकैकेय्योः प्रादात् स विभज्य पायसं दिव्यम् ।
देव्यौ ते तु सुमित्रां चक्रतुरंशांशदानसंतुष्टाम् ॥ ५३ ॥

सवसिष्ठादिमहर्षिः स वशी सर्वोत्सवैश्च राजर्षिः ।
प्राप्य पुरीं स्वरिवेन्द्रः प्रापोदारैर्मुदं ततो दारैः ॥ ५४ ॥

अतिपतितेषु कदाचित् कतिपयदिवसेषु कामनीयपदम् ।
पदमन्तर्वत्नीनामुदभवदवनीशधर्मपत्नीनाम् ॥ ५५ ॥

अवनीपतिवनितानां नवनीतविनीतमञ्जिमान्तानाम् ।
न वपुर्वोढुं सेहे भूषाः कान्तिः परं परा देहे ॥ ५६ ॥

गर्भाविर्भावे सति कौसल्याशोभि रोमराजिकया ।
नाभीकुहरविनिर्गतहरिनीलशरीरकान्तिरेखिकया ॥ ५७ ॥

लोचनरोचिस्तस्या मोचनममराम्बुजन्मगर्वस्य ।
वदनमपि श्रीसदनं कृतशारदपूर्णचन्द्रमःकदनम् ॥ ५८ ॥

परमाणुमितानुमिता दृष्टिपथं प्राप मध्ययष्टिरपि ।
अवलीत्रिकविकसनतो नाभी गम्भीरतारताभीता ॥ ५९ ॥

परिणतिनिर्भरगर्भव्याकुलसुभ्रूगणेऽपि रम्यगुणे ।
विरराज मुदा राजा सुरराजसखः स राजराजश्रीः ॥ ६० ॥

कर्कटकेऽदितियुजि[1] शशिगुरुयुजि पञ्चग्रहोच्चसंस्थायाम् ।
पूषणि मेषं गतवति नवमे मधुमासशुक्लपक्षाह्नि ॥ ६१ ॥

नक्तंचरतिमिरच्छित् कौसल्यापूर्वपर्वतस्थल्याः ।
प्रादुरभूत् किमपि महो महिमैकपदं हि रामचन्द्राख्यम् ॥ ६२ ॥

अथ कैकेयी सुषुवे भरतं शुभधर्मपद्धतौ निरतम् ।
अनमित्रा च सुमित्रा लक्ष्मणशत्रुघ्ननामकौ तनयौ ॥ ६३ ॥

नन्दनजनननिमित्तानन्दनवास्वादतुन्दिलो राजा ।
धनदाभः किं न ददौ धनधान्यधराग्रहारहारादौ ॥ ६४ ॥

धर्मार्थकाममोक्षा इव चत्वारश्चकाशिरे मूर्ताः ।
वृत्रारातिसमश्रीगोत्रापतिपूर्वपुण्यजाः पुत्राः ॥ ६५ ॥

बाहव इव ते विष्णोर्बाला बलशालिनो बभुर्जिष्णोः ।
धृतभुवनावनलीलालीलाजितदैवतद्विषज्जालाः ॥ ६६ ॥

[1] The *Vālmīki-Rāmāyaṇa* reads in this context *nakṣatre, ditidaivatye*, which is explained by the commentators as *punarvasunakṣatre*. Govindarāja explains it thus: *nakṣatre punarvasvor ity arthaḥ. Punarvasū nakṣatram aditir devatā iti śruteḥ.* (See his commentary on I. 18. 8.) The expression *aditiyuji* in the verse here is used in the same sense by the author. See also Bhoja's verse in his *Campū-rāmāyaṇa*:

> *uccasthe grahapañcake suragurau sendau navamyāṃ tithau,*
> *lagne karkaṭake punarvasuyute meṣaṃ gate pūṣaṇi,*
> *nirdagdhuṃ nikhilāḥ palāśasamidho medhyād ayodhyāraṇeḥ,*
> *āvirbhūtam abhūtapūrvavibhavaṃ yatkiṃcid ekaṃ mahaḥ.*

(I. 56)

पल्लवितहृदुल्लासाः कौसल्याद्याश्च मातरस्तेषाम् ।
नानन्दानामवधिं नूनं प्रतिपेदिरे समं पौरैः ॥ ६७ ॥

सवसिष्ठादिमहर्षी राजर्षी राजराजमानयशाः ।
क्रमशस्तेषां चक्रे सममुपनयनान्तसंस्कृतीः स कृती ॥ ६८ ॥

प्रत्यग्रकुशाग्रधियः प्रतिपदविदितप्रशस्तवाग्विधयः ।
नयविनयपयोनिधयः शुभगुणनिधयस्त्रिलोकमुन्निधयः[1] ॥ ६९ ॥

गजवाजिरथारोहणचतुराः पितुराज्ञयैव ते शूराः ।
धनुरसिमुसलपरश्वथमुद्गरमुखयुद्धकोविदाश्चेरुः ॥ ७० ॥

कुत्रापि गुणारामो रामो रमते न लक्ष्मणेन विना ।
भरतोऽपि स्नेहरतो न विना शत्रुघ्नमीहते विहृतिम् ॥ ७१ ॥

तत्रापि गुणारामो रामो रामामनोभवोऽभिनवः ।
भीताभयविधिदक्षिणदक्षिणकरवत्तया परं जयति ॥ ७२ ॥

कुशिकसुतोऽथ निनीषुः क्रतुविघ्नविनाशनाय दाशरथिम् ।
रामं शत्रुविरामं साकेतमुपाससाद साहसिकः ॥ ७३ ॥

राजप्रतिहारजुषा तेन प्रतिहारपालकोऽभिदधे ।
राजदिदृक्षुं ननु मां राज्ञे विज्ञापयेति निर्भीकम् ॥ ७४ ॥

जयशब्दपूर्वकोदितदौवारिकशब्दबोधितो राजा ।
स यथाविधि तपसां निधिमभिचक्राम प्रभीः[2] समं मुनिभिः ॥ ७५ ॥

[1] *Trilokamunnidhayaḥ* is to be understood as *trilokasya mudaḥ (santoṣasya) mudāṃ vā nidhayaḥ*.

[2] *Prabhīḥ* is a *bahuvrīhi* and adjective to *sa rājā*, in the sense of *prakṛṣṭabhīḥ*.

कुशलप्रश्नानुमितप्रीतिं कुशिकप्रसूतिमानम्य ।
आनाय्य निकाय्यान्तरमानिन्ये हैममासनं स नृपः ॥ ७६ ॥

पाद्यार्घ्यासनवन्दनपूर्वकविविधोपचारभूयिष्ठाम् ।
भक्त्यव्याजां पूजां मघवा विधिवद् यथा विधेर्विदधे ॥ ७७ ॥

अथ बहुधा स्तुतवन्तं प्रथमानमहातपःप्रभावं तम् ।
पप्रच्छ स्वच्छमनाः कर्तव्यं सर्वथा विधातुमनाः ॥ ७८ ॥

तदुदितमुदितहृदयस्तदिदं पदमन्तरा ददामीति ।
तत् कुशिकसुतोऽवादीद् वचनं निश्चित्य सत्यमेवादौ ॥ ७९ ॥

मामकमखविघ्नकरौ [1]मघवादिमखादिदुर्जयौ दनुजौ ।
तावासाते नीचौ यावाख्यातौ सुबाहुमारीचौ ॥ ८० ॥

राजन् रणकर्कशयोर्हतये न तयोरलं जगत्त्रितये ।
रामादपरः कश्चित् पुरुषः पुरुषोत्तमस्तु स श्रीमान् ॥ ८१ ॥

तस्मादस्माभिः सह मखरक्षायै मखारिशिक्षायै ।
प्रेरय पूरय कामं राजन्ननुजन्मना समं रामम् ॥ ८२ ॥

अथ तद्वचनविदीर्णश्रवणः शिरसा प्रणम्य तं राजा ।
अभणदहं नात्मदहं कार्यं कुर्यां मुने प्रसीदेति ॥ ८३ ॥

[1] *Maghavādi* means *indraprabhṛti*, and *makhādi(n)* is in the sense of *makhabhuk*, that is *sura*. The expression thus means *indrādidevadurjayau*.

इत्थं निगदति नृपताविद्धं विज्ञाय योगिकोपाग्निम् ।
नृपमिदमूचे वाचा सपदि निरुन्धन्नरुन्धतीजानिः[1] ॥ ८४ ॥

त्रिभुवनमपि तेजस्वी कर्तुमकर्तुं च वान्यथाकर्तुम् ।
अलमेष तपस्वी ते फलमेव विधित्सते स्ववत्सस्य ॥ ८५ ॥

किं चोदञ्चयति यशः संचोदयिता श्रियां स सर्वासाम् ।
तादृशविभवे तस्मिन्नर्थिनि नानर्थचिन्तनं युक्तम् ॥ ८६ ॥

अविचारातिविरामं रामं रमणीयसद्गुणारामम् ।
विद्धयस्तोकप्राक्तनपुण्यप्रत्यक्षपुण्डरीकाक्षम् ॥ ८७ ॥

यद्यप्यकृतास्त्रोऽसौ बालः स तथापि विद्विषां कालः ।
प्रौढो वाप्रौढो वा गाढध्वान्तच्छटाच्छिदेवार्कः ॥ ८८ ॥

विश्वासास्पदवचसे विश्वामित्राय मित्रराजर्षे[2] ।
आश्वासितहृदयः सन्नाश्वादिश पुत्रमत्र पात्रं सः ॥ ८९ ॥

नरपतिरिति गुरुवचसा परिधृतधृतिराह तं प्रति प्रीतः ।
त्वन्नाम्नीव त्वयि मे भिन्नालममित्रभावनार्यगिरा ॥ ९० ॥

राजानमजानानं दुःसहमपि मां सहस्व तेऽधीनम् ।
शरणागतशेवधयः शमधन[3] भगवन् भवादृशां विधयः ॥ ९१ ॥

इति मुनिपतिमनुनीय क्षितिपतिरनुजन्मना समं रामम् ।
आनाय्याथ प्राचे पुंसे तस्मै परं वचः प्रोचे ॥ ९२ ॥

[1] *Arundhatījāni* is Vasiṣṭha.

[2] *Mitrarājarṣiḥ* is in the sense of *sūryavaṃśarājarṣiḥ*.

[3] This is the reading in MS. B, MS.A reads *khalu bho bhagavan*, etc.

आसवनान्तवनान्तस्थितिना भवतावता मखं च सुखम् ।
[1]प्रियतामेष महर्षिः क्रियतां च मनोऽस्य सोमहोमर्षि[2] ॥ ९३ ॥

मालामिव धृत्वाज्ञां मूर्ध्ना रामः प्रतापवान् राज्ञः ।
अनुजेन समं मुमुदे दनुजेन रणाय दानवारिमुदे ॥ ९४ ॥

तावथ मातापितरावार्यानभिवाद्य हृद्यवेषधरौ ।
शरचापधरौ शूरौ विलसत्कवचौ विरेजतुर्वीरौ ॥ ९५ ॥

स जहर्ष महर्षिस्तौ त्रिजगत्तर्षं दृशाभिवर्षन्तौ ।
आपीय दृशात्यर्थं पापिदुरापप्रभावगत्यर्थम् ॥ ९६ ॥

प्राजापत्यचरूदित[3]राजापत्यप्रधानमालोक्य ।
कृतकृत्यतयात्मानं स तदा मेने मुनिर्महात्मानम्[4] ॥ ९७ ॥

[1] *Priyatām* seems to be intended to be understood as passive Imperative of *pṛ* to be construed with *bhavatā* in the sense of *pālyatām*. (Let the sage be protected by you.)

[2] *Somahomarṣi* is the reading in both the MSS. This is perhaps intended to be an adjective to *asya manaḥ*, and to mean *somaṃ homaṃ ca ṛṣati=gacchatīti=somahomarṣi*. (Let his mind be allowed to be attentive to *soma* and *homa*.)

[3] *Prājāpatyacaru* seems to be a reference to *āyuṣkāmeṣṭi*. See *prājāpatyaṃ ghṛte caruṃ nirvapecchatakṛṣṇalam āyuṣkāmaḥ* (*Maitrāyaṇīya-Saṃhitā*, II. 2. 2). The author probably means to say that *āyuṣkāmeṣṭi* was performed before Rāma's departure with the sage Viśvāmitra. The *V.R.* has in this context:

purodhasā vasiṣṭhena maṅgalair abhimantritam,
sa putraṃ mūrdhny upāghrāya rājā daśarathas tadā,
dadau kuśikaputrāya, etc. (Bāla., canto 22, verses 2 & 3)

[4] *Mahātmānaṃ* is perhaps intended to be construed with *ātmānam*, because of the *hetu kṛtakṛtyatayā*. If it is to be connected with *rājāpatyapradhānaṃ*, it would involve a *dūrānvaya*.

पद्योः प्रणमन्तौ तौ यदतिस्नेहेन सस्वजे स मुनिः ।
प्राक्तनसुकृतासादितमूर्तस्वर्गापवर्गतामानि[1] ॥ ९८ ॥

पूर्वोत्तरपुरुषार्थद्वितयान्यतरद्वयी नु किं मूर्ता ।
मुनिमनुगृह्णातीति प्रतिपज्जनतासु तासु संदिदिहे[2] ॥ ९९ ॥

स वसिष्ठानुमतः सन् राज्ञे विज्ञाप्य संप्रयुक्ताशीः ।
प्रययौ ताभ्यां हृष्टः सवनाय वनाय साधकप्रष्ठः ॥ १०० ॥

अभिनवजलदश्यामं रामं मुनिनीयमानमालोक्य ।
दष्टोष्ठमयोध्यायां नासायां नाङ्गुलिः कयाकारि[3] ॥ १०१ ॥

किमिति प्रददौ राजा किमिति मुनिर्वा निनाय तं रामम् ।
बुद्धिविहीना जीना[4] नन्विति चक्रुर्मिथः कथा मुग्धाः ॥ १०२ ॥

[1] The points noted by Mammaṭa making obligatory the use of *tat* or its derivative in the subsequent clause, when the relative pronoun is expressly stated in the preceding clause, is not uniformly observed by the poets and writers. See the Introduction.

[2] This verse is missing in MS. B.

Pratipat is the expression meaning *buddhiḥ*. *Sandidihe* is passive perfect (III. 1) to be construed with *pratipat*. The idea intended seems to be that (on seeing both Rāma and Lakṣmaṇa accompanying Viśvāmitra) the doubt that arose in the minds of groups of people was whether *dharma* and *artha* were perhaps seen personified in the form of Rāma, and *kāma* and *mokṣa* in the form of Lakṣmaṇa just for the purpose of favouring the sage Viśvāmitra.

[3] This is a figure of speech known as *lokokti*. See the Introduction.

[4] *Jīnāḥ* is in the sense of 'old people'. Amara says:

pravayāḥ sthaviro vṛddho jīno jīrṇo jarann api.

कासुरसेनाविजयः कासुरसेनाभिवर्धितौ च शिशू[1] ।
जडति[2] जरावैक्लव्याद् राज्ञः प्रज्ञेति केचिदाचख्युः ॥ १०३ ॥

बालसुतप्रस्थापनमस्थानेऽकारि तद्धि न स्थाने ।
इत्यस्वस्था देव्यः स्वस्थास्तत्त्वप्रदर्शिना गुरुणा ॥ १०४ ॥

अधिगतशुभलक्षणयोरधिगम्य शुभानि रामलक्ष्मणयोः ।
असहायशूरभावोल्लसनान्न चकम्पिरे परे सुधियः ॥ १०५ ॥

मुनिरथ मध्येमार्गं तनिमानमवेत्य रामलक्ष्मणयोः ।
दिविषत्तटिनीतीरे दिव्ये विद्ये ददौ बलातिबले ॥ १०६ ॥

सहजानुभावलक्ष्म्या सह तद्विद्यानुभावलक्ष्म्या च ।
सूर्याचन्द्रमसाविव शौर्यातिशयेन तावकाशेताम् ॥ १०७ ॥

प्रमुदितहृदयं सदयं प्राह प्रणतं प्रमाणवाक् स मुनिः ।
रामं रविकुलसोमं रक्षोराजचमूसमूहहरम् ॥ १०८ ॥

न क्षुन् नापि पिपासा न ग्लानिक्लमत्वमोहवित्रासाः ।
युद्धे ते वर्धेते धैर्यस्थैर्ये च वीर्यशौर्ये च ॥ १०९ ॥

[1] In the first *pāda* the expression is in the sense of *kva asurāṇāṃ senāyāḥ vijayaḥ*, and in the second *kva asūnām=prāṇānāṃ rasena abhivardhitau ca śiśū*.

[2] *Jaḍati* is in the sense of *jaḍā iva ācarati*, or *jaḍībhavati*, and is construed with *rājñaḥ prajñā*.

अथ तद्गाथोरुसुधा[1]धापनधयनप्रकृष्टहर्षास्ते ।
गङ्गां रविवंशयशःशृङ्गायितनिर्मलोर्मिमुत्तेरुः ॥ ११० ॥

तत्परतीरवनावनतत्परमतिराह राघवं स मुनिः ।
श्रीमन्नभिनवजलदश्याम स्थेयं त्वयाप्रमत्तेन ॥ १११ ॥

अत्र हि सातिनृशंसा सत्रविहिंसापरप्रसूर्विपिने ।
नागसहस्रबलाढ्या द्रागभिवर्तेत ताटकाख्या नः ॥ ११२ ॥

भुजबलजितमल्ला सा भुवनद्रोहैकभासुरोल्लासा ।
अघहरणासंदेहं[2] विघटय तस्यास्तु तामसं देहम् ॥ ११३ ॥

इत्थं गुरुणादिष्टश्चक्रे रामः शरासनं सगुणम् ।
तद्गुणमपि गुणवन्तं तार्किकविजिगीषयेव दाशरथिः[3] ॥ ११४ ॥

[1] The line seems to convey the idea that Viśvāmitra was narrating with pleasure the maivellous stories pertaining to the *vidyā*-s, i.e. *balā* and *atibalā*, and this narration was like nectar to Rāma and Lakṣmaṇa. The agent of *pāyana* was Viśvāmitra, and *dhayana* (i.e. *pāna*, from *dheṭ=pāne*) was done by Rāma and Lakṣmaṇa. Thus all the three were happy, Viśvāmitra in singing the praise of the *vidyā*-s, and Rāma and Lakṣmaṇa in listening to them.

The MSS. seem to read *dhāyanadhayana*. The causative derivative of *dheṭ pāne*, will be *dhāpana* (with *p*). Therefore the expression should be either *dhāpanadhayana*, or *pāyanadhayana*. I have chosen the first.

[2] *Aghaharaṇa* seems to be a vocative addressed to Rāma, and is in the sense of *duḥkhanivāraka*. Thus *asandehaṃ vighaṭaya*, etc. is in the sense of 'O Rāma! shatter her body into pieces without any shadow of doubt.'

[3] *rāmaḥ śarāsanaṃ saguṇaṃ cakre. tadguṇam api guṇavantaṃ cakre.* The lines mean: 'The bow was made ready for use by raising up the string, and the string was made to produce the twangs.'

दिक्करटिघटाश्रुतिकटुतत्कठिनगुणस्वनोपहूतेव ।
अथ पथि तेषां पुरतः प्रादुरभूत् साशु कालरात्रिरिव ॥ ११५ ॥

मत्वा श्रुतिमार्योक्तिं हित्वा शङ्कां वधूवधे कृपया ।
नागसहस्रबलामपि वेगवदेकेषुणा सुधीरवधीत् ॥ ११६ ॥

रघुपतिशरहतिनिपतितनिशिचरवनितानियुक्तभारेण ।
अलघु ननामेव मुदा पत्ये पृथ्वी सपर्वता साध्वी ॥ ११७ ॥

राघवशरलाघवतस्ताटकयाशेषलोककण्टकया ।
रहिताराजत वन्या महिता महदाश्रया यथा कन्या ॥ ११८ ॥

अथ दशरथतनयोऽपि प्रीत्यालिङ्ग्योन्मनोमहामुनिना ।
शिरसि समाघ्रातोऽभूत् सुरभिणि सुरपुष्पवर्षसौरभतः ॥ ११९ ॥

तद्वधवर्धितहर्षस्तस्मै रामाय सानुजायर्षिः ।
विततार धनुर्वेदं स ततार यतो जगन्त्यनिर्वेदम् ॥ १२० ॥

There is a pun on the expression *guṇa*. In *saguṇa* and *tadguṇa*, *guṇa* means the bow-string. In *guṇavantam*, *guṇa* stands for the effect, the sound (the twang) produced by the string. There is also *utprekṣā* here supported by the pun. *Guṇe guṇānaṅgīkāraḥ* is the position of the *tārkika*-s. A *guṇa* (which is counted as of 24 kinds=*caturviṃśatir guṇāḥ*), is a *dravyadharma*, a quality or property of a substance, and therefore a *guṇa* cannot be a property of another *guṇa*. In the present case, the *guṇa* of the bow (the string) was made by Rāma to have the *guṇa* (the twang), and therefore it is proved by Him that one *guṇa* can possess another *guṇa*. It thus appears as if he desired to challenge the contention of the *tārkika*-s and their dictum: *guṇe guṇānaṅgīkāraḥ*.

बद्धाञ्जलिभिर्देवैरिद्धां दिव्यास्त्रमन्त्रसामग्रीम् ।
रेजेऽवरजेन समं राजेवाह्वां वहञ् शुचौ रामः ॥ १२१ ॥

विश्वामित्रस्ताभ्यां विश्वासपदप्रभाप्रशस्ताभ्याम् ।
सिद्धाश्रममभियातो बद्धादरमाश्रिताश्रमैर्यातः ॥ १२२ ॥

अथ कुशिकसुतादेशान् मुनयो विनयोदधी तु दाशरथी ।
आनर्चुरचर्चाकं चक्रतुरपि तौ यथा पितुः प्रीतिम् ॥ १२३ ॥

महिमप्रथिततया तौ न हि मम्लतुरप्यलं वनं यातौ ।
अपि तु स्वपितुरिवाङ्के प्रापतुरुल्लासमेव भव्याङ्के ॥ १२४ ॥

अथ रामः श्रितकामप्रवितरणानन्यवृत्तिराह मुनिम् ।
क हि तावहितावस्मत्क्रतुविघ्नकरौ तु भस्मसात् कुर्याम् ॥ १२५ ॥

इति कुतुकोदितरघुपतिभणितिप्रतिपन्नमुत्समुन्नतिकः ।
मुनिपतिरिति तमुवाच प्रतिपद्य प्रीतिमुत्तमां वितमाः ॥ १२६ ॥

प्रविशति मयि मखदीक्षामाविर्भवतीह सासुरी सेना ।
वत्सारिविरामैनामुत्सादय राम लक्ष्मणानुचरः ॥ १२७ ॥

इत्यादिश्य मुनीन्द्रः क्रतुरक्षायै रघूत्तमं रामम् ।
मखदीक्षामथ भेजे सह सम्यगधीतसामभिर्मुनिभिः ॥ १२८ ॥

अथ विधिवद् विधिविद्भिः पृथगध्वरकर्मणि प्रवृत्तेऽलम् ।
अभिपेततुरतिनीचौ सपदि ससैन्यौ सुबाहुमारीचौ ॥ १२९ ॥

अवहितमतिरथ रघुपतिरुदधावुदपातयन्मरुच्छरतः ।
मारीचं तु सुबाहुं बाणेनैन्द्रेण भूबलिं चक्रे ॥ १३० ॥

तदनुजलक्ष्मणविशिखैस्तदनुचरश्रेणिरुन्निशातमुखैः ।
नीता क्षणमात्रेण तु वातोद्धूतोरुवारिवाहतुलाम् ॥ १३१ ॥

करकरवाललतानलकणगणनीयाक्षराक्षसालोकात् ।
ऋत्विक्ततिरतिभीता न त्विदमरिभेदनं ददर्श भिया ॥ १३२ ॥

राघवशरलाघवतः सैन्यं सुरवैरिणां निरस्तमिति ।
कुशिकसुतव्याहरणाद् धृतधृतिरधृताथ[1] सा स्रुचः सहसा ॥ १३३ ॥

यथाविधि विधाय तं मखमघापहः कौशिको
दधाववभृथाप्लुतो मुदमुदारधीर्देशिकः ।
ततो विततविक्रमस्तुतिपरंपराभिः परं
शशंस रघुनन्दनं श्रितजनावलीचन्दनम्[2] ॥ १३४ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये प्रथमः सर्गः

[1] *Adhṛta* is aorist (III. 1) *ātmanepada* of *dhṛñ=dhāraṇe*. *Sruc* is one of the instruments used during the performance of a *yāga*.

[2] The metre of this verse is *pṛthvī*.

jasau jasayalā vasugrahayatiś ca pṛthvī guruḥ.

अथ द्वितीयः सर्गः

मेने मनसि मुनीन्द्रो योजयितुमयोनिजामथावनिजाम् ।
चन्द्रेणेव निशामरिविजयवितन्द्रेण रामचन्द्रेण ॥ १ ॥

संपदशिथिलां मिथिलां तद्राजप्रार्थितः प्रतिष्ठासुः ।
प्रेम्णा प्रश्रितमाश्रितमन्दारमृषिर्जगाद तमुदारम् ॥ २ ॥

राम घनश्याम मम श्रीमान् जनकः सखा सुहृत्कनकः[1] ।
मुनिजनतत्त्वज्ञानप्रजननतो यस्य नाम नानर्थम् ॥ ३ ॥

यस्याचार्यः सूर्यः स बभूवार्यस्तु यस्य चाचार्यः[2] ।
यजति स राजा ज्ञातो व्रजति न कतमस्तु तत्र विज्ञातः ॥ ४ ॥

वयमपि तेनाहूता नयविनयविधेयचेतसा वचसा ।
तस्मादस्माभिः सह गन्तव्यं तेऽद्य साधु मन्तव्यम् ॥ ५ ॥

तत्रास्ति स्वस्तिकरं नूत्नं पुंरत्न कन्यकारत्नम् ।
शुल्कति यत्र प्रत्ने शैवे ज्यारोपणं धनूरत्ने ॥ ६ ॥

[1] *Kanaka* is generally noted in the lexicons in neuter gender, in the sense of gold. Apte notes it in the masculine in the sense of the *palāśa* tree.

[2] Yājñavalkya, the sage, was a student of the Sun, and he was the priest and preceptor of the king Janaka, the foster-father of Sītā.

चित्रं तत्र पुरे तच्चालयितुं वा न शेकुरेकैके ।
जितजन्या राजन्या देवा देवारयोऽपि के वापि ॥ ७ ॥

दोर्बलदुर्ललिताखिलदुर्बलतादर्शदर्शनीयं तत् ।
भाविशुभवता भवता गुणवत् कर्तव्यमन्वयेन समम् ॥ ८ ॥

उल्लासविधायकफलसंलापवशंवदान्तरङ्गेण ।
अनुजानुचरेण समं मनुजाधिपसूनुना मुनिः प्रययौ ॥ ९ ॥

नासत्याविव नासत्यौ[1] कौशिकमिव कौशिकं मुनीन्द्रं तौ ।
युग्मचरावनुजग्मतुरनवधिशौर्योदधी तु दाशरथी ॥ १० ॥

नानाविधतरुवीरुत्सूनादि[2]विशेषवर्जनाच्चित्रम् ।
मध्येमार्गमहल्यादुर्गं तद्दुर्गतिं जिहीर्षुरगात् ॥ ११ ॥

सयमाधिप[3] कस्य स्यादयमाश्रम इत्यतत्त्ववेदीव ।
रामः पप्रच्छ घनश्यामः प्रविशन् वनं मुनीशानम् ॥ १२ ॥

नयविनयमनोज्ञाय श्रीरामायाथ तद् यथाज्ञाय ।
[4]पश्यत्पददारभवादृश्यत्वनिमित्तमब्रवीत् कृपया ॥ १३ ॥

[1] The first *nāsatyau* means the twin-gods, the Aśvinī-devatā-s, and the other seems to be in the sense of very truthful. The first Kauśika means Indra, and the other Viśvāmitra.

[2] *Sūna* is *prasūna* (=*puṣpam*).

[3] *Sayamādhipa* seems to be understood as *yamaiḥ saha vartante iti=sayamāḥ=munayaḥ. Teṣām adhipaḥ, tasya sambuddhiḥ* (*he munīndra*).

[4] Paśyatpada is Akṣapāda, that is the sage Gautama, whose wife was Ahalyā.

चरति तपश्चित्रतरावस्मिन् विपिने पुरा दृगङ्घ्रिमुनौ[1] ।
कुक्कुटरुतकौटिल्यात् तं मुनिमिन्द्रः प्रतारयामास ॥ १४ ॥

कल्यामथ तद्विरहेऽहल्यामालोक्य तेन संदष्टः ।
निर्वृषणत्वेन वृषा नीलशिलात्वेन साप्यशापि रुषा ॥ १५ ॥

पितृदेवप्राभवतः स वृषालभताथ मेषवृषणत्वम्[2] ।
तत्प्रार्थनया स मुनिस्तस्याः शापावसानमाचख्यौ ॥ १६ ॥

स्पृशति यदा रामस्त्वां दाशरथिः पादपङ्कजेन [तदा] ।
शापान्तस्ते पुनरपि शापान्ते मामुपैष्यसि स्वस्था ॥ १७ ॥

इति तां निजपदपतितां पतिराशु शिलामयीमथादिश्य ।
तपसे हिमशैलमगात् किमिवासुकरं महात्मनां लोके ॥ १८ ॥

तद्राम कृपाजलधे साहल्यात्रैव पावनीया ते ।
नक्तंदिवमेकाग्रा चित्तेन त्वां प्रतीक्षते भक्त्या ॥ १९ ॥

इति मुनिपतिनादिष्टः साकल्येनैव शोकहृद् रामः ।
शिश्रायाहल्याया आश्रममुन्मुक्तदिव्यमाल्यायाः ॥ २० ॥

रामपदाम्बुजरजसा [3]वामतयादर्शि सा शिलाहल्या ।
स्थिरमपि रूपमवाप्ता चररूपमवाप चारु चित्रमभूत् ॥ २१ ॥

1 MSS. seem to read *padāṅghrimunau*. Perhaps it was a mistake of the scribe for *dṛgaṅghrimunau*, which is to be understood in the sense of *Akṣapādamuni*.

2 See *V.R.*, Bāla., canto 49, for the story.

3 The shortening of *vāmī* in *vāmatayā* is to be explained by *tvatalor guṇavacanasya*.

अथ रघुपतितिलकं सा प्रथमं पुरुषं सुनिश्चितं मनसा ।
कल्यावाग्भिरहल्या[1] स्तोतुं जगतः प्रचक्रमे हेतुम् ॥ २२ ॥

योषिदहं न प्राज्ञा प्राज्ञैरपि दुर्निरूपरूपस्त्वम् ।
स्वामिन् राम मम श्रीकामिन् पुण्येन गोचरोऽस्यक्ष्णोः ॥ २३ ॥

पावनतायां नाम्नस्तव वाल्मीकिः प्रमाणतां धत्ते ।
अहमेव तथा तस्यां तावकपदपङ्कजन्मनो रजसः ॥ २४ ॥

मायिन्नखिलानन्दविधायिन्नखिलेशधारणात् सुतनोः ।
चरमासुखविच्छेदनपरमानन्दैकतानतामतनोः ॥ २५ ॥

गायन्ति त्वां श्रुतयश्छायामात्राभिधाननिर्वृतयः ।
कायन्तो घनविलसत्कायं त्वां यन्ति धाम निर्दुःखम् ॥ २६ ॥

अनुमिनुयामानन्दान् मनसस्त्वामेव सच्चिदानन्दम् ।
न हि कैरवमुल्लसति प्रहिते चन्द्रेऽह्नि दूरमन्यस्मात् ॥ २७ ॥

कृतनतजनतानन्दे कृतनतिरहमस्मि सच्चिदानन्दे ।
गिरिशहृदलयरविन्दे[2] करिशर्मदे[3] कान्तिरस्तु गोविन्दे ॥ २८ ॥

[1] *Kalyāvāgbhiḥ* means *kalyāṇībhir vāgbhiḥ*. See the *Vaijayantī-kośa*: *kalyā tu vāci kalyāṇyām*.

[2] Īśvara is said to have been a devotee of, and to have worshipped, Rāma. See the following anonymous verse about the expression Rāmeśvara:

rāmas tatpuruṣaṃ prāha bahuvrīhiṃ maheśvaraḥ,
anye maharṣayaḥ sarve karmadhārayam ūcire.

How nice it would be if people could realize the significance of the beautiful second line!

[3] *Kariśarmada* is a reference to the episode of *gajendramokṣa*. In the expression *kāntir astu govinde*, *kānti* is in the sense of *icchā*=devotion.

चेतननयनमनोहर नूतनजलदाभमेतदार्तिहरम् ।
अधिगतदुरितदुरापं मथिताघ मनोवशेऽस्तु ते रूपम् ॥ २९ ॥

इति नुतिपूर्वकमर्हां कृत्वा विहितप्रदक्षिणप्रणतिः ।
रामाय तदा रामा तस्थावात्मेशसंनिधौ स्वस्था ॥ ३० ॥

तदनु मुनीन्द्रस्ताभ्यां तदनुमतेनैव वर्त्मना द्वाभ्याम् ।
अधिमिथिलाबहिरुपवनमधितष्ठौ साप्ततन्तवीं[1] वाटीम् ॥ ३१ ॥

प्रत्युज्जगाम राजा प्रत्युत्साहेन कौशिकं जनकः ।
तुष्टस्तु ततोऽर्घ्यादिभिरानर्च स तेन कौशलं पृष्टः ॥ ३२ ॥

विधिवत् सत्कृत्य तदा वत्सावपि रामलक्ष्मणौ राजा ।
कावेताविति कुतुकात् पप्रच्छ मुनीन्द्रमिष्टकल्पद्रुम् ॥ ३३ ॥

समुदञ्चितमन्दस्मितमवदन् मुनिचन्द्रमा नरेन्द्राय ।
विद्धीमावप्रतिमौ वीर्येण विकर्तनान्ववायभवौ ॥ ३४ ॥

नीतिनिधे दाशरथी दर्शितशस्त्रास्त्रकौशलावेतौ ।
तत्त्वं परमं त्वनयोर्न त्वं जानासि चेत् समो नान्यः ॥ ३५ ॥

चक्रवरहराभिख्यौ प्रख्यापितरामलक्ष्मणाभिख्यौ ।
मामकमखविघ्नहरौ तावकशिवचापदर्शनोत्कुतुकौ ॥ ३६ ॥

इति मुनिवचसा मुदितः पतिरवनेरात्मजानुरूपं तम् ।
रामं निर्वर्ण्य चिरं मुनये प्रोवाच साधु मन्वानः ॥ ३७ ॥

[1] *Sāptatantavī vāṭī* means *yajñavāṭī*.

नवनीरधरश्यामे रामे हन्त मे रमासहाय इव ।
स्निह्यति मह्यं तत्तत् कामं कल्याणमभिदधातीव ॥ ३८ ॥

चेतः सीतारोहति सादृश्यादस्य कन्यका नान्या ।
शंकरधनुरारोपः किं कुरुते वात्र शुल्कसेतुरसौ ॥ ३९ ॥

महती मम हि समृद्धिर्माहेशशरासमौर्विकारोपी ।
यद्येष स्याद्रामस्त्वामेव विधिं दधीमहि स्वामिन् ॥ ४० ॥

नवपञ्चशरे चास्मिन् नवपञ्चजगन्नियन्तृता नियता ।
तदसौ यदि जामाता वद सौलभ्याय कल्पतेऽत्र न किम् ॥ ४१ ॥

भाग्यं भावि यथा वा दुहितुर्मम दूयते मनो हि ततः ।
दुस्त्यजसंधोऽस्मि सखे दुस्तर इव भाति शुल्कसेतुरपि ॥ ४२ ॥

अधिपतिमथ मिथिलाया गाधिसुतः प्राह धीरवीरधिकम् ।
दर्शय कार्मुकमस्मै कर्शयति मनोव्यथां तवैवासौ ॥ ४३ ॥

अथ राज्ञा निर्दिष्टाः पुष्टाः पुरुषास्तु पञ्चसाहस्रम् ।
आनिन्युस्तं देशं मन्दरमिव चापमैशमिन्द्राद्याः ॥ ४४ ॥

राज्ञां पुरतः स गुरोराज्ञामादाय राघवोऽलघुधीः ।
परिचितवत् तच्चक्रे पाणौ चरितप्रदक्षिणप्रणतिः ॥ ४५ ॥

ज्यामारोप्य शरासनकोटौ विचकर्ष दोर्बलाद् रामः ।
भग्नं तदतिप्रणदच्चक्रे प्रमदं च चित्तमुद्वेलम् ॥ ४६ ॥

रामं रविकुलसोमं राजा राजावतंसचापभिदम् ।
श्रीशं साक्षान्मेने तामेव सुतामयोनिजां सीताम् ॥ ४७ ॥

तच्चापदलनसंभवमुच्चारवमाकल्य्य[1] सर्वजनाः ।
सीताकल्याण इव प्रीतात्मानस्तदैव संजाताः ॥ ४८ ॥

अथ मिथिलाधिपतिस्तत्प्रथममहामोदमेदुरस्वान्तः ।
बहुधा बहु मेने हृदि रामं जामातरं विनिर्धार्य ॥ ४९ ॥

शितिकण्ठधनुर्भेदकपतिकण्ठाश्लेषलोलुपात्मजा ।
लेभे काममपि कान्तिं लाभेनेष्टस्य का न कान्तिमती ॥ ५० ॥

भुजसारपरीक्षायै धनुरारोपो निरूपितः शुल्कः ।
तद्धनुरुद्दलनरवात् तं सारमपारमब्रवीदिव तान् ॥ ५१ ॥

सीतामानसपरिणयहेतावस्मिन् रवे दलद्धनुषः ।
अपि रोधोरुधि सुधियः कुपिता गिरिशस्य नो मनोवृत्तिः ॥ ५२ ॥

स जहर्ष महर्षिः श्रीरामं विनयाभिराममालिङ्ग्य ।
स्वान्तेवास्युत्कर्षः स्वान्ते स्वोत्कर्षतोऽपि हर्षाय ॥ ५३ ॥

राजानन्दनिमग्नः श्रीजानिमिव श्रियाञ्जसा योक्तुम् ।
राममयोनिजयाब्दश्यामं तटिदाभया स्फुटं मेने ॥ ५४ ॥

स कृती जनकः सुकृती मन्त्रिभिरनुमन्त्र्य मन्त्रविन्मुनिभिः ।
स्वावरजौरसकन्या मेने रामानुजन्मभियोक्तुम् ॥ ५५ ॥

विज्ञा विज्ञाय मतिं राज्ञः प्राज्ञत्वतुल्यरूपां ताम् ।
सर्वे पर्वेन्दुमुखैः सत्रा तत्रानुमेनिरे स्त्रैणैः ॥ ५६ ॥

[1] *Uccārava* is in the sense of *uccaś cāsau āravaś ca.*

अथ दशरथमानेतुं दूतान् प्रास्थापयत् स्वतः प्रीतान् ।
राजा निरुपमतेजास्तदयोध्यायै द्विषामयोध्यायै ॥ ५७ ॥

विधिवन्मिथिलाधिपतिः सत्रं तत्रर्षिभिः समाप्यैव ।
सदकारयदात्मपुरीं सुरपूरपि तत्तुलां यथा नैति ॥ ५८ ॥

न जनकनगरीतुलनां नगरी च[1] बरीभरीति कौबेरी ।
पद्मालंकृतसद्मा सद्माधिगतोल्लसन्मुकुन्दा यत् ॥ ५९ ॥

उच्चलदनिलनियोगादुच्चपताकापटाञ्चलैः प्रचलैः ।
पूराह्वयति नृपूरान् कुतुकत इव भाविभव्यहेतुकतः ॥ ६० ॥

अकलङ्कमलंचक्रुः सकलं कमलस्रजा पुरद्वारम् ।
आर्तस्वरदूरायितकार्तस्वरक्लृप्तरत्नदाम्ना च ॥ ६१ ॥

मुक्तामणिमयतोरणसक्ताधिवितानकायमानघना ।
सा पूरवनिसुताख्यश्रीपूर्णपदं न कां श्रियं श्रयति ॥ ६२ ॥

प्रतिपदसमुदञ्चितमुत्प्रतिपदमन्दोत्सवप्रदा मिथिला ।
प्रतिपदमवलोकयतां प्रतिपदमलिनांशुवत् प्रमोदपदम् ॥ ६३ ॥

जनकः स पुरोधस्तः कनकशरावार्पिताक्षतस्तस्थौ ।
स्फीताखिलसामन्तैः सीतां रामाय संप्रदित्सुः सन् ॥ ६४ ॥

उत्तरकोसलनरिबृढमुत्तरमखिलक्ष्माभृता दूताः ।
अवलोक्य प्रणतास्तं फेणुः स्वस्य प्रभोः शुभोदन्तम् ॥ ६५ ॥

[1] Both the MSS. seem to read *na* instead of *ca*; perhaps it was a mistake of the scribe.

अंशुमदन्वयतिलकस्तं शुभलेखार्थमन्वयैकगुरोः ।
विज्ञाप्य तदाज्ञातः प्रज्ञां चक्रे शुभप्रयाणाय ॥ ६६ ॥

सह वेदवेदिभासुरभूसुरनिकरैररुन्धतीजानिम् ।
सारणिमघहरसरणिं[1] पुरतः पुरतः प्रयापयांचक्रे ॥ ६७ ॥

स्वन्तानथ सामन्तान् भुजबलनिष्पीतशत्रुसामन्तान् ।
हस्त्यश्वरथपदातिस्वस्त्ययनविधायिनः प्रधानांश्च ॥ ६८ ॥

महिषीसुतबन्धुजनैः सहितो मत्तेभवाहनारूढः ।
भेरीमुखभूरिरवैर्वृद्धस्त्रीभिः स निर्ययौ राजा[2] ॥ ६९ ॥

मङ्गलवाद्यधरास्ते पिङ्गलवासःप्रिया विवाहाय ।
आज्ञामादाय मुदा[3] राज्ञा साकं प्रतस्थिरे प्रचुरम् ॥ ७० ॥

चित्ताभिरञ्जनोत्तमनृत्ताभिनयाविगीतसंगीताः ।
शम्पाकम्पावहतनुधीरा[4] वाराङ्गना अनुप्रययुः ॥ ७१ ॥

[1] MS. A reads *maitrāvaruṇim araṇyā*, instead of *sāraṇim aghaharasaraṇim*.

[2] MS. B gives the following verse after verse 69 (before *maṅgala-*, etc.):

acchamanāḥ śaradindusvacchanijacchatracāmaraprabhayā,
rājā rañjitalokaḥ purato niragād agā hirāḍdhīraḥ.

[3] MS. A reads *ājñām dhṛtvā pramadāt*, instead of *ājñām ādāya mudā*.

[4] *Śampā* means *vidyut*. The expression is to be understood thus: *śampāyāḥ kampam vahati=janayatīti, śampākampāvahā, tanuḥ=śarīram; tayā tanvā dh dḥ.*

इत्थमतीव समृद्धं वृद्धं सर्वोपहारसंबद्धम् ।
मिथिलाधिपतिर्दशरथमधिबहिरुद्यानमभ्यगाद् वेगात्[1] ॥ ७२ ॥

स सपरिवारो राजा राज्ञा प्रत्युद्गतो विदेहानाम् ।
सर्वोपायनमहितः पर्वोदितचन्द्रवत् पुरं प्राप ॥ ७३ ॥

प्रत्युज्जगाम रामः सावरजन्मा समातरं पितरम् ।
वत्सावतिवात्सल्यादुत्सङ्गमनीनयत् तदा स मुदा ॥ ७४ ॥

दिव्यविमानसमानं भव्यवितानादिभासिभर्ममयम् ।
दशरथराजस्तूर्णं रम्यनिवेशं विवेश विस्तीर्णम्[2] ॥ ७५ ॥

उभयोर्हरिहरनिभयोः शुभयोगविधित्सयोल्लसत्सभयोः ।
राज्ञोः पुरतः प्राज्ञा विज्ञातगुणागुणास्तु दैवज्ञाः ॥ ७६ ॥

वरतिथिवारभयोगे करणे सति सप्तमे विशुद्धिमति ।
उदये गुणवति फेणुः सदयेन शुभं हृदा वसिष्ठाग्रे ॥ ७७ ॥

[3]हस्त्याननादिकात्मस्वस्त्यावहदेवता विदेहेन्द्रः ।
संपूज्य पूज्यधीभिः पुण्याहमवाचयत् पुरोधोभिः ॥ ७८ ॥

[1] MS. A reads:

. . . . *sarvopahārasannaddhaḥ,*
pathi daśarathanarapālaṃ prathitaṃ dūtair avetya niryātaḥ.

[2] MS. A reads:

daśaratharājo darśitam āśu niveśaṃ viveśa vistīrṇam.

[3] I do not find the reference to *Gaṇeśapūjā,* etc. in the *V.R.* in this context. Our author seems to have been a wroshipper of Gaṇeśa also. See the second *maṅgalaśloka* in the beginning.

[1]श्रुतविच्छतधृतिसुतयुक्कृतसुतगोदानमङ्गलः कुतुकी ।
पाणिग्रहणं सान्तर्वाणिर्वाणीव तं प्रतीक्षितवान् ॥ ७९ ॥

अथ सुमुहूर्ते प्राप्ते प्रथमानसमस्तमङ्गलव्याप्ते ।
तावद्विभवोपेतौ तावग्रण्यौ समीयतुर्महितौ ॥ ८० ॥

महति विवाहागारे महनीयमणिप्रदीपिकाधीरे ।
[2]मणिमयमण्टपमगजामन्दिरमतिसुन्दरं ययुः सर्वे ॥ ८१ ॥

[1] *Śrutavit* means *vedavit*. *Śatadhṛtisuta* is in the sense of Vasiṣṭha. He was the family priest of Daśaratha, and Śatānanda of Janaka. (See also verses 83 & 84 below.)

See *Rāmāyaṇa* on this *godānamaṅgala*, Bāla., canto 72, vv. 21 to 25:

> *prabhāte kālyam utthāya cakre godānam uttamam,*
> *gavāṃ śatasahasrāṇi brāhmaṇebhyo narādhipaḥ.*
> *ekaikaśo dadau rājā*, etc.

Godāna is a religious rite performed for the bridegroom just before the marriage function. Rāmacandra Budhendra, the commentator on the *Campūrāmayaṇa* explains it as *keśāntakarma*. (See page 77 of the ed. published by V. V. R. & Sons, Madras, 1956.) See also Mallinātha on III. 33 of *Raghu.*, and *Mitākṣarā* on Yājñavalkya, I. 36.

[2] I understand that in the course of the performance of a marriage, after the *puṇyāhavācana* and before the actual *kanyādāna*, Gaurī (and Hara=*Gaurīharapūjā*) is worshipped by some people. My friend G. Ramasubba Sarma informs me that this is done particularly by the Smārta-s in the Andhra area. This does not seem to be observed by the Smartā-s in Tamilnadu. The expression in the verse: *agajāmandiraṃ yayuḥ sarve* seems to be a reference to this custom, though the *pūjā* of Gaurī (or of Hara) is not expressly stated. An image or a picture of Pārvatī was probably placed in a suitable manner in the same location where the *kanyādāna* took place. This is perhaps the implication of *tatra* in the next

तत्र विचित्रतरे मणिपीठे तपनीयवेदिकापीडे ।
साक्षाल्लक्ष्मीविष्णू सीतारामौ न्यवेशयन् जिष्णू ॥ ८२ ॥

मङ्गलतूर्यनिनादे मङ्गलवादेन मेदुरे विदुषाम् ।
विधिवद् वह्निरहूयत विधिजेन महर्षिणातिहर्षेण ॥ ८३ ॥

दशरथमिथिलेश्वरयोरुभयोरभयं पुरोहितौ महितौ ।
शतधृतिजशतानन्दौ पेठतुरुच्चैर्वधूवरप्रवरौ ॥ ८४ ॥

रामः साक्षततोयं जनकक्षितिपालकार्पितां प्रीताम् ।
कनकप्रतिमामिव तां पाणौ जग्राह पाणिना सीताम् ॥ ८५ ॥

[1]पुष्करदृगिव शुभोदयपुष्करसमये रमासमां रामः ।
प्रतिगृह्य तदा सीतां प्रतिगृह्यतिशायिनीं श्रियं[2] भेजे ॥ ८६ ॥

अन्योन्याञ्जलिमुक्ता मुक्ता अन्योन्यमूर्धसंसक्ताः ।
मुदमुद्वेलां ताभ्यस्ताभ्यामपि लेभिरेऽभिवीक्ष्य जनाः ॥ ८७ ॥

verse (82). Our author refers to the *puṇyāhavācana* in verse II. 77, and the *kanyādāna* is mentioned in verse II. 84. See also P. V. Kane's *History of Dharmaśāstra*, vol. 2, part I, page 536, for information on *Gaurīharapūjā*. See also the *Bhāgavata*, X. 53. 44 & 45, where the worship of Pārvatī by Rukmiṇī before her marriage is mentioned:

āsādya devīsadanaṃ dhautapādakarāmbujā, (rukmiṇī)
upaspṛśya śuciś śāntā praviveśāmbikāntikam. (44)
tāṃ vai pravayaso bālāṃ vidhijñā viprayoṣitaḥ,
bhavānīṃ vandayāṃcakrur bhavapatnīṃ bhavānvitām. (45)

[1] *Puṣkaradṛg iva* means *nārāyaṇa iva*. *śubhodayapuṣkarasamaye* is in the sense of *śubhodayavādyasamaye*.

[2] *Pratigṛhyatiśāyinīm* is perhaps in the sense of *pratikuṭumbyatiśāyinīm*, i.e. *sarvakuṭumbyatiśāyinīm*.

जनकस्तदनु तदनुजां कनकप्रतिमामिवोर्मिलां तनुजाम् ।
लक्ष्मणनाम्नेऽमितशुभलक्ष्मधरायादराद् वराय ददौ ॥ ८८ ॥

जनकः स्वानुजतनये कनकाभरणैर्विभूषिते सनये ।
माण्डविकाश्रुतकीर्ती चक्रे भरतारिहार्धतनुमूर्ती[1] ॥ ८९ ॥

रामं रत्नमयालंकरणैरापादमस्तकं रम्यैः ।
काञ्चनमणिमकुटोत्तरमञ्चन्नानञ्च दृक्फलं जनकः ॥ ९० ॥

तद्वत् तत्र विचित्रं सुदृशः सर्वाश्च राममुद्वीक्ष्य ।
जनकदुहित्रा साकं तादात्म्यमकामयन्त संप्रीताः ॥ ९१ ॥

सुकृतं किंकृतमनया स कृतः पतिरित्यहो शुभाननया ।
प्रस्तुत्य भुवस्तनयां निस्तुलमुदमस्य चक्रिरे जनयाम्[2] ॥ ९२ ॥

तदनु तदनुजन्मानं तद्वत् तेनैव भूषिताः सर्वे ।
दिक्षु दिदृक्षुजनानामानन्दममन्दमासुराजनयाम्[2] ॥ ९३ ॥

वेदविदाशीर्वादैर्वन्दिजनाकुण्ठकण्ठनादैश्च ।
वादित्रविचित्ररवैरुद्भवदखिलेऽपि कौतुकं जगति ॥ ९४ ॥

सीतापरिणयवेला वेलातिगमुद्विधायिनी जगताम् ।
नेदुः सुरदुन्दुभयो ननृतुर्दिव्याप्सरःस्त्रियोऽपि मुदा ॥ ९५ ॥

[1] *Arihā* means Śatrughana; *Ardhatanumūrtī* means *bhārye*.

[2] Though the grammarians did not approve, the poets freely indulged in this type of irregular usage. cf. (*Raghu.*) *taṃ pātayām prathamam āsa papāta paścāt* (IX. 61), and *prabhraṃśayām yo nahuṣaṃ cakāra* (XIII. 36), etc. See also Note on verse XIV. 4.

ववुरथ शीता वाता विमलाश्च दिशः प्रसूनवृष्टिरभूत् ।
आनन्दैकनिकेतनमासीत् सकलं जगत् तदानुकलम् ॥ ९६ ॥

नानोपायनदानान्नानारसमिश्रितान्नदानाच्च ।
ब्राह्मण्यमविन्दत तद् ब्रह्मानन्दं यथा तदानन्दम् ॥ ९७ ॥

सीतापरिणयसमयप्रीतावनिनाथसत्क्रिया कस्य ।
नाजीजनदानन्दं राजीव इवार्कभा हृदये ॥ ९८ ॥

स्तुतिमुखरितमुखताया जनतायाः केवलं न हेतुरसौ ।
श्रुतिमुखरितमुखताया अपि धन्यतमो निराकृतान्यतनूः[1] ॥ ९९ ॥

स्ववधूकरकमलार्पितपयसा प्रक्षाल्य रामपादाब्जे ।
यदसौ तदपः शिरसा समुवाह ततः परात्परो न परः ॥ १०० ॥

प्रत्यग्रकुशाग्रधियामग्रेसर एष राजराजर्द्धिः ।
अध्येष्ट श्रुतिविततिं धन्यतमोऽर्कप्रशिष्यभावेन ॥ १०१ ॥

अधिगतपरमार्थतया सत्पात्रवितीर्णयावदर्थतया ।
दूरीकृतदोषतया वरगुणगणनाग्रगण्य एवायम् ॥ १०२ ॥

[1] *Nirākṛta* is aorist (III. 1, *ātmanepada*). *Dhanyatamaḥ* means the best among the *dhanya*-s. *Anyatanūḥ* refers to other bodies, i.e. subsequent births in this world. The idea intended seems to be that the occasion made not only the people eloquent in paying their encomiums to the couple, but also because of the Vedic recitation, some of the best among the people, who could understand and realize the proper significance of the Veda, were enabled by the occasion to get rid of mundane existence and obtain final liberation.

साक्षात् त्रिभुवनजननीलक्ष्मीरक्षीणवैभवाध्यक्षा ।
सा भगवत्यपि सीता किं बहुनानेन जानकी जाता ॥ १०३ ॥

इति विविधस्तुतिकथया श्रुतिसुधया प्राप्तनिस्तुलप्रीतिः ।
सीताकारणवितरणजातानन्दः स नामशेषोऽभूत् ॥ १०४ ॥

मिथिलाधिपतिः संसृतिशिथिलादरपूरुषाग्रणीरित्थम् ।
विधिवद् विहितविवाहो निधिवद् विततार कामितानि सताम् ॥ १०५ ॥

कर्बुरवर्षमवर्षच्छम्बरवर्ष[1] यथाम्बुदोऽम्बरतः ।
स जहार यशो दातुर्विजहार जगत्त्रयीशिरोरत्नम् ॥ १०६ ॥

विविधोपायनदानैः स्वविधेयनिधिव्रजो यथा धनदः ।
दशरथनरपालोऽपि स्वशरीरमशेषयद् विशेषज्ञः ॥ १०७ ॥

शिवयोरिव कृतयावच्छिवयोरवनीसुतारघूत्तमयोः ।
हृत् कस्य विवाहविधावुत्कस्य मुदम्बुधौ पदं न दधौ ॥ १०८ ॥

जनकार्पितमणिमौक्तिककनकाम्बरदारसत्कृतेः सुकृती ।
निजनगरीव्रजनाय प्रजवं ह्यजनन्दनो मनश्चक्रे ॥ १०९ ॥

अथ रथगजतुरगभटैः पृथिवीमाच्छादयन् मुदाच्छपटैः ।
स्वच्छत्रेन्दुज्योत्स्नाप्रच्छन्नक्षोणिमण्डलः प्रययौ ॥ ११० ॥

तटिदाभनववधूटीघटितात्मजयुङ्महीपतिर्मकुटी ।
पञ्चसुरद्रुमलीलावञ्चनशीलां[2] विनिर्ययौ स्वेलाम् ॥ १११ ॥

[1] The word *karbura* is my guess. The MSS. are not clear here. *Karburavarṣa* is *svarṇavarṣa*, and *śambaravarṣa* is *jalavarṣa*.

[2] MSS. seem to read *śīlo*. Perhaps it is *śīlām* as an adjective to *svelām* (*sva+ilām=svabhūmim*). The idea intended seems to be

स हि महिलामण्डलिकासहितः प्रहितः पुराद् ययौ यावत् ।
तावत् प्रतिवातभुवा रजसा बलमाकुलं मनश्च भिया ॥ ११२ ॥

दुःशकुनदर्शनोद्भवदुःशमदुःखाब्धितारणे तरणीः ।
जपति ऋचः परमर्षौ नृपतिरपि प्रीतिमाप सच्छकुनैः ॥ ११३ ॥

मङ्गलतूर्यनिनादैर्मङ्गलबिरुदावलीनिनादैश्च ।
पिङ्गलनागकलाकृतिमङ्गलपाठैश्च खं लिखन् स ययौ ॥ ११४ ॥

हृदि मुदमातन्वन्तं तन्वन्तरतुल्यमात्मनो जनकम् ।
जनकं कनकावनिभृल्लघुताया लालयन् गिरा निरगात् ॥ ११५ ॥

श्रीमति तस्मिन्नित्थं दशरथनरनायके प्रयाति सति ।
कल्पान्तार्ककठोरः प्रादुरभूद् भार्गवः कुठारकरः ॥ ११६ ॥

प्रचकम्प नृपालान्तःकरणं तस्मिन्नुपागतेऽशरणम् ।
तमभीयाय सभीरपि सम्राडर्घ्यादिभिर्गभीरात्मा ॥ ११७ ॥

स तु तं च तदीयार्चामनवेक्ष्य दृशा प्रदर्शयंश्चर्चाम् ।
मूर्तः क्रोध इवाधिकधूर्तः क्व केति राममप्राक्षीत् ॥ ११८ ॥

अयमस्मीति स रामो भयमखिलस्यापि संहरन् वचसा ।
नतभृगुपतिपदपद्मो गतभीस्तस्यैव तस्थिवान् पुरतः ॥ ११९ ॥

मन्नामधृतेरेव त्वं नाभिमतोऽसि राम मे कामम् ।
धनुरपि दलितं शैवं क्व नु तव विजिजीविषेत्यवादीत् तम् ॥ १२० ॥

that even Indraloka, though possessed of divine trees, Kalpavṛkṣa, etc. was surpassed by his own land.

सर्षिः परमामर्षी रामो रामं रुषाह तं परुषम् ।
[1]गौरवचापभिदागो घोरार्तिं वर्तयिष्यते न कथम् ॥ १२१ ॥

किं च कठोरकुठारोदञ्चितनिःक्षत्रता प्रतीता या ।
तामद्य हिनस्ति भवान् राम कथं तत्कृतापदां न पदम् ॥ १२२ ॥

[2]गिरिधर्मधर्मसूनावसुमति वसुमत्यहो महीशवती ।
अस इव लसति ममासावसमच्छिन्नावनीट् कुठारोऽपि ॥ १२३ ॥

समिधामिव सम्राजां न तव किमश्रावि मे च्छिदाकरणम्[3] ।
शैवधनुर्दलनोत्कटदोर्मदमद्यात्ति तावकं तं मे ॥ १२४ ॥

भृगुपतिरित्थमनल्पं जल्पन् कल्पान्तवह्निकल्पास्यः ।
अरुणद् दशरथसरणिं तरणेरिव सत्तमास्तमः सरणिम् ॥ १२५ ॥

भगवन् भृगुनन्दन भो नागो मयि किंचिदप्यनुग्राह्यम् ।
मनुषे किं निग्राह्यं मामिति विरराम संलपन् रामः ॥ १२६ ॥

[1] *Gaurava* is in the sense of *gurusambandhin*. Śiva is said to have been the *guru* of Paraśurāma in the science of archery. See Rājaśekhara's *Pracaṇḍa-pāṇḍava* (i.e. *Bālabhārata*): *sadāśivapraśiṣyo'-yam*, etc. and *śiṣyo'smi bhārgavamuneḥ*, etc. (I. 36 and 37).

[2] The first part of the verse is not clear. *Asumati* seems to be the word in the context, meaning *jīvati sati*. *giridharmadharma-sūnau* is not clear. It seems here applicable to Paraśurāma. It may be in the sense of *girer iva dharmaḥ=sthairyaṃ yasya saḥ. giridharmā cāsau dharmasūnuśca. tasmin. satyavacanatvena ca dharmasūnut-vam=yudhiṣṭhiratulyatvam.*

[3] In MS. B there are two halves after this half, thus adding one more verse to the total number. The lines are not clear. But the meaning is not affected even without these halves.

आरोपय चापं मे दोष्मान् यदि दोर्मदं हरेयमिति ।
स्वं धनुरदिशत् तस्मै स्वं धनमिव भार्गवोऽथ चोराय ॥ १२७ ॥

स दधार धनुर्धीरो रामस्तस्यैव तेजसा साकम् ।
[1]आरोप्य गुणं तत्र च संधाय शरं तमित्युवाच मुनिम् ॥ १२८ ॥

स्वामिन् रामशरोऽसौ मोघो न क्वापि गोचरं ब्रूहि ।
इत्यनुयुक्तः स श्रीरामेण स्वर्गमार्गमत्याक्षीत् ॥ १२९ ॥

पश्यति तस्मिन् परितो नश्यति तन्मार्गलाञ्छनेऽप्यखिले ।
पूर्णं पुरुषमिव ज्ञस्तूर्णं तूणीरमाविशत् स शरः ॥ १३० ॥

तच्छरजन्मासमबलतच्छरजन्मानुभाववीक्षणतः[2] ।
करशोभमानभीकरपरशोरपि तस्य रुङ् ययौ क्षणतः[3] ॥ १३१ ॥

शरणं शम एव तदा भृगुकुलतिलकस्य न च्छिदाकरणम् ।
चित्रं ननु चारित्रं जिष्णोर्जगदीशितुर्महाविष्णोः[4] ॥ १३२ ॥

निर्जित्य दुर्जयं मुनिमार्जितयशसा तदा कुले तरसा ।
उदपादि नृपालकुले मुदपारपराक्रमेण रामेण ॥ १३३ ॥

[1] MS. A seems to read the second line thus:

āropya śaraṃ tasmintsandhāya tadedam abravīd rāmam.

[2] First *śarajanman* seems to stand for Kumārasvāmin and the second is in the sense of *śarodbhūta*—adjective to *anubhāva*. The expression *taccharajanmāsamabala* seems to be intended in the sense of *saḥ=prasiddhaḥ śarajanmā=kumārasvāmī asamabalo yasya saḥ.*

[3] MS. A reads:

karaśobhamānaparaśor api tasya samāpitā samit kṣaṇataḥ.

[4] MS. A reads: *jiṣṇor jagadīśvarasya tadviṣṇoḥ.*

भृगुपतिरथ तं रामं मत्वा नारायणं स्तुवन् बहुधा ।
निजधाम ययौ महितस्तुष्टो राजापि तैः सुतैः सहितः ॥ १३४ ॥

भार्गवरामस्तु तदा मुदमुद्वेलां दधार दाशरथेः ।
दुष्टक्षत्रिय[कारण]शिक्षा प्रच्याविता यतः स्वस्य[1] ॥ १३५ ॥

नृपालकुलकाननानलमपारतेजस्तपो-
निधिं पथि भृगूद्वहं भुजबलादजषीदसौ ।
रमापतिरुमापतिः किमिति संस्तुवद्भिर्जनै-
र्जगाम जगतीपतिः [2]परमुदारमोदाम्बुधौ ॥ १३६ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते[3] श्रीहरिचरिते महाकाव्ये द्वितीयः सर्गः

[1] This verse is not found in MS. A. The portion within brackets is not clear in the MS., and is only my guess.

[2] *Param* seems to be in the sense of *dūram* (*paraṃ jagāma*= *dūraṃ jagāma*). The metre of the verse is *pṛthvī*.

[3] MS. A reads *kṛtau* instead of *viracite*. I kept *viracite*, as a uniform expression, throughout.

तृतीयः सर्गः

मातुलकुलमाश्रयति भ्रातरि भरते भुवः पतिर्बुद्धिम् ।
चक्रे शक्रमिव स्वे रामं राज्येऽभिषेक्तुमग्रभुवम् ॥ १ ॥

जितसुरगुरवे गुरवे विज्ञाप्य स संमतेन तेन सुधीः ।
आहूय सहामात्यैर्वृद्धांस्तेभ्यः स्वबुद्धिमाचख्यौ ॥ २ ॥

श्रुत्वा तद्वचनसुधां सर्वे खर्वेतरां दधुः प्रीतिम् ।
स जनानामनुरक्तिं निजतनये वीक्ष्य निश्चिकायोक्तिम् ॥ ३ ॥

गुर्वाज्ञायाः प्राज्ञाः सर्वामात्याः समीकृतामर्त्याः ।
आजह्रुरतिगभीरान् पट्टतरपट्टाभिषेकसंभारान् ॥ ४ ॥

पुरमखिलमलंचक्रुः परमं न ततः परं यथाशु तथा ।
मृगमदचन्दनचर्चाघनघनसारादिसौरभैकपदम् ॥ ५ ॥

तत्पुर्यधरिततद्द्योसत्पुरि[1] निखिलोपचारभूयस्त्वात् ।
नरराजगृहश्रेणी सुरराजगृहश्रियं ह्रियं निन्ये ॥ ६ ॥

काञ्चनतोरणमालाः कांचन कान्तिं पुरस्य पुष्णन्ति ।
मुक्ताविद्रुममधुरं मुक्ताविर्भावितस्पृहं स्त्रैणम् ॥ ७ ॥

[1] *Dyosat* is in the sense of *diviṣat*, i.e. *amara*-s. *Tat* is *prasiddhārthaka*. Thus the expression means *tasyām adharīkṛtaprasiddha-diviṣatpuryām puryām.*

सर्वाभरणविभूषितसर्वासुमदुत्सवावहे[1] नगरे ।
मङ्गलतूर्यनिनादे पिङ्गलवासो निवासमास्पृशति ॥ ८ ॥

आसीन्नियतिनियोगाद् दासी काचित्तु मन्थरा नाम ।
मातुः श्रुतपौरोत्सवहेतुस्तन्मीलने मिलत्कुतुका ॥ ९ ॥

कथमहमभिषेकमिमं [2]विधरिष्यामीति चिन्तयन्ती सा ।
शनकैः केकयदुहितुः कनकैकनिकेतनं ययौ निलयम् ॥ १० ॥

गत्वा तामभिवन्द्य स्तुत्वा नर्मोक्तिचित्रचित्रपदम् ।
प्राह महानर्थमिव श्रीरामस्याभिषेचनं तस्यै ॥ ११ ॥

मन्थरयाधरयोक्तं रामा रामाभिषेचनं श्रुत्वा ।
तरसा[3] प्रतिमुच्य रसादुरसस्तस्यै ददौ वरं हारम् ॥ १२ ॥

भरतादपि मे रामे प्रेमा सीमानमेति नैवालम् ।
तदनर्थशङ्कयालं तव तत्र विचित्रसद्गुणस्तोमे ॥ १३ ॥

मय्यनुरक्तः सोऽपि स्वीयजनन्या अपि प्रजानुमतः ।
अभिषेकमसावर्हति न मियं वद मन्थरे धुरंधरतः ॥ १४ ॥

एकयशस्करवृत्तिं केकयराजस्य पुत्रिकां प्रेक्ष्य ।
साहसमाश्रित्य पुनः साह सदा क्रूरधीरधीरदृशम् ॥ १५ ॥

[1] The expression means *sarvajanotsavāvahe*.

[2] The reading is not clear in the MSS. What is given is my guess. *Vidharişyāmi* was perhaps intended in the sense of 'How shall I stop the coronation?'.

[3] MSS. seem to read *sarasā*. Perhaps *tarasā* was intended by the author.

कनकासनमारूढा किमपि न जानासि वच्मि किं मूढा ।
अभिषिक्तसुता कल्या[1] श्रीसाकल्येन भाति कौसल्या ॥ १६ ॥

न त्वं न तव तनूजः श्रियमयति परं तु दास्यमपहास्यम् ।
असती खलु ते धिग्धीः क्व सतीषु विवेकिता स्वतामवधीः ॥ १७ ॥

पत्युस्त्वयि न प्रीतिः प्रत्युक्तसुतासि तत्त्वतस्तत् त्वम् ।
बत सा कौसल्यायामत एव सुतोऽभिषेक्ष्यते तस्याः ॥ १८ ॥

वाचा नन्दयति त्वां मोचाफलमधुरया परं नृपतिः ।
प्राचा कर्मफलेन हि काचासि किमीश्महे वयं कर्तुम् ॥ १९ ॥

इति बहुविधभेदकवाक्छ्रुतिसमुदितचित्तविक्रिया सासीत् ।
निर्मलसलिला सरसी निर्मथिता दुर्धिया न किं कलुषा ॥ २० ॥

केकयराजकुमारी तामाह ततः कुमारिकां दास्याः ।
आश्चर्यकरी खलु ते बुद्धिर्यच्छारदासि मन्त्रविधौ ॥ २१ ॥

कुब्जे मुखविजिताब्जे कथमियमुदिता मतिः सती सुदति ।
अन्धे तमसि पतन्त्या इन्धे मम सूर्यदीधितिर्जाता ॥ २२ ॥

सख्यसि मुख्यतमा मे सख्यसमं वस्तु वस्तुतो नास्ति ।
विपदुपधेरुदधेर्मां कृपयासि यदुद्दिधीर्षुरद्य त्वम् ॥ २३ ॥

कुर्मः कर्म किमद्य ब्रूहि न हि त्वादृशी सखी सुमुखि ।
इति पृच्छन्तीं राज्ञीं प्राह मुदा मन्थरादरान्मन्त्रम् ॥ २४ ॥

[1] *Kalyā* here seems to be in the sense of *dakṣā*. *Kalyā nīrugdakṣasajjāḥ* is the *Vaijayantīkośa*.

वरयुगमधिगतमस्ति त्वदुपकृतात् पत्युरेव देवि तव ।
दैवासुरसंग्रामे दैवान्मम तस्य संस्मृतिर्जाता ॥ २५ ॥

अन्यतरेण तयोर्नवपञ्चसमा व्रजतु काननं रामः ।
राज्यं परिपालयतु प्राज्यं भरतोऽपरेण तेन पितुः ॥ २६ ॥

यावद् वरयुगसिद्धिस्तावत् कोपालयेऽस्तु ते बुद्धिः ।
कृतधीरितरारम्भान् वितथीकुरु देवि जातसंरम्भा ॥ २७ ॥

इत्थं मन्थरयोक्ता वृद्धं विनिरोद्धुमीशमुद्युक्ता ।
जानानापि जनानां पापात् कोपाल्यं तदावाप ॥ २८ ॥

दुःसंसर्गाद् दोषं निःसंशयमेति वा नरो नारी ।
यत् प्रकृतिसुभगशीला सासीदपि दुर्निवारदुःशीला ॥ २९ ॥

मुक्त्वा मूर्धजराजिं त्यक्त्वाभरणानि सा समग्राणि ।
केवलमेव स्थण्डिलमधिशिश्ये केकयेशितुः पुत्री ॥ ३० ॥

मलिनं हि वसाना सा वासो वचनीयवाक् खुरन्नासा[1] ।
मूर्तामर्षवदार्ता तस्थावस्थानमृत्युकावस्था ॥ ३१ ॥

आयाति कदा वा श्वः प्रायाति प्राग्दिशं च सप्ताश्वः ।
रामः स घनश्यामः स्यादभिषिक्तः कदा नु पश्यामः ॥ ३२ ॥

[1] The reading is not clear in the MSS. The expression is probably *khurannāsā*, of which the first part is a present participial form from the root *khur* of *Tudādi*. The form *khuraṇas* is an old one, noted even by Vārttikakāra. See Pāṇini's rule V. 4. 118, and the *Vārttika* thereon: *khurakharābhyāṃ nas vaktavyaḥ*.

इति पुरजनताजनिताः श्रुतिपथमधुराः सुधासमाः स कथाः ।
आकर्ण्य तदा राजा नावैदवधिं मुदामुदारौजाः ॥ ३३ ॥

परराजहरत्तेजाः सुरराजसमानवैभवो राजा ।
पुरि पूर्णमनस्कायां परिपूर्णमनोरथः सुताभ्युदये ॥ ३४ ॥

वत्साहतभार्गवभीरुत्साहत उच्चरन् सुताभ्युदयम् ।
पट्टाभिषेचनप्रतिकुट्टाकक्कृतिं प्रियामियाय पतिः ॥ ३५ ॥

प्राक्तनपापविपाकप्राप्तदुरापोरुदौरवस्थ्यायाः ।
मृत्योरिव कैकेय्याः सदनं प्राप स्वखादनं वदनम् ॥ ३६ ॥

तां तावदपश्यत् तां दुरवस्थां वीक्ष्य दूयमानमनाः ।
समवोचदशोकान्तां कान्तां क्लान्तामपाकृतैकान्ताम् ॥ ३७ ॥

शेषेऽधिगतविशेषे सर्वासु सतीषु सत्कृतासु समम् ।
मुञ्चन्ती मणिमञ्चं किमिति त्वं केवलेऽद्य भूमितले ॥ ३८ ॥

पतितां भूतलपतितां देवीमिव केकयेन्द्रजां देवीम् ।
नवनीरजदृशमवनीडवनीरजसावृतां ममार्ज जवात्[1] ॥ ३९ ॥

सहसा करमाक्षिप्य प्रवयसमीशं प्रभर्त्सयन्ती सा ।
अथ साहसिकालमिति व्याहृत्य व्याजहार याहीति ॥ ४० ॥

मुक्तालंकृतिमुक्तां मुक्तां संलापतः शुचामुक्ताम् ।
मुक्ताश्रुजलां मुक्तामुक्ताचारेण साधुधीर्मुक्ताम् ॥ ४१ ॥

[1] *Javāt* is my surmise. The reading is not clear in the MSS.

इष्टां भूताविष्टामिव तां संक्रामितामिताशिवताम् ।
पुनराह महात्मा तां ब्रूहि निकामं करोमि ते कामम् ॥ ४२ ॥

इत्यभिदधानमथ सासत्यवगत्य प्रियंवदं मनसा ।
भर्तारं प्राह भुवो भर्तारं निर्भया भयावहदृक् ॥ ४३ ॥

वरयुगमदिशस्त्वं मम परममुनैकेन पातु गां भरतः ।
नव पञ्च च वर्षाणि प्रवसतु विपिनेऽन्यतः प्रधानसुतः ॥ ४४ ॥

अथ तद्वचनहलाहलहुतभुक्कीलातिदह्यमानमनाः[1] ।
भूपतिरपतद् भूमौ निःसंज्ञः संज्ञयाह तां भूयः ॥ ४५ ॥

पापे बहुजन्मार्जितपापेन मया करे गृहीतासि ।
गलघटितासिलतासि व्याल्यसि किमनेन कालमृत्युरसि ॥ ४६ ॥

रामं वनवासाय प्राणसमं प्रेषयेति यद् ब्रूषे ।
शतधारहतो गिरिरिव शतधा परिभिद्यतेऽन्तरात्मा मे ॥ ४७ ॥

किमकारि तव नृशंसे तेन विनीतेन दारुणाशंसे ।
किमिति निरागसि रामे समितिंजय [2]एव पापमाचरसि ॥ ४८ ॥

मैत्रेण मयोक्तशुभो मात्रे विनिवेद्य सीतया सार्धम् ।
धृतकौतुकसूत्रः सन् यस्तूपोवास गौरवादेशात् ॥ ४९ ॥

[1] *Kīla* is a synonym of *jvāla*. Amara says *dvayor jvālakīlau.* MS. A reads the half thus:

atha tadvacanaviṣānalamālādandahyamānamānasakaḥ.

[2] The expression *samitiṃjaya* is formed by the rule III. 2. 46, (in the sense of victorious in battle), like *śatruṃjaya.*

तं जनसंमतमधुना संजनयन् वेदनामनाथ इव ।
अनवायासविधायिनि वनवासाय प्रयापयामि कथम् ॥ ५० ॥

रामे वनमुपयाते का मे प्राणेषु कामना दयिते ।
जगदभिरामं रामं न विना वत्स्यामि कालमीषदपि ॥ ५१ ॥

दुष्टे गतवति तस्मिन् भ्रष्टे पुरपूर्वभाग्यसौभाग्ये ।
एकेन त्वं नगरे कैकेयि वसात्मजन्मना नान्यः ॥ ५२ ॥

ऊढासि मया मूढा रूढा मम वाग् यदि त्वयारूढा ।
धर्मः शर्म च शतधा नो चेन्नीचे न चाहमुचितश्रीः ॥ ५३ ॥

दुष्करकार्यचिकीर्षा पुष्करनयनेऽपकीर्तिसूर्लोके ।
क्षत्रियकुलधर्मोऽयं पूर्वजपट्टाभिषेक एकविधः ५४ ॥

वैवस्वतमनुवंशे नैव परो युज्यतेऽभिषेकाय ।
तस्माद् राज्यपदेऽसावस्माभिरयुज्यताग्रजन्मतया ॥ ५५ ॥

इत्थं ब्रुवति महीन्द्रे क्रुद्धा कैकेय्यथाब्रवीद् भूयः ।
अयि पश्यति पास्यामि त्वयि विषमेतत् करोषि चेन्न वचः ॥ ५६ ॥

व्यवहृत्य व्यवसायं स्वीयं वाचा चचाल नेषदपि ।
भूपतिरथ तां भीतो बहुधा संमान्य सान्त्वयामास ॥ ५७ ॥

न क्रौर्यं सा विजहौ वक्राः स्वत एव दुःस्त्रियो लोके ।
कार्याकार्यविवेके मूकं पतिमाह सा ततः सहसा ॥ ५८ ॥

समितिंजय किमिति त्वं वासाय वने न राममादिशसि ।
सत्यव्रतपरिपालनमत्यन्तयशस्करं हि ते राजन् ॥ ५९ ॥

न जहुर्बहुधा सत्यं पूर्वे ते नाथ न श्रुताः किमु ते ।
न ररक्षुरपि प्राणान् विरिरक्षव[1] एव कीर्तिकल्पलताम् ॥ ६० ॥

तूष्णीं तिष्ठसि राजन् किं मूढवदद्य ह्यमग्रसुतम् ।
आनाय्य निकाय्यादिह रामं प्रहिणु प्रभो वनावनये ॥ ६१ ॥

इति निर्लज्जं तस्यां सपदि वदन्त्यां विलज्जितो राजा ।
न शशाक स शोकार्तः किमपि व्यवहर्तुमग्रतस्तस्याः ॥ ६२ ॥

अथ दशरथपत्नीं तां स सुमन्त्रो मन्त्रिसत्तमोऽतिरुषा ।
प्रदहन्निव चक्षुर्भ्यामिदमाह सुतासि मातुरनुरूपा ॥ ६३ ॥

त्वन्माता पतिमवधीदतिनिर्बन्धेन हासहेतुमपि ।
ज्ञात्वा कथने प्राणात्ययहेतुमुदाहरन्तमन्तकवत् ॥ ६४ ॥

इति निर्भर्त्सितयापि प्रतिपेदे नार्द्रता तया तेन ।
प्रकृतिः खलु दुर्लङ्घ्या क्व कृती तस्या निवर्तने जगति ॥ ६५ ॥

न शिलायाः काठिन्यं शशिकरजालानुरञ्जनेऽपि भृशम्[2] ।
आश्रयनाशं हित्वा सा श्रयति विनाशमन्ततः क्वापि ॥ ६६ ॥

सुतमभिषिञ्च क्रूरे न तु राममितो विवासयेत्युक्ता ।
पत्या तदपि निकामं प्रत्याचख्यौ दृढव्रता बत सा ॥ ६७ ॥

[1] *Virirakṣavaḥ* is archaic. The *Worterbüch* notes *rirakṣā* and *rirakṣu* from the *Bhāgavata* (IV. 15. 6 and II. 7. 32). See also note on III. 117.

[2] MS. B reads *-rañjanena hṛtam,* instead of *rañjane 'pi bhṛśam.* We are to construe the line thus: *bhṛśaṃ śaśikarajālānurañjane śilāyā api kāṭhinyaṃ na tiṣṭhati. kiṃ tu apayāti. kiṃ ca sā śilā, āśrayasya candrasya nāśam aniṣpādya, svayam eva adṛśyatām eti.*

राजाह ततो देवीं देवीप्रत्युक्तपूर्वराजनयः ।
आचन्द्रतारकं तव दुष्कीर्तिं प्रापितार्तिराजनयः[1] ॥ ६८ ॥

इत्यवमत्य स पत्नीं सत्यव्रतभङ्गभीरुरत्यार्तः ।
विरराम राममेव ध्यायन् नयनाभिराममभिरामम् ॥ ६९ ॥

अथ केकयराजभुवः प्रेरणया तीव्रया पतिः स भुवः ।
आह सुमन्त्रं मन्त्रिणमाली नेयं परं तु मे व्याली ॥ ७० ॥

राममिहानय सुगुणाराममहो किं ब्रवीमि निर्लज्जः ।
दुस्तरवनवासकथां श्वस्तनमभिषेकमुक्तवान् योऽहम् ॥ ७१ ॥

इत्यभिधाय स राजा सत्यव्रतभीतधीर्मुमूर्च्छ ततः ।
स सुमन्त्रसमानीतो रामः पितरं ददर्श राजानम् ॥ ७२ ॥

चरणावभिवन्द्य पितुर्मातुश्च किमेवमेतदस्थाने ।
[2]कश्मलमिति पृष्टा परमश्मलसच्चित्तवृत्तिका साह ॥ ७३ ॥

राम पिता तव मह्यं वरयुगमदिशत् पुरा प्रमुह्य परम् ।
तव वनवसनं राज्ये भरतस्य स्थापनं हि तेऽद्य वृते ॥ ७४ ॥

ते निर्वोढुमशक्तः शक्तस्त्वमसीति भीतहृत् त्वत्तः ।
कश्मलमाप ततस्त्वं मोचय तदसत्यतः परं पितरम्[3] ॥ ७५ ॥

[1] The line is to be construed as *ittham, prāpitā ārtiḥ yayā sā= prāpitārtiḥ satī, ācandratārakaṃ tavaiva duṣkīrtim ājanayaḥ* (*ā*+*ajanayaḥ*).

[2] Amara says *mūrcchā tu kaśmalaṃ mohaḥ*.

[3] MS. A reads the last quarter as: *mocaya pitaraṃ na vetsi kiṃ tattvam*

वल्कलमेव वसानो वन्यं चाहारमेव भुञ्जानः ।
रामारम्यपदव्यां नव पञ्च समाः समापयाटव्याम् ॥ ७६ ॥

अनुजस्तव भरतो भुवमनुभवतु भवत्पुरप्रवेशान्तम् ।
मोचय पितरमसत्याद् वाचय निखिलैर्निजं यशोऽशान्तम् ॥ ७७ ॥

अस्त्रसमामपि वाचं निस्त्रपमुक्त्वा स्थितां स तामाह ।
सस्मितमस्मि तथाहं भरतश्च तथास्तु राज्यभोगरतः ॥ ७८ ॥

अन्यानुरोधरहिता वन्या वृत्तिर्ममार्पिता धन्या ।
दुर्भरराज्यभरो यद् भरताय तदस्ति मय्यतीव कृपा ॥ ७९ ॥

मुह्यति किमयं राजा मह्यमनावेद्य दुर्मनास्तदिदम् ।
पितुरतिसुकरं कार्यं न तु तनुते यः कुतः सुतः स स्यात् ॥ ८० ॥

सुलभासुलभविचारो न भवतु भवदीप्सितं हि मे भाव्यम्[1] ।
आज्ञा राज्ञः पूज्यावज्ञा विज्ञायतां न हि क्वापि ॥ ८१ ॥

हेतुं वनवसतेर्मे मातुर्विज्ञापयामि यावदहम् ।
मातस्तावदुपेक्ष्यो नातः परमुत्सहे क्षणं स्थातुम् ॥ ८२ ॥

बद्धाञ्जलिरथ रामस्तद्धाम विहाय कैकयीकलुषम् ।
सदनं कौसल्यायाः सदनन्तगुणः समाससाद तदा ॥ ८३ ॥

जननीमभिमतसंपज्जननीमभिवन्द्य पादपङ्कजयोः ।
निजवनवासविधानं निजगाद जगत्पतिप्रियाधीनम्[2] ॥ ८४ ॥

[1] MS. A reads the first quarter as *sulabhāsulabhavibhāgo*, and the reading of the second quarter in MS.B is *bhavadīpsitena me bhāvyam*.

[2] *jagatpatipriyā* here stands for Kaikeyī, and the expression thus means *kaikeyyadhīnam*.

दुःश्रवसुतवनवासाभिश्रवणविदीर्णकर्णमूला सा ।
निपपात नदीरयतः सपदीव तटी कठोरदुःखार्ता ॥ ८५ ॥

सा चिरमेव विसंज्ञा संज्ञां समवाप्य निष्पतद्बाष्पा ।
इदमाह महादेवी पदमार्तिमहोदधौ दधाना सा ॥ ८६ ॥

कथमाह महाराजो राजोपमकीर्तिरात्मजन्मार्तिम् ।
निश्चेष्टितमकरोत् तं[1] दुश्चेष्टितमद्य किं नु कैकेय्याः ॥ ८७ ॥

कथय कथं जीवेयं नयविनययुजा त्वया विना केयम् ।
तनुमतनुशुचा हेयां[2] विषमविषहतापहं न किं हेयम् ॥ ८८ ॥

आहेयविषप्रायं दुःसहदुःखं कथं सहेयाहम् ।
राम महाबाहो मां वनमनुनय पावनं त्वयैव समम् ॥ ८९ ॥

अस्तु परस्यैव श्रीर्वस्तुं वसतौ तु युज्यते न कथम् ।
अहह विधिर्विपरीतः किमु मम शरणं कथं विपत्तरणम् ॥ ९० ॥

भवता न कदाप्यागः सुवता[3] शुभमेव निर्मितं तस्यै ।
दोषस्तु ममैवैष त्वामपि पस्पर्श मन्दभाग्यायाः ॥ ९१ ॥

[1] It seems to be construed thus *Kaikeyyāḥ duśceṣṭitam adya taṃ mahārājaṃ niśceṣṭitam akarot.*

[2] MSS. seem to read here also *heyam.* Perhaps it is *heyām* (*liṅ*) of the root *O hāk=tyāge,* in the sense of *tyajeyam. Viṣa* mentioned in the next line seems to be intended as an *upamāna* for the *tanu.*

[3] *suvatā* is present participle from the root *ṣu* of Adādi. *Āgaḥ kadāpi na suvatā bhavatā* is the construction.

समुदाजहार किमिति प्रमुदा पट्टाभिषेचनं राजा ।
नासौ यदि संनाहः सा[1] सौति न ते महावने वासम् ॥ ९२ ॥

कृच्छ्रेण त्वयि लब्धे सच्छ्रेयसि राम विप्रलब्धेऽलम् ।
गुणवत्यपि न स्थातुं क्षणमपि[2] चैवाहमुत्सहे गेहे ॥ ९३ ॥

किमहं पापमकरवं जन्मनि पूर्वत्र पुत्रजन्म मम ।
यत्कष्टाधिष्ठानं दिष्ट्या समजायतायताक्ष हरे ॥ ९४ ॥

न त्वं यदि जायेथा जायेतेयं मनोव्यथा न हि मे ।
या स्यादनपत्यत्वे सास्याः [3]कलिकापि नो सहस्रतमी ॥ ९५ ॥

जनयति मम दुरदृष्टं तव वनवासं तदुत्कटं कष्टम् ।
[4]तस्या एव न जातो न स्यादापत्परंपरा सेयम् ॥ ९६ ॥

इति कौसल्यापरिमितविलपितमाकर्ण्य लक्ष्मणः क्रुद्धः ।
इदमाह तदा पूज्यं पित्रा ननु दत्तमेव ते राज्यम् ॥ ९७ ॥

तिष्ठति तव पुरतो मयि कः प्रतिबन्धः प्रजायते परतः ।
अभिषेचय स्वयं स्वं न भियोऽवसरः प्रसीद मे वचसि ॥ ९८ ॥

[1] *sā* refers to Kaikeyī. *sauti* is from the root *ṣu* of Adādi, and conveys the meaning of *janayati* (*sā vanavāsaṃ na sauti=na janayati*).

[2] MSS. seem to read *naivāham*, etc. As *na* is already mentioned, perhaps it should be *caivāham*.

[3] *kalikā* is a derivative from *kalā*, with *alpārthe kaḥ*.

[4] I think the line is to be construed thus:

tasyāḥ kaikeyyā eva kuto na jātas tvam, yena iyam āpatparaṃparā na jātā bhavet.

पश्यन्त्वद्य पुमांसोऽवश्यं कोदण्डचण्डिमानं मे ।
यः प्रतिवक्तार्थेऽस्मिन् स प्रतिपद्येत नैव जीवदशाम् ॥ ९९ ॥

त्वद्राज्यप्रतिबन्धकमुद्रावयितुं धनुर्धृतं हि मया ।
न स्त्री न पुमान् वापि स्वःस्त्रीस्वस्त्यास्पदं प्रतीपकृतिः ॥ १०० ॥

भरतं भरतसुवं[1] वा निरतं तव राज्यलाभनिर्बन्धे ।
नियतं नियमितभाषितमारात् कारागृहं नयामि विभो ॥ १०१ ॥

अतिपरुषरुषं लक्ष्मणमिति पौरुषसंश्रितं [2]मुदानुनयन् ।
न तु शासनमुल्लङ्घ्यं पितुरिति जननीमनीनयत् प्रकृतिम् ॥ १०२ ॥

कथमपि कथितानुमतिं मातरमथ सप्रदक्षिणं प्रणतः ।
सीतागारमगादवगीतामरराजगेहिनीगेहम् ॥ १०३ ॥

तत्र विचित्रास्तरणादुत्थाय सखी सखीभिरिन्दुमुखी ।
बद्धाञ्जलिरवतस्थे पत्युः पदपद्मपीडितापीडा ॥ १०४ ॥

अमृतायमानवीक्षणरक्षणपात्रीकृतत्रिलोकी सा ।
स्वानर्थमजानाना स्मयमाना नाथमब्रवीदित्थम् ॥ १०५ ॥

श्रीमन् मनुजाधीशः श्रीमन्तं स्वान्तिकं सुमन्त्रेण ।
अनयत कौतुकनियतं[3] जनयति तत् कौतुकं मम श्रोतुम् ॥ १०६ ॥

[1] *Bharatasuvam* means *Bharatamātaram*=*Kaikeyīm*.

[2] MS. A reads *pauruṣavādinam*.

[3] Of the several meanings of the word *kautuka*, the sense of *hastasūtra* or *maṅgala* may be applicable here. In the sense of *hastasūtra*, the expression *kautukaniyatam* may be a *bahuvrīhi* meaning

विनिशम्य वचस्तस्या मुनिवत् तूष्णीमवस्थिते तस्मिन् ।
सीता भीता पुनरपि भक्त्या भर्तारमब्रवीदित्थम् ॥ १०७ ॥

किमिति महाबाहो न स्फुरति यथापूर्वमाननेन्दुस्ते ।
श्वोभाविन्यभिषेके शोभातीव श्रितश्रियां भवति ॥ १०८ ॥

न मयाचरितं किमपि प्रतिकूलं ते कदापि भूमिपते ।
किमिति न लालयसे मां न च वदनमवेक्षसे च वक्षि वचः ॥ १०९ ॥

लज्जित इव ललनाया यज्जितशत्रोऽसि मेऽद्य तद् ब्रूहि ।
अभयप्रदानदक्षिण न भयं कुरु मे प्रसीद भो स्वामिन् ॥ ११० ॥

बद्धानुरक्तिभक्तिकमिद्धालापां स तां सतीं सीताम् ।
आहारण्यनिवासं [1]नाहार्यमनार्यया कृतं स्वस्य ॥ १११ ॥

तादृशि नियतिनियोगे कः प्रतिकुर्वीत सुभ्रु संप्रति मे ।
नव पञ्च च वर्षाणि त्वमिह स्थित्वातिवाहयैष्यामि ॥ ११२ ॥

baddhakaṅkaṇam. The Kaṅkaṇabandha ceremony must have been performed the previous day. Though the author does not describe it in the poem, this religious rite is known in the story. The *paranipāta* of *niyata* may be explained by *vā āhitāgnyādiṣu*. Or, if the sense is *maṅgala*, the expression may mean *maṅgala-niyatam* (also *bahuvrīhi*), conveying the idea that the auspicious event of his coronation was decided before.

[1] The meaning of *nāhāryam* is not clear. *Āhārya* is noted in the lexicons in the sense of *anna*. Perhaps the expression is intended in the sense of *annābhāva*, as Rāma was asked by Kaikeyī to take only the produce of the forest, and not the usual food he was accustomed to take.

Or, it may be in the sense of *avāraṇīyam*, the expression being *na* + *āhāryam*, where *āhārya* is simply in the sense of *hāryam*= *vāryam*. *Niyatyā* may be supplied to construe with *anāryayā*.

इति परमपरुषमीरितमतिमात्ररुजावहं निजश्रवसोः ।
भर्तुर्वाक्यं श्रुत्वा भयरहिता सा सहस्थितिं चकमे ॥ ११३ ॥

शतधा परिहारोक्तौ न तथा चक्रे धरासुता धीरा ।
कृतधीरपि को दैवं वितथीकुरुते विनिश्चितार्थेषु ॥ ११४ ॥

पुनरपि रामस्तस्यै जनयन् वनवासजं भयं बहुधा ।
आह न जानीषे त्वं जानकि जडता हि सुभ्रुवां सुभ्रु ॥ ११५ ॥

नय मामनुयामीति प्रियवचने वक्षि किं प्रिये वच्मि ।
तत्र बहुप्रतिबन्धा वित्रसनपदे वने ससंबन्धाः ॥ ११६ ॥

सिंहव्याघ्रवराहा रंहःकृत्तेभमार्गसन्मार्गाः ।
[1]अरिरक्षुतरक्षुचरत्करिकालसरीसृपालिपालिरपि ॥ ११७ ॥

निम्नोन्नतपन्थानः [2]पाथपाषाणकण्टकाकीर्णाः ।
कर्णारुंतुदनिनदा न नदाः कस्मै भयं प्रयच्छन्ति ॥ ११८ ॥

[3]तर्षानुपलम्भपदे वर्षातपवातवीतसौख्यपदे ।
अपि भैरवफेरववति[4] विपिने कार्तस्ववार्तवार्तापि ॥ ११९ ॥

तस्मादस्माकमिदं वाक्यं शृणु शक्यमत्र ते वस्तुम् ।
इति वदति मनोनाथे पुनरपि पतिमाह सा सती सुदती ॥ १२० ॥

[1] See note on verse 60 of III Sarga.

[2] *pāthas* means *jalam*.

[3] The meaning of the expression is not clear. Perhaps it is intended in the sense of *tarṣe* (*sati*) *anupalambhaḥ* (*jalasya*), *tasya pade*.

[4] The meaning of *pherava* is *sṛgāla*.

जाने तव महिमानं नानेन बिभेमि राम ते वचसा ।
लीलाजितजगतीपतिरभवद् भवदीयदोर्बलाद् विजितः ॥ १२१ ॥

ससुरासुरयक्षोरगकिंनरकिंपुरुषवेष्टिते जगति ।
त्वद्दोर्मण्डलगुप्तां नालं के वापि मां प्रधर्षयितुम् ॥ १२२ ॥

शोषणमथ वा पोषणमनुभवितुर्दुःखतोऽथवा सुखतः ।
सर्वस्य शरीरस्य प्रभवति नार्धस्य तस्य कस्यापि ॥ १२३ ॥

तस्मादर्धशरीरं कस्मात्त्यजसे न पावनं हि वनम् ।
श्रुतिराह न किं जायामेवंरूपां कृपानिधे नय माम्[1] ॥ १२४ ॥

अथ दुर्वारविनिर्णयकथनात् तां देवतामिवाभीष्टाम् ।
अनुजग्राह तदानीमनुजोऽपि पफाण लक्ष्मणः प्रणतः ॥ १२५ ॥

श्रीमन् राम शरण्य स्वामिन् सह याम्यहं त्वयारण्यम् ।
अस्मि विहाय भवन्तं सुस्मित न कदापि सर्वदावन्तम् ॥ १२६ ॥

श्रद्धाभक्तिसमन्वितमित्थं बद्धाञ्जलिं ब्रुवन्तं तम् ।
अनिवार्यसहावस्थं वनमनुमेनेऽनुनेतुमथ नेता ॥ १२७ ॥

सोऽपि स्वीयजनन्यै विज्ञापयितुं विसर्जितो वीरः ।
मातुश्चरणौ नत्वा भ्रातुर्वनवासमब्रवीन्नेतुः ॥ १२८ ॥

श्रुत्वा सापि सुमित्रा वित्रस्तातीव दुःखिता तत्र ।
केकयराजकुमारीं केवलमाजीगणत् कुले मारीम्[2] ॥ १२९ ॥

[1] MS. A reads *kuru tām*.

[2] *māri* is noted as *sarvalokatate mṛtyau māriḥ, strī*. It is translated in modern dictionaries as 'plague' or 'epidemic'.

सा तनुभवभावज्ञा रामप्रेमानुभावभावज्ञा ।
अविहितविहितावज्ञा विहितानुज्ञा सुतं जगाद ज्ञा ॥ १३० ॥

रामं विद्धि दशरथं सीतां मामेव विद्धि हे वत्स ।
अटवीमेवायोध्यां विद्धि यथासौख्यमच्छधीर्गच्छ ॥ १३१ ॥

इति निजमात्रादिष्टो मतिमानथ लक्ष्मणः शुभादृष्टः ।
श्रीरामाय निरामयगीरात्मानं निवेदयांचक्रे ॥ १३२ ॥

सीतालक्ष्मणसहितः प्रीतात्मा राघवस्तदा महितः ।
स यथापूर्वमुखश्रीर्जयधामालोकि चित्रितैर्लोकैः ॥ १३३ ॥

केकयराजकुमारीशोकनिमित्तेन सर्वलोकस्य ।
संमदमधुना धुन्वन् किं मुदमश्नात्यहो जरद्राजा ॥ १३४ ॥

किमकारि महापापं सममस्माभिः पुरा खलैरखिलैः ।
यन्नः पातेव पिता नुन्नः प्रतियाति पावनं हि वनम् ॥ १३५ ॥

वयमपि वनमेवेमो नयनिधिमपहाय नात्र वत्स्यामः ।
प्रष्ठः स न एवालं तिष्ठतु हृदयोमयीह कैकेयी ॥ १३६ ॥

गिरः पुरनिवासिनामिति परः पुमान् राघवः
प्रतिश्रुतमपोह्यते कथमिति व्रती पालयन् ।
जगाम जगतीपतेः पितुरुपात्तसीतासती-
निजानुजनियुक्तये निलयमार्तिमालालयम्[1] ॥ १३७ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये तृतीयः सर्गः

[1] The metre of this verse is *pṛthvī*.

चतुर्थः सर्गः

प्रणिपत्य पितुः पदयोः प्राह स रामः प्रदक्षिणं कृत्वा ।
अनुजानीहि महात्मन्ननुजन्मानं च लक्ष्मणं सीताम् ॥ १ ॥

अथ नरनाथः साश्रुः प्रथमं तनयं तथा तदाश्लिष्य ।
त्रिभुवनजयलक्ष्मीमिव सीतामुत्सङ्गमानिनाय निजम् ॥ २ ॥

अवनाय समानीता न वनाय विनीयतामियं सीता ।
जनकः किं बहु मनुते कनकक्षितिभृन्महीभृतां ननु ते ॥ ३ ॥

इति नरनाथो बहुधा विलपन् न शशाक भाषितुं किमपि ।
सा तु तटस्था केकयदुहिता यातेति निस्त्रपावादीत् ॥ ४ ॥

अश्मसमानमनस्का क्लिश्नातीयं पिशाचिकेवास्मान् ।
अश्नातु पुरमशेषं प्रश्नानवकाशमञ्जसा वक्ति ॥ ५ ॥

याहि सुमन्त्र समानय मामकरथमद्य रामभद्राय ।
अहमपि वनमवगाहे सह वत्स्यामीह नानया गेहे ॥ ६ ॥

इति नरपतिशासनतः स रथं संनद्धमानयद्विनतः ।
रामाय तथाकथयत् केकयराजात्मजापि चीराणि ॥ ७ ॥

रामस्तानि गृहीत्वा हित्वा व्यसनेन हा समं वसने ।
अनुजेन समं स दधौ मनुजेषु रुदत्सु सर्वतः सत्सु ॥ ८ ॥

चक्रन्द नृपस्त्रीणां चक्रं दधति[1] स्म राघवे चीरम् ।
वल्कातिसर्जनोदितकल्का[2] सैकैव निष्कृपेवोल्का ॥ ९ ॥

सपदि दिदापयिषन्त्यां सीतायै चापि वल्कलं तस्याम् ।
अरुणत् करुणाजलनिधिराचार्यस्तां निवारयन् वाचा ॥ १० ॥

न हि वृतमेतदसत्या महिततया याति सा वनं पत्या ।
सर्वालंकृतिसहिता पर्वाब्जमुखी[3] यथासुखं यातु ॥ ११ ॥

सशरावथ तूणीरौ कवचे धनुषी च शत्रुधैर्यमुषी ।
निशिते चासिलते पटुपुटकखनित्रे च तावथाधाताम् ॥ १२ ॥

ताभ्यां पुरतः सीता रथमधिगत्याधिकं बभौ प्रीता ।
छायेवोदयमद्रिं छायाभर्तुः पुरः स्वसूताभ्याम् ॥ १३ ॥

रथमारुरुहतुरथ तौ प्रथमानपराक्रमौ प्रणम्य पितुः ।
प्रादुरभावि तदानीं मेदुरवर्षर्तुरश्रुभिः सुहृशाम् ॥ १४ ॥

राजा श्रीजानिमिव स्वदृशा न शशाक पातुमात्मसुतम् ।
निषण्णबाष्पनयनो निस्पन्दं निष्पपात निःसंज्ञः ॥ १५ ॥

[1] The expressions in the context mean *rāme cīraṃ dadhati*= *dhārayati sati*; *sma* may be a *pādapūraṇa*. Or *dadhati sma* may be in the sense of *dhṛtavati sati*. See Apte's Dict. under *sma*.

[2] Amara has *kalko 'strī śamalainasoḥ*. Here it seems to be in the sense of *enas*; this adjective, *sā ekā* and *niṣkṛpā* refer to Kaikeyī, meaning 'Only Kaikeyī was merciless when the *valkala* or bark garment was being given to Rāma, which in fact spoke out, as it were, the great sin of Kaikeyī.'

[3] *parvābja* is in the sense of *parvendu*. Amara says: *abjo jaivātṛkaḥ somaḥ*.

दुःसहदुःखसमुद्रे निममज्ज न सज्जनस्य कस्य मनः ।
नयनोदकधाराभिर्धीराभिस्तत्र कस्य नास्यमपि ॥ १६ ॥

केकयराजकुमारीगर्हणमापन्निबर्हणं मन्त्रम् ।
तत्र जजाप न को वा कुत्र कृतापत् प्रशस्यते जगति ॥ १७ ॥

बहुशः सन्ति सदोषा योषा रोषैकप्रकृतिकर्कशाः ।
न क्वाप्येतादृगियं पक्वासत्पुण्यतो नृपस्य वधूः ॥ १८ ॥

इति निन्दन्तः केकयतनयामनयानुवर्तितां च विभोः ।
रामं रथमारूढं पौराः परिवव्रुरंशवोऽर्कमिव ॥ १९ ॥

अनुजग्मुरथाबालं मनुजा रामे रथेन याति सति ।
पौराः पृथ्वीपरिवृढमपहाय मुहुर्गुणा हि मान्यतमाः ॥ २० ॥

निखिलापि तदा नगरी रामं रामानुजन्मना सहितम् ।
इतरानभिभूय बलान्नितरां निर्गन्तुमेव सोत्कासीत् ॥ २१ ॥

वत्सा अपि कैकेय्याः कुत्सायामेव मेदुरोत्साहाः ।
प्रत्यासन्नेऽप्यन्ने प्रत्यासत्तिं न चक्रुरप्रीत्या ॥ २२ ॥

प्रवसति रामे नगरान्नगराड्धीरेऽनुजस्वजायाभ्याम् ।
न पयः पपुरपि वत्सा वत्सानपि नैव गाव आलिलिहुः ॥ २३ ॥

राजापि रुजाक्रान्तः श्रीरामदिदृक्षया विनिष्क्रान्तः ।
यावत् स्वदृशोरयने तावदवेक्ष्य न्यमीलयन्नयने ॥ २४ ॥

गरुडध्वजकरुणाया अरुणदविज्ञानमात्मविज्ञानम् ।
अथ स धनी तामसतीमपहायावाप कोसलेन्द्रसुताम् ॥ २५ ॥

निर्भरपुत्रप्रेम्णा दुर्भरदुःखार्तचित्तयापि तया ।
विहिताचारमनोहरमहिताचरितोऽप्यपूज्यतात्मवरः ॥ २६ ॥

सुतविरहसवैकल्या पतिमतिभक्त्या पुपोष कौसल्या ।
पतिरिति परमं दैवं जगति सतीनामुपात्तनीतीनाम् ॥ २७ ॥

अत्युत्कटदुःखार्ता पत्युः पदयोः पपात निर्वार्ता ।
भीतो भूपतिरथ तां मथितामिव पद्मिनीमुवाच हिताम् ॥ २८ ॥

देवि कृतस्य फलं कः शक्तः परिहर्तुमन्यथाकर्तुम् ।
जनितब्राह्मणशापं पापं क्लृप्तारवं पुराकरवम् ॥ २९ ॥

अधिवनमटता खेटकमश्रावि मयातिदूरगः शब्दः ।
बृंहितबुद्ध्या तस्मिन् मुक्तस्तोयेषु शब्दभेदीषुः ॥ ३० ॥

निहतस्तेन हतोऽस्मीत्यवदच्छ्रुत्वा तदीयमारावम् ।
समधावमथाहं तं हन्त सभीः कोऽयमित्यभिज्ञातुम् ॥ ३१ ॥

ब्रह्मन् ब्राह्मणहत्या धिगकारि मयास्मि दुर्भगो मूढः ।
इति मामतिगर्हन्तं स दयालुः प्राह संप्रतीत्याज्ञम् ॥ ३२ ॥

न ब्राह्मणहत्या ते यदहं न ब्राह्मणोऽस्मि राजर्षे ।
कालो मम संप्राप्तः किं कुरुषे त्वं रुषा च किं कार्यम् ॥ ३३ ॥

तद्धर शरमुरसो मे रुद्धं न प्राणधारणे शक्तः ।
पानीयमिदं तु परं पित्रोर्जरदन्धयोरुपानय मे ॥ ३४ ॥

इति मामादिश्य पुमानतिलोक इयाय देवतालोकम् ।
अहमपि धृत्वा तज्जलमदिशं तस्यान्धवृद्धयोः पित्रोः ॥ ३५ ॥

स तु मयि सुतबुद्ध्याह क चिरयसि सुतेति मामुपात्तपयाः ।
अहमपि भीतस्तस्मात् तत्त्वमथाख्यातवान् स चापि रुषा ॥ ३६ ॥

अहमिव सुतशोकात् त्वं यास्यसि लोकान्तरं नृपालेति ।
शप्त्वा मां तनुमजहद् वेगेन सहान्धया महायोगी ॥ ३७ ॥

अनपत्यस्य ममासीत् तन्मुनिशापस्तदा मुदे मुग्धे ।
अनुभवकालस्तस्य क नु भवति वृथा मुनीशितुः शापः ॥ ३८ ॥

न वसामि चिरं तस्मादवसानगतोऽहमङ्गने सत्यम् ।
रामं रविकुलसोमं पश्यामि पुनः कथं न नश्यामि ॥ ३९ ॥

श्लिष्यामि कदा रामं हृष्यामि निरीक्ष्य नीरजाताक्षम् ।
पुष्यामि कदा मुदमपनेष्यामि विपत्परंपरापत्तिम् ॥ ४० ॥

इत्थमनुक्षणमात्मजबद्धप्रेमप्ररूढशोकार्तम् ।
कोसलराजकुमारी कौशलमुपजीवयांचकार तदा ॥ ४१ ॥

सीतालक्ष्मणसहितः स हि तथ्यवचस्कमादधत् पितरम् ।
रामो रथमारूढो मारूढ[1] इव श्रियोज्ज्वलन् प्रययौ ॥ ४२ ॥

स्वकुलं कुलकलहेन [2]व्याकुलमविराकलय्य लीनांशुः ।
अस्तं गतवति तस्मिन् शस्तं तरुमूलमाश्रयद् रामः ॥ ४३ ॥

सहसा पौरजनालिः सह सा तेनानुयातचेतस्का ।
तत्तत्तरुमूलतलायत्ततयातीव निद्रिताधिनिशम् ॥ ४४ ॥

[1] *Mārūḍha* seems to be in the sense of Viṣṇu.
[2] *Avi* here means *sūrya*. Amara says: *avayaḥ śailameṣārkāḥ*.

रघुनाथोऽथ निशीथे लघुना रथवर्त्मना यियासुः सन् ।
वञ्चितपौरजनालिः संचितमिव तादृगारुरोह रथम् ॥ ४५ ॥

तस्मिन् गतवति रामे कस्मिन्नपि विश्रमं विना देशे ।
निद्रावशमुपयातो नाद्राक्षीत् कोऽपि तत्र पौरेषु ॥ ४६ ॥

उत्थाय प्रातरमी बद्धालापाः परस्परं पौराः ।
रामः केति नवाब्दश्यामः स्मो वञ्चिता वयं तेन ॥ ४७ ॥

इति निश्चित्य तमीशं प्रतिपदमनुयातुमक्षमाः पथि ते ।
विनिवृत्य हृदा केवलमनिवृत्ता एव पत्तनं विविशुः ॥ ४८ ॥

रामो रथमास्थाय प्रायादायासमन्तरा दूरम् ।
सायं संध्यासमयेऽवरुरोह तथा तटेऽभ्रगङ्गायाः ॥ ४९ ॥

विमले गङ्गासलिले संध्यामन्वास्य पश्चिमां रामः ।
लक्ष्मणकल्पितपर्णास्तरणं तरुमूलमाप भूसुतया ॥ ५० ॥

श्रुत्वा रामागमनं कृत्वा सर्वोपधा गुहः पुरतः ।
आगतमन्तिकमेत्य स्वागतमवदत् पदाब्जयोः प्रणतः ॥ ५१ ॥

दासोऽहमधीशस्त्वं वासोऽत्र विधीयतामयि स्वामिन् ।
किंकरकरुणां कुरु मयि किं करवाणि प्रियं प्रभो ब्रूहि ॥ ५२ ॥

निष्कण्टकमेतन्मे राज्यं रामानुगृह्य राजा सन् ।
नः शाधि महाबाहो पश्यामितविक्रमान् मम ज्ञातीन् ॥ ५३ ॥

ज्ञातिभिरुद्यतहेतिभिरयमहमिच्छामि राम ते सततम् ।
दास्यं कर्तुमतस्त्वं पूरय कामं प्रसीद मे दयया ॥ ५४ ॥

धन्योऽहं कृतकृत्यः श्रीराम तवाङ्घ्रिपद्मवन्दनतः ।
गृह्णीष्वामूरुपधा मामनुगृह्णीष्व दासमेवमव ॥ ५५ ॥

प्रार्थयमानं बहुधा सार्थकजन्मानमीश आह गुहम् ।
मा हर मामकनियमं नाहमिहाद्मि व्रती सखे किमपि ॥ ५६ ॥

नव पञ्च च वर्षाणि स्थित्वाधिवनं विधाय राजाज्ञाम् ।
अत ऊर्ध्वमिहागत्य त्वां गुह कुर्यां समाहितं सुहितम् ॥ ५७ ॥

सप्रश्रयमाश्रयता न गुहेन मनोरथः परं जगृहे ।
न व्रतमाश्रितमार्यास्तीव्रमनःखेद्यपि त्यजन्ति जनाः ॥ ५८ ॥

गुह महदसि मम मित्रं मयि तव भावस्तनोति मे चित्रम् ।
इति तं प्रेम्णालिङ्ग्य प्रतिपन्नधियं दयानिधिश्चक्रे ॥ ५९ ॥

अथ पर्णमयीं शय्यां रामे संश्रित्य सीतया सार्धम् ।
निद्राणे निर्णिद्रं गुहसौमित्री गुरूदितव्यसनौ ॥ ६० ॥

अहह विधिर्विपरीतः श्रीरामः सार्वभौम एष क्व ।
क्व च पर्णमयी शय्या क्वेयं च शिरीषकोमलाङ्गीति ॥ ६१ ॥

कुङ्कुमपङ्किलतनुरिव कान्ता कौसुम्भवाससा वीता ।
ऐन्द्री हरिदथ रागात् तन्द्रीमुत्सारयांचकार स्यात् ॥ ६२ ॥

दाशरथिरथोत्थाय श्रीशरणं प्रातराह्निकं कृत्वा ।
विनिवर्तितसूतः सन् मुनिवद्विदधार धीरधीः स जटाम् ॥ ६३ ॥

सख्यानीतां नावं सख्याप्यनुजन्मना समं रामः ।
अध्यारूढो गङ्गां बुद्ध्या योगीव संसृतिं व्यतरत् ॥ ६४ ॥

रामः स्वारूढमनोगुहमपि गुहमत्यजत् प्रयत्नेन ।
आसायमतो गत्वा वासाय वनस्पतिं ययौ कमपि ॥ ६५ ॥

स मुनिशरण्येऽरण्ये समुपनतं साधु वन्यमाहारम् ।
अभ्यवजह्रे विधिवत् सभ्यतमः सीतया समं रामः ॥ ६६ ॥

नीत्वा तत्र निशां तां शान्तात्मा प्रातरुत्थितो रामः ।
सीतालक्ष्मणसहितः स हि तत्र तपोवनायनेन ययौ ॥ ६७ ॥

अथ ते वनतो वनमनुगतवन्तस्तीर्णतत्तदम्बुझराः ।
तस्य भरद्वाजस्य प्रश्रितजनकीर्णमाश्रमं विविशुः ॥ ६८ ॥

तपसां निधये तस्मै नृपचक्रशिरोमणिर्नमस्कृत्य ।
विरचितकुशलप्रश्नात् तस्मात् समवाप मेध्यमातिथ्यम् ॥ ६९ ॥

स चतुर्दशवर्षमितं वचनात् पितुरागतं वनीवासम् ।
निजगाद तपोनिधये निजवासार्हं वनं च पप्रच्छ ॥ ७० ॥

कर्शितपापेन सता दर्शितवरवर्त्मना तदन्तसदा[1] ।
साकं तदनुज्ञातो नाकं सुकृतीव चित्रकूटमगात् ॥ ७१ ॥

चित्रतरे तत्र गिरौ पत्रफलप्रसवभारचित्रतरौ ।
कुत्रचिदुचिते देशे पत्रनिकाय्यं विनिर्ममेऽनुजनिः ॥ ७२ ॥

नानाविधमृगयूथे नानाविधपत्रिकूजितैर्मधुरे ।
पुष्करफलमूलयुते[2] पुष्करदृक् तत्र सीतया रेमे ॥ ७३ ॥

[1] *Tadantasadā* is in the sense of *tadantevāsinā*. See *Kirātārjunīya*: *tam upāsate gurum ivāntasadaḥ* (VI. 34).

[2] The first *puṣkara* means *jala* (i.e. *jalaphalayute*), and the second is in the sense of *nalina* (i.e. *nalinākṣa*).

सीतालक्ष्मणसहितः प्रीतात्मा तत्र चित्रकूटाद्रौ ।
कलकोकिलकूजितकलकलरवकुलकूजिते[1] सुखं तस्थौ ॥ ७४ ॥

अनुजावनिजाताभ्यां मनुकुलकेतौ वनं गते पद्भ्याम् ।
तातस्तद्विरहरुजा यातस्त्रिदिवं महारथो राजा ॥ ७५ ॥

अवरोधवधूजनताजनितारवरोधमूर्च्छिते नगरे ।
आगत्य सहामात्यैरुपसान्त्व्य निनाय शान्तिमाचार्यः ॥ ७६ ॥

राज्ञस्तस्य शरीरं प्राज्ञः प्रक्षिप्य तैलपूर्णायाम् ।
द्रोण्यां द्रुहिणतनूजः क्षोण्याः स्वयमेव शासिता[2] जातः ॥ ७७ ॥

त्वरिता भरतानयनं कुरुतेति गुरुः कुलस्य निर्दिश्य ।
दूताननतिलघुयातान् सद्यो विससर्ज केकयेन्द्रपुरीम् ॥ ७८ ॥

अथ ते त्वरितं गत्वा दृष्ट्वा दुःस्वप्नदूयमानहृदम् ।
भरतं स्वजनक्षेमे निरतं निरयापयन् गिरैव गुरोः ॥ ७९ ॥

सहसा तैः सह दूतैर्भरतः शत्रुघ्नसंयुतोऽविघ्नम् ।
नगरीं शरवेगेन प्राविशदविशच्च मन्दिरं स्वपितुः ॥ ८० ॥

तत्रादृष्ट्वा पितरं तत्रास मनस्विशेखरो मनसि ।
मातरमथ सोऽपृच्छत् पितरं ब्रूहीति पादयोः प्रणतः ॥ ८१ ॥

[1] *kalakalaravakula* is *pakṣikula*.

[2] In the *V.R.*, Vasiṣṭha was requested by all to appoint a successor immediately, and he sent word to Bharata (See *V.R.*, Ayodhyā, canto 67, vv. 4 and 38, and canto 68). The author here seems to mean that Vasiṣṭha himself took care of the kingdom till the return of Bharata from his uncle's palace.

साथ सुतं प्राहैतद् राज्यं वत्स प्रदापितं तुभ्यम् ।
अवनाय पितुर्वचसः स वनाय जगाम सीतया रामः ॥ ८२ ॥

तद्विरहानलतापादुद्विग्नमनास्तनुं जहौ तातः ।
उपभुङ्क्ष्व महाराज्यं नृपनन्दन नन्दयन् प्रजाः प्राज्यम् ॥ ८३ ॥

इति मात्रोदितवाक्यादतिमात्रमनोऽन्यथानिधिर्गतधीः ।
सपदि मुमूर्च्छ पतित्वा विपदुदधेः प्लावितश्चिराद् बुबुधे ॥ ८४ ॥

अथ मातरमग्रे तामधमां निश्चित्य चेतसा भरतः ।
प्रदहन्निव चक्षुर्भ्यामदहः कुलमग्निवत् त्वमित्यवदत् ॥ ८५ ॥

रामे सुगुणारामेऽपापे पापं कृतं त्वया पापे ।
चक्रे स तव किमागश्चक्रे वद किं न सर्वभूतसुहृत् ॥ ८६ ॥

स्वामिद्रोहिणि पत्युः प्राक्तनपापेन निर्मिता मृत्युः ।
किं कथयामि नृशंसे पापं तव जातपातकाशंसे ॥ ८७ ॥

मातरमित्थं बहुधा गर्हन्नग्रे स मन्थरां दृष्ट्वा ।
निजगादानुजमेषा कुलकल्पलताप्रतापिनी योषा ॥ ८८ ॥

स रुषा धृततत्कैश्यः परुषाक्षरमीरयन् वचोऽवश्यम् ।
हन्मीत्युन्नमितासिर्भरतेन निवारितस्तथैवासीत् ॥ ८९ ॥

अपि विपदब्धिनिमग्नो नृपतिः संस्कार्य इत्युदारधिया ।
विदितनयेन नियुक्तो विधिवत् कर्माखिलं पितुश्चक्रे ॥ ९० ॥

अथ गुरुणा चामात्यैः प्रथमं स प्रार्थितोऽधिराज्याय ।
अनुमेने नैवासाविति वाचमुवाच राममानेष्ये ॥ ९१ ॥

सर्वामरतरुरुद्यत्पर्वामृतकान्तिकान्तिकान्तयशाः ।
रामः स गुणग्रामः परमर्हति राज्यशासने न परः ॥ ९२ ॥

कर्णरसायनभूतं भरतस्य वचो निशम्य सर्वेऽपि ।
प्रोचुः साध्विति हर्षात् परमोऽसि त्वं यतः शुभं ब्रूषे ॥ ९३ ॥

अनुजानीत जना मामानेतुं यामि जानकीजानिम् ।
प्रतिजानामि विना तं न पुरं प्रविशेयमित्यफाणीत् सः ॥ ९४ ॥

प्रार्थयमानैः सकलैः साकं गमनाय साकमेव स तैः ।
निरयात् पुरतः स रयान्महितश्चतुरङ्गसेनया सहितः ॥ ९५ ॥

निम्नोन्नतिमार्गावनिसुसमीकरणाय निर्ययुः पुरतः ।
पट्टपुटकखनित्रघटीकुद्दालकुठारपाणयः पुरतः ॥ ९६ ॥

रथगजतुरगावलिवरचतुरन्तान्दोलिकादिकारूढाः ।
रामस्थापितचेतःकृष्टा नगराद् विनिर्ययुस्तुष्टाः ॥ ९७ ॥

सस्त्रीबालजरत्कं पुरमखिलं रामदर्शनायोत्कम् ।
भरतेन रतेन समं प्रेम्णा प्रययौ यथान्तरात्मास्य ॥ ९८ ॥

महतीं भारतसेनां गङ्गायास्तीरमापतन्तीं ताम् ।
दृष्ट्वा संशय्य गुहः स्वयमुपगतवान् नये रतं भरतम् ॥ ९९ ॥

आशयविशदीकरणाद् विशयविदूरेण चेतसा गङ्गाम् ।
सबलं भरतमतारयदभिपूज्य गुहः स नैकनौकाभिः ॥ १०० ॥

भरतः सरितं तीर्त्वा विश्राव्य गुहाय चात्मनश्चरितम् ।
क्रमसमतिक्रामितसृतिरव्याजमुपाययौ भरद्वाजम् ॥ १०१ ॥

कतिपयजनसहितः सन् मतिमान् प्रणिपत्य दण्डवद् भूमौ ।
भरतः स भरद्वाजं प्रतिवाचमुवाच राघवः केति ॥ १०२ ॥

निधिरथ तपसां स दयानिधिरधिगम्यातिधार्मिकं भरतम् ।
अर्हां राजन्यार्हां चक्रे चिन्ताप्तसर्वसंपत्कः ॥ १०३ ॥

प्रमुदितसकलचमूकं समुदितरामानुकीर्तनामूकम् ।
प्राह तमास्ते ज्यायान् याहि त्वं वत्स चित्रकूटमिति ॥ १०४ ॥

तरसा रामदिदृक्षुः शिरसा प्रणिपत्य स ऋषये तस्मै ।
तस्यानुमतिं प्राप्य प्राप्य क्षितिभृत्पथं ययौ सबलः ॥ १०५ ॥

हलकुलिशाङ्कुशजलरुहरेखासद्मानि पादपद्मानि ।
भरताय शशंसुः श्रीदाशरथिनिवासपावनं तु वनम् ॥ १०६ ॥

निरतः केवलधर्मे भरतस्तेभ्यः पदाम्बुजातेभ्यः ।
स्वैनांसि विधूय नतः सेनां तत्रैव संनिवेशितवान् ॥ १०७ ॥

उद्धतसेनापद्धतिबद्धमहाशब्दधाव्यमानमृगम् ।
रुद्धं वनमीशबलैरित्थं निजगाद लक्ष्मणो वीक्ष्य ॥ १०८ ॥

सेनाकलकलशब्दः स्वेनानुश्रूयते महाबाहो ।
को वा किं कर्तुं वा वनमुपयातो बलैर्महाराजः ॥ १०९ ॥

उच्चैस्तरमेतत्तरुमधिरुह्य समस्तमाकलय्य ततः ।
तस्य प्रतिकुर्यामहमीक्षितरि त्वय्यधीश्वरे श्रीमन् ॥ ११० ॥

इति तरुमारुह्योच्चैः प्रतिपद्य बलं च दूरतो भरतम् ।
आहैष दोषनिलयो न वनेऽपि निवासमर्हं ते सहते ॥ १११ ॥

तदलमुपेक्ष्याहममुकमुदयार्कमरीचिरोचिरिद्धशरैः ।
मदमपनेष्याम्यद्य प्रदहति कोपः समुत्थितोऽग्निरिव ॥ ११२ ॥

इति वदति सुमित्रायाः पुत्रे रोषातिपारवश्येन ।
प्राह प्रहसन् रामो वत्स न वेत्सि त्वमेष रोषरयः ॥ ११३ ॥

त्वमिव स्नेहवशान्मामनुगन्तुमिहागतः पुराद् भरतः ।
अविकारेऽपि विकारं कलयसि कीदृग् व्यवस्थितिर्वद ते ॥ ११४ ॥

घनसारसौरभावहघनसारवचस्तदीयमाकर्ण्य ।
सपदि सलज्जं लक्ष्मणमुपदिश्य हितं [1]समाहितं चक्रे ॥ ११५ ॥

भरतोऽपि चमूभरतः प्रच्युतवर्त्माप्युपात्तसद्वर्त्मा ।
धीमद्धाम विचिन्वन् प्रचचार वनेषु पादचारेण ॥ ११६ ॥

कुलगुरुमग्रे कुर्वन् कुलतिलकमथात्मनः क्वचिद् विपिने ।
सीतालक्ष्मणसहितं प्रीतात्मानं ददर्श दाशरथिम् ॥ ११७ ॥

अधनो धननिधिमिव स प्रथमानमनोव्यथावधिं पश्यन् ।
अनुधाव्य रतः पुरतः प्रपपात तदीयपादपङ्कजयोः ॥ ११८ ॥

रामः परमोदारो दोर्भ्यां परिरभ्य चाङ्कमानीय ।
पप्रच्छ स्वच्छमनास्तं भरतमनामयं किमेतदिति[2] ॥ ११९ ॥

सोऽपि प्राह महात्मा दुःसहदुःखेन दूयमानात्मा ।
तातस्त्रिदिवं यातः किं नः शरणं भवान् वनं यातः ॥ १२० ॥

[1] MS. A reads *samānayat prītim*.
[2] MS. B seems to read *satamamayam*.

विषमिव पुरुषव्याघ्रः पीत्वा भरतस्य तद्वचः श्रुत्वा ।
विषसाद सानुजन्माप्यकृशं चुक्रोश मैथिली श्वशुरम्[1] ॥ १२१ ॥

सीतालक्ष्मणसहितः स्नातः पुण्यासु राघवोऽथाप्सु ।
ताताय ददावैङ्गुदपिण्याकेनैव पिण्डमक्षय्यम् ॥ १२२ ॥

अथ धीरमतिं रामं दृढधीर्निजगाद तं समाजगतम् ।
एहि महाबाहो ते पाहि महीनाथ पैतृकं राज्यम् ॥ १२३ ॥

अविवेकया यदुक्तं मात्रा मम राम तत्तु सोढव्यम् ।
श्रीमन्नवसि न नश्चेत् त्वमिवाहमपीह [देव] वत्स्यामि ॥ १२४ ॥

दासपदार्हेऽनर्हे राजपदं नैव राजतेऽवरजे ।
ज्यायानेव हि राजा राजन् राजान्वयेऽपि सर्वत्र ॥ १२५ ॥

तत् त्वं तत्त्वविदसि मत्कामं सफलीकुरुष्व हे राम ।
न प्रतिषेधः कार्यो विप्रतिषेधो न विद्यतेऽस्मासु ॥ १२६ ॥

निरवधिभक्त्या भरते निरुपधि फणतीत्थमातुरेऽभिरते ।
रामस्त्वाहास्माकं पितृशासन एव वर्तितव्यमिति ॥ १२७ ॥

पित्रा तव भूम्यवनं निरदेशि ममापि पावनं हि वनम् ।
न चतुर्दश वर्षाणि प्रचलितुमुचितं ततस्त्वया च मया ॥ १२८ ॥

भरतः प्रपफाण परं फणतीत्थमवार्यनिश्चये रामे ।
भवदीयमिदं राज्यं पातुं कथमुत्सहेऽद्य ते दासः ॥ १२९ ॥

[1] MS. B reads from the second quarter thus:
. . . . . . viṣasādāsvādya bhāratīṃ vācam,
sānujaniḥ sā nitarām akṛśaṃ cukrośa, etc.

यावद्भवदागमनं तावद् भवदीयपादुके एव ।
भूपाश्र्यौ भूयास्तामनयोश्चरणाम्बुजे निधेहि विभो ॥ १३० ॥

तदनु प्रीतो रामस्तदनुमतेनैव तत् तथा कुर्वन् ।
तं निजपदसेवारसनिरतं नगराय यापयामास ॥ १३१ ॥

स जटावल्कलधारी शिरसा ते पादुके गृहीत्वालम् ।
न चतुर्दशवर्षान्ते त्वां चेत् पश्यामि पश्य मामन्ते ॥ १३२ ॥

इति निगदितराद्धान्तो नन्दिग्रामे निवृत्य स तु तस्थौ ।
राजासनसंस्थापितरत्नाञ्चितरामपादुकायुगलः ॥ १३३ ॥

स रामचरणार्पणाप्रतिमपादुकासंनिधि-
प्रतिक्षणनिवेदिताखिलजनावनप्रक्रमः ।
विनश्यदरिमण्डलं विलसदात्तहृन्मण्डलं
पपाववनिमण्डलं प्रमितभूतलाखण्डलम्[1] ॥ १३४ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये चतुर्थः सर्गः

[1] The metre is *pṛthvī*.

पञ्चमः सर्गः

अथ रथगजवाजिभटच्छटया परिपीडितं वनं दृष्ट्वा ।
रामः कामं दध्यौ सानुचरश्चित्रकूटसानुचरः ॥ १ ॥

पुनरपि वनगतजनतावशमिदमुपगम्य पीडयेत परम् ।
तदसांप्रतमत्रैवावस्थातुं संप्रति प्रतीमः किम् ॥ २ ॥

संभाव्य स मुनिमण्डलमण्डितमुच्चण्डविक्रमो रामः ।
त्राताविशदशरण्यं सीतानुजयुक् स दण्डकारण्यम् ॥ ३ ॥

निदधानः पदमुदरे सदवस्य दवस्य[1] दण्डकाख्यस्य ।
इदमाह वचः सौख्यप्रदमुपहितलक्ष्म लक्ष्मणं रामः ॥ ४ ॥

अवहितमतिरव्यवहितगतिरवगतिगोचरीकृतान्यगतिः ।
चर शरचापधरः सन् परितः पुरतश्चरन्ति सत्त्वानि ॥ ५ ॥

अहमपि शरचापधरः पश्चादनुगन्तुमुत्सहे वत्स ।
उभयोरन्तरगमनादभयोपहिता धरासुता भविता ॥ ६ ॥

तदनूभावपि धनुषी संधाय शरैः परैकभीतिपुषी ।
अभितःपातुकघातुकमृगमण्डलखण्डनव्रतं दधतुः ॥ ७ ॥

[1] The first *dava* is in the sense of *araṇyavahni*, and the second means *vana*. Amara says: *davadāvau vanāraṇyavahnī*.

सिंहाविव नरसिंहावभिभूय निजेन तेजसा विपदम् ।
कृत्वान्तरतः सीतां चेरतुरवनीसुरावनाय वने ॥ ८ ॥

अन्तःकरणोपाधेर्बिम्बप्रतिबिम्बमध्यवर्तिन्याः ।
शिश्राय श्रियमनयोः सीता नीता सुमध्यमा मध्यम् ॥ ९ ॥

[1]गजयोरन्तरगजयोर्मल्लीव मतल्लिकाद्रिवल्लीनाम् ।
पयसा घनयोर्घनयोश्चपलेव चचाल चन्द्ररेखेव ॥ १० ॥

प्रथितापूर्वाभिख्या व्याप्तिरिव यागतत्फलान्तरगा ।
ज्योत्स्नेव स्मितविजितज्योत्स्ना सा द्युतेऽन्तरे दिनयोः ॥ ११ ॥

उभयोर्द्युसदिभनिभयोरभयोदयदक्षदैवतप्रभयोः ।
गुर्वाज्ञानियततपोनिर्वाहकशक्तिवद् दिदीपे सा ॥ १२ ॥

पल्लवपुष्पफलादिभिरुल्ललदवनीरुहान्तराभिख्याः ।
अवनीजानिकुमारादवनीजाकर्ण्य पूर्णकामाभूत् ॥ १३ ॥

मूर्ता मोहनशक्तिर्मार्ताण्डकुलावतंसमारूढा ।
कार्तान्तिकशक्तिररौ[2] वार्तावहशक्तिराश्रितप्रकरे ॥ १४ ॥

अधिगतवनवीथिरथ प्रथितविरोधः सुरैर्विराध इति ।
पथि तेषामाविरभून्मिथिलाराजात्मजां जिहीर्षुरलम् ॥ १५ ॥

[1] The expression might be construed thus:
agajayoḥ (*pārvatayoḥ*) *gajayoḥ*, *antaḥ* (*madhye*).

[2] This line conveys that Rāma had the ability to deal a death-blow to his enemies, and as far as his dependents were concerned, he had equal ability to afford protection and bring about *ārogya* and *svāsthya* to them. This is an introduction to the killing of the demon Virādha whose attacks on Rāma and Lakṣmaṇa are described in the following verses.

आह च स महात्मानाविह किं चरतश्च कौ युवां युवयोः ।
नैष च वेषः सम्यक् शरचापजटाजिनस्फुटो न यतिः ॥ १६ ॥

क युवां हि तपस्विवरौ केयं तरुणी च पूर्णचन्द्रमुखी ।
तदिहाशु विहायैनां मेधामाधाय भोः पलायेथाम् ॥ १७ ॥

नो चेन्मामकमेतच्छूलं शत्त्वस्त्रपारणाशीलम् ।
भवदीयकदुष्णोरःशोणितमविलम्बतः परं पिबति ॥ १८ ॥

इति वदति तमस्तोमप्रतिकृतिरूपेऽथ रूपवत्पापे ।
सूर्यान्वयमणिदीपौ वीर्यातिशयेन जघ्नतुस्तं तौ ॥ १९ ॥

निक्षिप्य ततः सीतामाक्षिप्तशतारमात्मनः शूलम् ।
चिक्षेप रुषा परुषाधिक्षेपमसह्यविक्रमे रामे ॥ २० ॥

रामः शत्रुविरामस्तच्छूलममर्त्यमर्त्यहृच्छूलम् ।
चिच्छेद शितैर्बाणैस्तम इव रविरंशुभिस्तथा नैशम् ॥ २१ ॥

रामेषुपरंपरया कामेषुहतस्य तस्य तच्छूले ।
भग्ने सति शोकाम्बुधिमग्नश्चिक्षेप सालमुत्पाट्य ॥ २२ ॥

तं सहसाभिपतन्तं हंसः परमो यथाशु संसारम् ।
शकलितमाशुगनियतेर्वितताान वितानयन् यशः स दिशाम् ॥ २३ ॥

अथ स प्रस्तरवृष्टिं मायामाश्रित्य राक्षसीं रूक्षः ।
प्रावर्तयताभीतावपि ताविषुभिश्च तामवारयताम् ॥ २४ ॥

सुविषह्यैषवभेदं स ह्यतिमोहात् प्रसह्य तौ वीरौ ।
निजदोःशिरसि निधायापक्रमणाय प्रचक्रमे क्रूरः ॥ २५ ॥

घनघोराटव्यटने स्वसुखावहवाहनं बभूवासौ ।
रक्षो न क्षोभय तल्लक्ष्मण दुर्लक्ष्मणीक्षिते वक्ष्ये ॥ २६ ॥

मा नय राजकुमारौ मानय मद्वाक्यमद्य मां तु हर ।
इत्यनुरुदतीं सुदतीं प्रत्यवलोक्य व्यथामधाद् रामः ॥ २७ ॥

चिच्छिदतुरसिभ्यामथ भुजयोस्तं भूरिपीडितप्रजयोः ।
जघ्नतुरश्मघनोरसि तावतिशितशस्त्रतो ममार न सः ॥ २८ ॥

अवटं तावतिविकटं कृत्वा सश्वासमप्यविश्वासम् ।
तस्मिन् क्षिप्त्वा सस्मितमपिदधतुरथाश्मभिर्जयं दधतुः ॥ २९ ॥

मूर्तां जयलक्ष्मीमिव मार्ताण्डकुलोद्वहः स तां सीताम् ।
परिरभ्य तदा दोर्भ्यामरिरभ्यदशां[1] निदर्शयन् मुमुदे ॥ ३० ॥

[2]आशरभङ्गानन्तरमाशरभङ्गाश्रमं गते तस्मिन् ।
तद्दर्शनागतेन्द्रो दुर्दर्शोऽसाविहेत्यदृश्योऽभूत् ॥ ३१ ॥

गतवति तस्मिन् मघवति भगवति भगवन्तमन्ततो रामः ।
कृतमनसिजशरभङ्गं शरभङ्गमवाप निस्तपोभङ्गम् ॥ ३२ ॥

पदयोः प्रणमन्तं तं हृदयोपहितं चिकीर्षुराश्लिष्य ।
वार्तानुयोगचतुरो वार्ताभिरवर्तयन् मुदा वृत्तिम् ॥ ३३ ॥

स्मृतिरेवान्ते मुक्तिं घटयति यस्येति संजगौ वेदः ।
तस्य हि साक्षाद् दर्शनमस्मन्मोक्षाय राम किं नालम् ॥ ३४ ॥

[1] *arirabhya* is not clear.
[2] *Āśara* means *rākṣasa*. Amara says: *kravyādo 'srapa āśaraḥ*.

इति संस्तुत्य स रामं रामं पश्यन् हुते हुताशे स्वाम् ।
तनुमतनुयशा हित्वा समवाप परं पदं तदा विष्णोः ॥ ३५ ॥

सत्पात्रवितीर्णं चेदल्पमपीह प्रकल्पते महते ।
दत्त्वाग्नेर्निजदेहं यदयं दिवमेति दिव्यदेहेन ॥ ३६ ॥

स्वामित्रतमोमित्रं सौमित्रिममित्रहात्मनो मित्रम् ।
प्रीतां पीतामृतवत् सीतां च स तां चकार गोष्ठीभिः ॥ ३७ ॥

अथ ते मुनिवनसरणिं दधतो मखधूमधीरदर्शिकया ।
ददृशुः खगमृगचित्रं तत्र सरश्चित्रपुष्पपत्रफलम् ॥ ३८ ॥

क्रीडति कश्चिदमुष्मिन् योगी पञ्चाप्सरोभिरश्रान्तम् ।
रसिकः सरसि तदुच्चैर्मधुरः शब्दः प्रमीयते श्रुतिभिः ॥ ३९ ॥

इत्यैतिह्यावगतां गाथामवगाह्य गूढरूपाय ।
तस्मै मुनये सनयो रामः स ननाम नाम संकीर्त्य ॥ ४० ॥

तदनु सुतीक्ष्णं तपसा तीक्ष्णं दृष्ट्वा तदीयपादाब्जे ।
नत्वा सत्कृतिमेत्य प्रायादायासमन्तरैव ततः ॥ ४१ ॥

अत्रिमहामुनिपत्नीप्रापितदिव्याङ्गरागया पत्न्या ।
[1]उन्नतिसाधनतन्नतिभिन्नाश्लीलो बभौ मुदा रामः ॥ ४२ ॥

अथ मुनिनाथमगस्त्यं दिक्षु दिदृक्षुः प्रसिद्धमहिमानम् ।
सीतालक्ष्मणसहितो नेता जगतां जगाम तद्धाम ॥ ४३ ॥

[1] See *V.R.*, Ayodhyā., cantos 117 and 118 for the story of Atrimunipatnī Anasūyā, and her conversation with Sītā.

इन्दीवररूपतया श्यामलदेहात्तकोमलश्रीकः ।
अश्रममाश्रमसंनिधिमधिगत्य निजं निवेदयांचक्रे ॥ ४४ ॥

आगतमाकर्ण्य मुनिः स्वागतवचनेन मानयन् रामम् ।
आनय शीघ्रं तमिति व्यादिशदन्तेवसन्तमत्यन्तम् ॥ ४५ ॥

सोऽन्तेवासी धाम्नः प्रान्ते भयभक्तिभासुरं वीरम् ।
योगानुयोगपूर्वकमगमयत मुनीन्द्रमिन्द्रवन्द्यपदम् ॥ ४६ ॥

अतिभयभक्तिसमेतं प्रतिपदसमुदञ्चितप्रणामं तम् ।
आशीर्भिरनेकाभिर्दोर्भ्यां परिरभ्य तोषयांचक्रे ॥ ४७ ॥

नेता स मुनीनामथ सीतापतये सुखासनं दत्त्वा ।
मेध्यं सहसातिथ्यं प्रावर्तयत प्रवृत्तवार्तवचाः ॥ ४८ ॥

अथ धनुरैन्द्रमुदारं [1]तूणौ चाक्षय्यसायकौ खड्गम् ।
वर्म च मर्मत्राणं प्रादाद् रामाय कुम्भजः प्रेम्णा ॥ ४९ ॥

सीतापतिरपि जगतां नेता संग्रामसाधनं सर्वम् ।
तस्मादादाय ततो विस्मापितमानसस्तमाचख्यौ ॥ ५० ॥

स्वामिन्नत्र निवस्तुं धामनि मुनिसार्वभौम भावत्के ।
वाञ्छा ब्रूहि ममाच्छा पृच्छामि महानुभाव भवदिच्छाम् ॥ ५१ ॥

इति वदति घनश्यामे रामे रामासखे रमासखधीः ।
मुनिपतिरवनीन्द्रपतिं स्मितपूर्वकमाह भावयन् भावि ॥ ५२ ॥

[1] *tūṇa* is a synonym of *tūṇī*.

विष्णुरसि त्वं साक्षाज्जिष्णुरजानन्निवापि संजानन् ।
पृच्छसि किं मां गच्छन् गौतमतटिनीतटीं सपञ्चवटीम् ॥ ५३ ॥

प्रणिपत्य ततस्तस्मै मुनिनाथायाभिधेयमभिधाय ।
सीतासौमित्रियुतः स्फीतां रामो जगाम पञ्चवटीम् ॥ ५४ ॥

तत्र विचित्रतरूत्करचित्रकरोदारगौतमीतीरे ।
शालां सपदि विशालामनुजन्मा निर्ममेऽथ पर्णमयीम् ॥ ५५ ॥

तदनु प्रीतो रामस्तदनुजरचितोटजं यथा पटजम् ।
तद्दर्शनकर्शितविपदवनिसुतासंयुतः प्रविश्य वशी[1] ॥ ५६ ॥

तत्रानुरक्तमनसोश्चरतोश्च रतोत्सवे रहश्चरतोः ।
सीतारघुपुङ्गवयोः स्फीतायुरभूदभूतपूर्वसुखम् ॥ ५७ ॥

सुखयति तस्मिन् देशे मुखरमुखा वेदवादतो मुनयः ।
आजग्मुरथादित्या राममहेयं रमासहायमिव ॥ ५८ ॥

विहिताशिषो मुहुस्ते महिताय नताय चार्चते तस्मै ।
प्रोचुरनन्यशरण्याः प्रचुरासुरपीडनं श्रितारण्याः ॥ ५९ ॥

आस्माकीनप्राक्तनपुण्यातिशयेन राम दृष्टोऽसि ।
दुष्टासुरभवबाधाः भवबाधां च प्रभो निवर्तय नः ॥ ६० ॥

प्रतिपर्व सुपर्वारिप्रमथितविप्रास्थिविप्रकीर्णा गौः ।
अगतिकगतिरेकस्त्वं जगति जगन्नाथ नाथयामस्त्वाम् ॥ ६१ ॥

[1] MS. A reads, instead of *yathā paṭajam*, etc. thus:
. . . . *vrajantsahasā*,
parītā tena vitene sītā ca tadaśmaveśma sanmahasā.

प्रौढमुनिप्रार्थनया गाढकृपार्द्रीकृतान्तरो रामः ।
अभयं प्रददामि पुनर्न भयं भवतां भविष्यतीत्यफणत् ॥ ६२ ॥

शरणागतवत्सलतः करुणारसनिर्भरं वचः श्रुत्वा ।
अमितानन्दमवापुः प्रमितापदुपारतेति ते जग्मुः ॥ ६३ ॥

अथ तेषु गतेषु धरातनयानयदैत्यहत्यतिप्रवणम् ।
भर्तारमवेत्य पुरां हर्तारमिव स्थितं मिथः प्राह ॥ ६४ ॥

नाथ स्नेहाद् वक्ष्ये नाधर्मः क्वापि विद्यते भवति ।
किमकारणवैरं नः किमकारि महन् महासुरैरागः ॥ ६५ ॥

योषास्मि न जाने तद् रोषाय ममास्तु मानुयोगस्ते ।
पृच्छन्त्यामिति तस्यां स्वच्छन्दं प्राह राघवस्तस्यै ॥ ६६ ॥

साध्वि महीसुरबाधा साध्वीति न शक्यते समाख्यातुम् ।
घ्नन्तोऽपि न हन्तव्याः सन्तो विधितो हि दैवतानि हि ते ॥ ६७ ॥

साधूनेतान् बहुधा बाधन्ते तेऽसुराः परं दुष्टाः ।
दुष्टानां या शिक्षा शिष्टानां सैव शाश्वती रक्षा ॥ ६८ ॥

ईदृशधर्माचरणे मादृगुपेक्षेत तत् कथंकारम् ।
देहिन एव ममैते देहास्त्वमिव प्रिये न संदेहः ॥ ६९ ॥

न भ्रम एष तवास्ते विभ्रम एव त्वया ममादर्शि ।
जाने मृगशावाक्षि स्थाने जिज्ञासितार्थसिद्धिरपि ॥ ७० ॥

अथ संलपतोरित्थं प्रथमानपरस्परानुरक्ति तयोः ।
राक्षसराजावरजा रूक्षशरीराविरास तत्पुरतः ॥ ७१ ॥

आष्ट्भ्रमसंधायकदंष्ट्राग्रविवृत्तनेत्रचित्रमुखी ।
शूर्पणखाभिससर्प श्रीजितकन्दर्पदर्पकं रामम् ॥ ७२ ॥

व्याली चन्दनमम्बुदपाली चन्द्रं स्वभावनिस्तन्द्रम् ।
गुणवन्तमिवावगुणश्रेणी गमयांबभूव नो विकृतिम् ॥ ७३ ॥

राम स्त्रीकाम त्वां कामयमानाहमागता कामम् ।
तन्मां रमय रमाभां रामामेनां त्यजागुणां कृपणाम् ॥ ७४ ॥

दोषाचरराजानुजयोषा सेयं तु राम निर्दोषा ।
अङ्गीकुरु न कुरङ्गीदृगियं न विगीयते तवानुचिता ॥ ७५ ॥

इत्यपहास्यवचस्कामुपहास्य नृपालशेखरो रामः ।
अनुजे मम दनुजे त्वं रमय मनो दूरदार इत्यवदत् ॥ ७६ ॥

सत्यं मन्वाना सा वचनं रामस्य पीवरोन्नासा ।
अनुजं निर्जिततनुजं प्राप प्रभ्रष्टचित्तदुष्प्रापम् ॥ ७७ ॥

रामानुज मां रमय कामानुषभोगदायिनी मादृक् ।
पुण्याद्धि तव प्राप्ता पण्याद्धितपूरणासुरस्त्रैणात् ॥ ७८ ॥

इति निगदन्त्यां तस्यां प्रतिपदजनितस्मयः स सौमित्रिः ।
तस्यायमहं दासो दासीत्वं ते न युज्यते कान्ते ॥ ७९ ॥

तत्त्वमितो व्रज भज तं तत्त्वमवेत्येति चोदिता तेन ।
तत्प्रत्याख्यानपदं सीतामत्तुं समुद्ययौ स्फीता ॥ ८० ॥

स्वयमेव रिरंसुः सा यावत्सीतां जिघांसुरासन्ना ।
तावल्लक्ष्मणकरतलखड्गलताच्छिन्नकर्णनासासीत् ॥ ८१ ॥

व्याक्रोशन्ती बहुधा बहु धावन्ती च सैरिभीव[1] सभीः ।
खरमथ खरतरविक्रममक्रमसंचारमाप मृत्युरिव ॥ ८२ ॥

दनुजः सोऽपि तदनुजः सादरमवलोक्य सोदरीं विकृताम् ।
प्रज्वलदग्निमुखे कः पिपतिषति विषं पिपासति ब्रूहि ॥ ८३ ॥

अयि सोदरि मा भैषीर्मयि जीवति शात्रवः क्व जीवति ते ।
किं तु क्व निवसति स कः कर्ता कार्तान्तिकान्तिकावासैः ॥ ८४ ॥

इत्यतिशूरे प्रलपति विलपन्ती सा निवारितापि भृशम् ।
आह वयोरूपवरं साहवशूरानुजं वने रामम् ॥ ८५ ॥

भ्रातः किमिति वदेयं नातः परमस्ति भाग्यमादेयम् ।
सीता यदि तत्कान्ता नीता शय्यां प्रति प्रतीकान्ता ॥ ८६ ॥

नैव सुरी नाप्यसुरी नैव भुजङ्गी न वा विहङ्गी च ।
न च किंनररमणी [स्यात्] तच्चरणकनिष्ठिकानखाग्रसखी ॥ ८७ ॥

अहमप्यपहर्तुं तामिह गतवत्यस्मि तन्महद्विपिनम् ।
व्रतवद्वरतद्देवरशितशस्त्रनिकृत्तकर्णनासासम् ॥ ८८ ॥

किं बहुना बलवान् यदि तं बलिनं सानुजं जहि क्षिप्रम् ।
आनय तामनुभविता मानय मामन्यथाधमो भविता ॥ ८९ ॥

इति तच्चोदितरागद्वेषाभ्यां कालदण्डपाशाभ्याम् ।
सपदि समालीढान्तःकरणः स रणाय निर्ययौ सबलः ॥ ९० ॥

[1] *sairibhī* means *mahiṣī* (she-buffalo).

दूषणमग्रे कृत्वा विहितजगद्दूषणं खरः खरधीः ।
त्रिशिरस्कमुरूरस्कं सेनान्यं साधयेत्युवाचान्यम् ॥ ९१ ॥

अथ रथगजतुरगभटप्रथमानबलार्णवे चलत्यखिले ।
पाटितदिक्करटिश्रुतिपुटपदविरभूदभूतपूर्वरवः ॥ ९२ ॥

अवधार्य ततः शब्दात् स्ववधाय समागतां चमूं महतीम् ।
आह स्वयमेव रणोत्साहं कृत्वाथ लक्ष्मणं रामः ॥ ९३ ॥

भ्रातः शृणु तं शब्दं पातयितुं नः स्वमण्डलादब्दम् ।
महतीं सेनां कर्षन् साहसिक उपैति कोऽपि नोऽमर्षन् ॥ ९४ ॥

दर्पाच्छूर्पणखायाः प्रेरणतश्चाद्य रक्षसां राजा ।
उत राजसमो वान्यः प्रतिकर्तुमुपैति नान्यथा नान्यः ॥ ९५ ॥

अतिसंनिहितेव चमूर्मतिमन्नतिदारुणो रणो भविता ।
तद्गिरिकुहरे सीतां कृत्वा शरचापपाणिरभितिष्ठ ॥ ९६ ॥

मद्वचनं कुरु नान्यद् वचनं फण लक्ष्मण प्रियोऽस्यनुजः ।
अहमेव ससैन्यं तं हरिरिव करिणं समुत्सहे हन्तुम् ॥ ९७ ॥

वत्से रक्षति सीतां सत्सेविनि गोत्रकुक्षिनिक्षिप्ताम् ।
रामो रणसंनाहाद् भीमो भीमं धनुर्बभौ धुन्वन् ॥ ९८ ॥

अथ ते निशिचरयोधाः प्रथमानपराक्रमक्रमाः प्रथमम् ।
विरचितसिंहध्वनयो गिरिमिव हरिमम्बुदाः शरैरकिरन् ॥ ९९ ॥

अथ हरिरपि रामात्मा बधिरीकृतदिग्गणं गुणध्वनिना ।
दधदिष्वासमतानीत् तच्छरतुच्छप्रभं जगत् स्वच्छम् ॥ १०० ॥

सकृदेव समाक्रान्ताः सर्वे सुरशत्रवोऽतिविक्रान्ताः ।
परिवार्य हरिं हरिणा इव जघ्नुररिघ्नमस्त्रधाराभिः ॥ १०१ ॥

सोम इवाम्बुदमध्ये रामः क्षणमात्रमप्रकाशः सन् ।
निजशरवेगनिवारितरजनीचरचक्रचङ्क्रमः शुशुभे ॥ १०२ ॥

चण्डः पटुदोर्दण्डः कोदण्डमतीव कुण्डलीकुर्वन् ।
रविरिव तिमिरं किरणैरहरत् स शरैश्चमूसमूहमरेः ॥ १०३ ॥

अथ दूषणमायान्तं दूषणमिव पण्डितः प्रचण्डगतिः ।
युक्तिभिरभियुक्तोक्तिभिरहरद् रामः स्वबाणधाराभिः ॥ १०४ ॥

शरझरकम्पितशेखरमरिवरमुरुसाधनैः शरै रामः ।
त्रिशिरस्कमुरूरस्कं गिरिमिव गिरिभिद् बिभेद भिदुराभैः ॥ १०५ ॥

इत्थं बलमपि सकलं दग्धं रामाग्निना विलोक्य विभीः ।
राघवमतिशरलाघवमाहवलोलो जुहाव तत्र खरः ॥ १०६ ॥

स रथीट् सारथिमवदत् सारय रथमद्य पश्य मे शौर्यम् ।
रामं राहुरिवेन्दुं रणमूर्धनि वत्स निर्जिघत्सामि ॥ १०७ ॥

इति खरशरधाराभिः स खरो हरिदन्तरं निरन्तरयन् ।
अतिपरुषरुषा रामं चक्रे चित्रेषुवार्धिमध्यगतम् ॥ १०८ ॥

रामोऽथ महाबाहुर्नीहारपरंपरां यथा भानुः ।
निजशितशरधाराभिश्चिच्छेद शरावलिं खरस्य खराम् ॥ १०९ ॥

अथ रथसारथिकेतनमप्ययमत्याशुगाशुगावलिभिः ।
छित्वा परमभियान्तं गदया स दयानिधिर्जघान शनैः ॥ ११० ॥

गद्या विमताङ्गदया रामेऽभिपत्य पपात रणभूमौ ।
तेनेषत्स्खलितेन प्रथितमहेन्द्रास्त्रगाढनिर्व्यथितः ॥ १११ ॥

अवशिष्टा ये दुष्टाः समरे समरेखया मुखानि दिशाम् ।
जग्मुः सा शूर्पणखा प्रागेवैभ्योऽतिबिभ्यती निरगात् ॥ ११२ ॥

स सहस्राणि चतुर्दश रामो रणमूर्ध्नि रक्षसां हत्वा ।
एकमुहूर्तेनैकः शुशुभे विजयश्रिया समाश्लिष्टः ॥ ११३ ॥

नेदुः सुरदुन्दुभयो ननृतुर्दिव्यप्सरस्त्रियोऽपि घनाः ।
सुमवर्षं समवर्षन् हर्षं च महर्षयो ययुः सर्वे ॥ ११४ ॥

सीताथ जयश्रीरिव मूर्ता गिरिगह्वराद् विनिर्गत्य ।
रामं शत्रुसहस्रविरामं रेमे रमा समाश्लिष्य ॥ ११५ ॥

पूर्वजमपि सौमित्रिर्दृष्ट्वाभूतपूर्वविक्रान्तिम् ।
प्रणतः पदपङ्कजयोः प्रमुमोदैकान्तभक्तियुक्तमनाः ॥ ११६ ॥

अव्रणमश्रमखिन्नं भर्तारमवेक्ष्य शत्रुहर्तारम् ।
मग्ना मोदाम्बुनिधौ मेने स्वकपुण्यमेव सागण्यम् ॥ ११७ ॥

अथ ते मुनयः सर्वे दधते विजयं मुदाशिषश्चक्रुः ।
रामाय सरामाय प्रतिहतकल्यः परं कृताञ्जलयः ॥ ११८ ॥

अथ सा सहसा लङ्कां शूर्पणखा प्राप्य कालसर्पसमा ।
रामचरित्रं चित्रं राक्षसभर्त्रे निवेदयांचक्रे ॥ ११९ ॥

दष्ट्वाधरमथ स रुषा परुषाक्षरमाह सोदरीं दृष्ट्वा ।
प्रथमं किमिति गता त्वं रक्षःप्रत्यक्षघातुकप्रथमम् ॥ १२० ॥

साह समाभाषं तं साहसमाश्रित्य कूटसंघटने ।
श्रृणु मद्वचनं भ्रातः श्रृणुमस्त्रितयेऽपि हि स्त्रियो जगताम् ॥ १२१ ॥

तासामपि सर्वासां मध्ये नैकापि कामिनी कामिन् ।
श्रीरामसतीसाम्यं कलयति लावण्यमद्भुतं तस्याः ॥ १२२ ॥

तद्वरवर्णिन्युपमामुद्वहति परं पतिव्रता सैव ।
व्याहर्तुमलं नाप्यलमाहर्तुं तां त्वदर्थमस्मि गता ॥ १२३ ॥

तत्कृतवैकृतमङ्ग मत्कृतमपराधमङ्ग वक्त्येव ।
निष्कृतिमस्य हि कर्तुं दुष्कृतिकृतमाशु संहराहर ताम् ॥ १२४ ॥

लङ्काधिप सकलं कालं कातरताप्रदाननालं का ।
लङ्काया अकलङ्कालंकारति सा तथान्यथा लङ्का ॥ १२५ ॥

भोगो हि महाभोगस्तस्या योगोऽप्यलं महायोगः ।
तदभावे मुदभावे किमफलभावेन राजभावेन ॥ १२६ ॥

अपकीर्तिमधः कृत्वा नृपकीर्तिमवाप्नुहि स्फुटामनिशम् ।
माद्यसि यदि तदपहृतेर्माद्यसि शितशस्त्रधारया सत्यम् ॥ १२७ ॥

बलपौरुषहानिस्ते बलशासनशासनप्रसक्तास्ते ।
कुलबलपौरुषवत्ता किं कुरुषे वा प्रभो त्वदायत्ता ॥ १२८ ॥

खरदूषणगिरिभिदुरस्त्रिशिरोमुखमुख्यसैन्यवन्याग्निः ।
सोऽन्यैः सहसा सैन्यैर्जय्यः कथमद्य जायतेऽजय्यः ॥ १२९ ॥

इति चेतसि चेद् भीतिर्मतिमंस्तेऽतीव राक्षसाधिपते ।
गूढैर्मायारूढैर्भार्या हार्या वनाद् बलादबला ॥ १३० ॥

अपहारस्तस्याश्चेदुपहारोऽतीव मे विपन्नतया ।
शुष्कः सोऽपि सुजय्यो निष्कण्टक एष रक्षसां पन्थाः ॥ १३१ ॥

इति शूर्पणखावाक्यादतिमात्रनिरूढरागवैरभरः ।
भीतान्तःकरणतया सीताहरणे चकार हृन् न रणे ॥ १३२ ॥

रामशराग्निज्वाला धक्ष्यन्ति रणे सति प्रतीपं तम् ।
कामशराग्निज्वालाः प्रदहन्ति विचित्रमप्रतीपं तम् ॥ १३३ ॥

इति श्रुतसहोदरीवचनविभ्रमः सभ्रमः
प्रतिश्रुतरघूत्तमप्रियतमाहृतिव्याहृतिः ।
विहाय निजसोदरीमुदितदिव्यशातोदरी-
सहायमतिसुन्दरं समविशन्निजं मन्दिरम्[1] ॥ १३४ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये पञ्चमः सर्गः

[1] The metre is *pṛthvī*.

षष्ठः सर्गः

अथ निशि निशिचरनाथो निद्रामनवाप्य निःसहायः सन् ।
मायावितया मन्त्रिणमामन्त्र्य स नीचमाह मारीचम् ॥ १ ॥

वसति वने राम इति स्वसदृगवरजेन जायया स्वैरम् ।
तामाजिहीर्षतो मे श्यामां साचिव्यमर्ह कुरु सव्यम् ॥ २ ॥

स घनघनाघनलक्ष्मीरक्षीणपराक्रमो रामः ।
निजघान घनानीकैस्त्रिशिरसमतिदर्पदूषणं च खरम् ॥ ३ ॥

तस्मादस्मद्द्वेषी विस्मापयतीह नः कृतादस्मात् ।
स्वस्मादपि तद्रक्तः कस्माज्जीवेत्तु तद्धृतौ स रिपुः ॥ ४ ॥

स्ववधूवियोगविधुरः स वधं स्वत एव याति नान्येन ।
निरपायोऽयमुपायो दुर्जयरिपुनिर्जये सुखोपायः ॥ ५ ॥

इति वदति तदा तस्मिन्नसुरपतौ पापकर्मबद्धरतौ ।
उत्थाय स तं सहसा बद्धाञ्जलिराह संनतः पदयोः ॥ ६ ॥

किमिति महाराज सुखप्रमितिपराभूतदेवराजस्य ।
समितिंजयेन वैरं स्वमतिं कलुषां रुषा प्रसादय भोः ॥ ७ ॥

राजन्निदमनुचितमिति तेजस्विनि तत्र भाति मे मनसः ।
वत्स न वेत्सि मखेऽसौ स महात्मा ज्ञातपूर्व एव मया ॥ ८ ॥

तच्छरशक्तिरकुण्ठा हृच्छयजनकस्य[1] चक्रकोटिरिव ।
संप्रति तं प्रति वैरं किंप्रतिपत्त्यै न सांप्रतं तन्नः ॥ ९ ॥

अरिराजकरः[2] साक्षात् करिराजवरप्रदः परः स पुमान् ।
न क्षमममुना वैरं रक्षःकुलनाथ रक्ष नः सर्वान् ॥ १० ॥

यावत् तद्गोचरता तावत् तव जीवितं यदि द्वेषः ।
प्रद्योतनसांनिध्ये सद्यो न द्योतते हि खद्योतः ॥ ११ ॥

न जिजीविषुरसि यत् तं विजिगीषसि तत्र यासि वैरित्वम् ।
अवरोधवधूभोगादविरोधमिहास्स्व चेज्जिजीविषसि ॥ १२ ॥

अपहर्तुमशक्या सा छायेव पतिं पतिव्रतानुगता ।
न वियोजयिता कश्चिद् भानुप्रभयोश्च चन्द्रचन्द्रिकयोः ॥ १३ ॥

श्रीरेव परं साक्षात् तत्र रिरंसा न साधयेत् सुगतिम् ।
विकृतिं त्यज विद्वत्त्वात् प्रकृतिं प्रतिपद्य पाहि परमार्थम् ॥ १४ ॥

इति तेनाभिहितोऽपि स न प्रतिपेदे कालचोदितः प्रकृतिम् ।
न मुमूर्षोरविलम्बं जय्यौषधमस्ति जीवनालम्बम् ॥ १५ ॥

गुरुवद् गतभीर्वदसि स्वरुचितमसिमस्य पश्य मे पाणौ ।
मच्छासनविमुखं त्वां तुच्छाशयमद्य हन्मि किं नाहम् ॥ १६ ॥

[1] The expression is to be understood thus: *hṛdi śete iti hṛcchayaḥ*, i.e. *manasijaḥ, tasya janakaḥ*=Viṣṇuḥ, *tasya*.

[2] *arin* means a *cakra*, and *arirājakaraḥ* means *cakrapāṇiḥ* (Viṣṇuḥ). *karirājavaraprada* is a reference to the episode of Gajendramokṣa.

इत्थं वदति सुरारौ क्रुद्धं विज्ञाय तं सखा भीतः ।
अस्मान्निधने नरकं तस्मात् तु स सद्गतिं हृदा मेने ॥ १७ ॥

तर्हि करिष्ये राजन् भाव्यं भाव्येन भव्यसाचिव्यम् ।
इत्याह भवान् भगवत्प्रतिमः शुभमेव भावये भवतः ॥ १८ ॥

अस्तु तथैवाग्रे च प्रस्तुतमालोचयाद्य मारीच ।
इति रक्षःपतिनोक्तोऽप्रतिपक्षमुवाच ताटकेयस्तम् ॥ १९ ॥

ससुरासुरयक्षोरगरक्षोगन्धर्वकिंनरैः सनरैः ।
संभूयापि न जेयो रामो जेतैव नात्र संदेहः ॥ २० ॥

निद्राहारविहीनो भद्रावहवृत्तिरार्यदम्पत्योः ।
नक्तंदिवमनुजस्तं व्यक्तं जागर्ति लक्ष्मणो रक्षन् ॥ २१ ॥

कनकमृगो भूत्वाहं जनकसुतां तेन मोहयिष्यामि ।
रामस्तदभिहितः सन् मामन्वेष्यत्ययं प्रदेय इति ॥ २२ ॥

तत्र विचित्रगतैस्तं दूरं गमयामि राममाप्त इव ।
चिरमनवाप्तौ रोषात् तेन मृगे चाशुगः प्रमुच्येत ॥ २३ ॥

कथमपि तत्समयेऽहं हा सीते लक्ष्मणेति वक्ष्यामि ।
श्रुततद्घोररवार्ता सीता तं देवरं प्रयापयिता ॥ २४ ॥

अन्तरमवधाय त्वं संतर जलधिं प्रकृष्य तां सीताम् ।
प्रथमं न वधस्तव चेदेवं देवाथ नाहमभिजाने ॥ २५ ॥

इति मारीचाभिहितं हितमिति गृह्णन् स रक्षसां राजा ।
आशु तथा कुर्विति तं स्वाशुभमनवेत्य तन् मुमोच हितम् ॥ २६ ॥

स्वस्यापि स्वेषामिव निधनस्थानं गतो जनस्थानम् ।
कनकमृगो भूत्वालं जनकसुतायास्ततान निजलिप्साम् ॥ २७ ॥

राजितबिन्दुविचित्रं राजीवाक्षी निरीक्ष्य हेममृगम् ।
हरिणो हरणीय इति प्राह पतिं सोऽपि तच्चिकीर्षुरभूत् ॥ २८ ॥

प्राप्त इवाप्राप्तः सन्नन्तिकदूरप्रचारणैः स मृगः ।
गतिवैचित्र्याद् रामं बहुदूरमपाचकर्ष तं कामम् ॥ २९ ॥

शतधानुगतेन तथावितथां कृतिमात्मनस्तदाहरणे ।
अवधाय वधायास्य व्यवधाय कृपां क्रुधा शरः ससृजे ॥ ३० ॥

तुच्छस्तच्छरदलितो रामस्वरसंनिभस्वरेण मृगः ।
हा लक्ष्मण सीतेति व्यवहृत्य जहावसूनसूयातः ॥ ३१ ॥

कल्पनमिति जल्पन्तं लक्ष्मणमवलक्षणोक्तिभिः सीता ।
निर्गमयामास बलाद् दुर्गतमारीचनीचवाग्भीता ॥ ३२ ॥

अन्तरमिदमिति मत्वा प्रान्तरवर्त्येव भिक्षुरूपधरः ।
अह्नीरपजह्रे तां श्वा हविरिव रावणो वनात् सीताम् ॥ ३३ ॥

अपहरति तदा तस्मिन्नपभीरभ्येत्य गृध्रराडफणत् ।
जहिहि वधूं तव नो चेदहिमांशुसखैः शिरश्छिनद्मि नखैः ॥ ३४ ॥

इति गृध्रपतिः क्रुद्धः कुध्र इव प्रौढपक्ष उड्डीय ।
मूर्ध्नस्तस्य किरीटं पादाघातेन पातयामास ॥ ३५ ॥

अथ शरजालं विकिरति रथवर्तिनि रावणे जटायुरिषून् ।
पक्षाभ्यामुत्क्षिप्य प्रबभञ्ज मनोरथं यथास्य रथम् ॥ ३६ ॥

निजखरनखरमुखैस्तं भुजपृष्ठशिरःसु गृध्रराड् छिन्दन् ।
मृत्युमवेहि त्वं मामित्युदवोचन्निकृत्तकङ्कटकः ॥ ३७ ॥

छत्रध्वजविध्वंसी पत्ररथश्चित्रमाततान रणे ।
नखरैस्तस्य शरीरं सव्रणमापादमस्तकं स खरैः ॥ ३८ ॥

स्रस्तशिरस्त्राणतया मस्तकबहुलप्रसक्तपादहतिः ।
भग्नधनुर्न जिहिण्डे तुण्डेन स तेन चण्डवीर्येण ॥ ३९ ॥

क्रोधादथ स दुरात्मा साधारणविक्रमो विहाय सतीम् ।
अच्छिनदसिना पक्षौ स च्छिन्नतनूरुहोऽपतद् भूमौ ॥ ४० ॥

क्रुद्धतया सुरपतिकृतयुद्धतया तत्र भूरिवृद्धतया ।
उद्धतरिपुविद्धतया स जटायुरतीव दुर्घटायुरभूत् ॥ ४१ ॥

ईशं प्रति शोचन्तीमाशंसन्तीमुदश्रु मुञ्चन्तीम् ।
स जहार बलादबला[1]मजहारमिवात्महानिदं व्याघ्रः ॥ ४२ ॥

हा राम महाबाहो क्वासि हरत्येष पाहि पाप इति ।
अकृशं क्रोशन्ती सा सीता पापेन रक्षसा नीता ॥ ४३ ॥

उत्तुङ्गे गिरिशृङ्गे हरिमिव हरिमध्यगं हरिं दृष्ट्वा ।
न्यक्षिपदाभरणानि प्राक्षिपदश्रूणि च प्रियप्रियधीः ॥ ४४ ॥

बिभ्रत् तामतिवेगाद् बिभ्यद् रामाद् द्विषत्तमः सोमात् ।
तीर्णपयोधिस्तूर्णं लङ्कामधिगत्य सोऽत्यजच्छङ्काम् ॥ ४५ ॥

[1] *ajahāra* seems to be intended in the sense of *ajagara*.

वातेन तरीवाब्धौ सा तेन प्रापितापिकां लङ्काम् ।
विरराज न राजसुता रहिता रामेण साभिरामेण ॥ ४६ ॥

साशोकवनीमध्ये भीशोकविधायिराक्षसीमध्ये ।
निक्षिप्ता रक्षायै प्रक्षिप्ता वागिवाप नानुगतिम् ॥ ४७ ॥

दीना दानवयोषाधीना न रराज राजसिंहवधूः ।
मृगयुसमीरितमृगयाकुशलवधूटीकुलावृतेव मृगी ॥ ४८ ॥

साशोकवनीमध्यं गमितापि गतापि राक्षसीमध्यम् ।
अन्तर एव निरन्तरमवतस्थे राममेव मन्वाना ॥ ४९ ॥

स्वामिन् मामत्रस्थां श्रीमन् को वा ब्रवीति काकुत्स्थ ।
कथमायासि कथं वा पापं प्रणिहत्य मां समुद्धरसि ॥ ५० ॥

नक्तंदिवमित्थं सा नक्तंचरनाशनिश्चिताशंसा ।
भर्तुर्जयमपहर्तुः कर्तुं च पराजयं जजाप हरिम् ॥ ५१ ॥

निर्णिद्रमभद्रमरेर्भर्तुर्भद्रं च रामभद्रस्य ।
विधिवत् सुविधित्सुरिलावत्सा श्रीवत्सलाञ्छनं दध्यौ ॥ ५२ ॥

रामस्तदनु मरिष्यन्मारीचोक्त्यातिसंदिहानमनाः ।
सहसायान्तं लक्ष्मणमाह किमेषीति तां विना सीताम् ॥ ५३ ॥

मायामारीचवचो मा भैषीर्मातरित्यपि प्रवदन् ।
दुःश्रवदुर्वचनैरहमुत्सारित एवमार्तयास्मि तया ॥ ५४ ॥

इति वदता सममसमं प्रतिपद्य निजानुजन्मनात्मवनम् ।
सत्वरमगमद् रामश्चत्वरमुटजस्य तत्त्ववित्प्रवरः ॥ ५५ ॥

अनिरीक्ष्य सतीं तत्र स्वनिरीक्षणलोलचक्षुषं सीताम् ।
अनुकम्पितचेतस्कः क नु सेति चकम्प तत्र तत्र चरन् ॥ ५६ ॥

चलमपि चेतः स शुचा पुनरपि मनसा निगृह्य धीरः सन् ।
प्रचचार वनं सर्वं विचचार निजानुजेन वीरेण ॥ ५७ ॥

क्रुद्धा क्वासि प्रेयसि पासि प्रणयेन मां पुरा सीते ।
चिरमात्मपिधानं ते परमात्मशुचे हि तत् प्रसीद सति ॥ ५८ ॥

प्रहितो मृगहरणार्थं न हि तं नयतीति मय्यतीव रुषा ।
गुप्तासि क्वापि वने क्लृप्ताकारः स मायया निहतः ॥ ५९ ॥

व्याहर न व्याहर वा देवि परं देहि दर्शनं हि परम् ।
इति विततव्याहृतिकं प्रतितरुकुञ्जं चचार वनपुञ्जे ॥ ६० ॥

तदनु स दनुजविरोधादनुजाय जगाद जानकी नेति ।
भक्षितमथवा सीतारूपं हिंस्रेण किं ब्रुवे पापम् ॥ ६१ ॥

सीताविरहेण तदा नेता जगतां सलक्ष्मणो रामः ।
तददर्शनदुःखार्तः स ददर्श रणाजिरं वने विचरन् ॥ ६२ ॥

अयि लक्ष्मण पश्यैतद् रणलक्ष्म निपातितं सितच्छत्रम् ।
छिन्नं धनुरिषुजालं भग्नं च शताङ्गमभ्युपेताङ्गम् ॥ ६३ ॥

सीतामिषलाभाय स्फीताकाङ्क्षाकयोः[1] कयोश्चिदिह ।
रजनीचरयोरुभयोरजनीति विभाति दारुणो हि रणः ॥ ६४ ॥

[1] Absence of shortening in the expression *sphītākāṅkṣākayoḥ* is according to the rule: *āpo 'nyatarasyām* (VII. 4. 15).

भुवि पतितमदूरे हरिपविहतपक्षावनीधरप्रतिमम् ।
स ददर्श खगेन्द्रं तं निजदर्शनवाञ्छयैव जीवन्तम् ॥ ६५ ॥

आनय ननु सौमित्रे चापं पापं निहन्मि पश्यैनम् ।
एष चखाद सतीं खगवेषधरः कोऽपि दानवोऽभिनवः ॥ ६६ ॥

इति वदति तदा रामे रामाविरहेण दूयमाने तम् ।
आह जटायुरुपेतं मा जहि हतमद्य मां पुनः स्वामिन् ॥ ६७ ॥

तव भार्यामपहरता स्ववनान्निहतोऽस्मि रावणेन रणे ।
तावत् तां मोचयितुं यावच्छक्त्या नियुध्य वृद्धतया ॥ ६८ ॥

रामारिविराम हरे रणकर्कशमेव रावणं जाने ।
मां च सतीं राम त्वं मोचयसीति क्षपाचरेऽभ्यचरम् ॥ ६९ ॥

सर्वेश्वर किं कुर्वे सर्वेण बलेन तं रणे व्यरुणम् ।
चिरयसि चीराजिनधर पापादेवावयोरये स्वामिन् ॥ ७० ॥

प्रजहार स मां रामापजहार भवन्मनोरमां रामाम् ।
इति स जटायुरुदीर्य प्रतिवीक्ष्य च राममस्फुटायुरभूत् ॥ ७१ ॥

अयि खगराज महात्मन् दयिताहर्तू रिपोर्निवासः क्व ।
क्व गतः केन पथेति प्रवदति रामे जहावहो प्राणान् ॥ ७२ ॥

रामस्तमथाश्लिष्य स्वपितुर्दुरवापमम्बु नैवापम् ।
दत्त्वा सत्कृतिपूर्वकमगमयदपुनर्भवं पदं विष्णोः ॥ ७३ ॥

स जराजर्जरदेहाद् द्विजराजः प्राप दिव्यवरदेहम् ।
जगदीश्वरकरुणायां जगति न हि क्वापि दुर्लभं किमपि ॥ ७४ ॥

तावथ तामेव सतीं ध्यायन्तौ तत्र तत्र कायन्तौ ।
चेरतुरखिलं च वनं फेरवभल्लूकसैरिभेभवनम् ॥ ७५ ॥

भूयो भूयो भूमीतनयामनयेन रक्षसा नीताम् ।
प्रतिगिरिकन्दरशिखरं प्रतिहतविरति प्रचेरतुः प्राप्तुम् ॥ ७६ ॥

न दिवा न निशा नोभे संध्ये न स्नानपानदानादि ।
सीतान्वेषणलालसमनसोर्मनसो जगाम गोचरताम् ॥ ७७ ॥

पुनरपि यदि सा सीता वनभुवि लक्ष्येत पूर्वपुण्यान्नौ ।
देवानथ भूदेवान् सेवावह इत्यतीव मेनाते ॥ ७८ ॥

तरुलतिकादलचलने मृदुमधुरशकुन्तशावकालापे ।
सीता किमिति भ्रान्तो बभ्राम स राम आ अदभ्राशः ॥ ७९ ॥

तत्र विचित्रस्तबकां कुत्रचिदभिवीक्ष्य वल्लिकामपि काम् ।
रामः काममवाप्ता सीतेति समालिलिङ्ग तामाप्ता ॥ ८० ॥

सीताविरहविलापः सीतापतिमेव केवलं नाप ।
तत्र चराचरजालं चित्रं सकलं च सत्यमपलीलम् ॥ ८१ ॥

स निरन्तरतच्चिन्तनगोचरसीतोपगूहनप्रवणः ।
अस्राकुलदृग् रामो नास्रावयदश्रु कस्य वासीम ॥ ८२ ॥

हरिणा हरिणाक्षीं तां शंसन्त इव ध्रुवं नृशंसहृताम् ।
पश्यति रामे दुद्रुवुरश्रुमुखा दक्षिणां दिशं च वयः ॥ ८३ ॥

पल्लवततिरस्य स्मरफुल्लसमुल्लासिनीहृदुल्लासम् ।
अपदिश्यातिदिशन्ती विपदं विरहे विरोधमेव दधौ ॥ ८४ ॥

हृदयंगममपि कुसुमं हृदयं नामोदयां चकार तदा ।
सौख्ये सौख्यकरं यद् दुःखे दुःखाय तद्धि बुद्धिगतम् ॥ ८५ ॥

लक्ष्मणमाह स रामः पक्ष्मलनयनां विनाद्य तां सीताम् ।
क्षण एव परं वर्षति[1] गणयति न हि मां विधिर्विरोधीव ॥ ८६ ॥

आनय चापमिदानीं मानयतु पराक्रमं ममाद्य विधिः ।
मद्विशिखशिखिशिखावलिमुद्वीक्ष्याकालकल्पितप्रलयाम् ॥ ८७ ॥

इति सीताविरहाद् रघुपतिमुन्मादे कृतास्पदं विपदा ।
विकृतिं परिहृत्य गिरा प्रकृतिं समनीनयन्नयेन कृती ॥ ८८ ॥

तां तदनु विचिन्वन्तावाशामासाद्य दक्षिणां दक्षौ ।
प्रतिगिरि सरिदटवीतटकुटपटलीकुञ्जपुञ्जमैक्षेताम् ॥ ८९ ॥

नारिं नारीं वा तौ चक्रतुरथ रामलक्ष्मणौ साक्षात् ।
अपि तु वने विचरन्तौ कृतभुजबन्धं कबन्धमैक्षेताम् ॥ ९० ॥

पथि तेन गृहीतौ तौ क्षुधितेन तरस्विना हठात् तरसा ।
स्ववशीकृतशस्त्रावपि न वशीकृतबाहुमण्डलावास्ताम् ॥ ९१ ॥

राम हरे नाहमितः शक्नोमि शरीरमद्य मोचयितुम् ।
आशु पलायस्व बलान्मा शुचो मां प्रत्यवाप्स्यसे सीताम् ॥ ९२ ॥

वदतीति सुमित्रायास्तनयेऽस्तनयेऽतिधीरधी रामः ।
तद्भुजमच्छिनदसिना सव्यं कृतधीरथानुजोऽसव्यम् ॥ ९३ ॥

[1] *varṣati* is in the sense of *varṣa ivācarati*.

स छिन्नभुजः सहसा विच्छिन्नमुनीन्द्रशापशुङ् महसा ।
तनुमतनुमितः स्वस्थः कृतनतिरीशं नुनाव च स्वस्थः ॥ ९४ ॥

कस्त्वं ब्रूहि महात्मंस्तत्त्वं जानासि चेत् प्रियां च मम ।
पृष्टो रामेणेति प्राह कबन्धं दहाथ वच्मीति ॥ ९५ ॥

सर्वं प्रददाह तदा तस्य कबन्धं चिताग्निना रामः ।
सौमित्रिसहायः सन् सहसा सद्भक्तवत्सलः खलु सः ॥ ९६ ॥

अथ कथयामास सुधीर्मुनिवृत्तिमदूरवर्तिनीं शबरीम् ।
तामभिगच्छ महात्मन् सा वेत्ति च वक्ति सर्वमिष्टं ते ॥ ९७ ॥

संस्कृतिरेनोनिष्कृतिरुद्गतिमदिशत् सदुद्गतिप्रद मे ।
अनुजानीहि महात्मन् मनुजाधिप लप्स्यसे भुवस्तनयाम् ॥ ९८ ॥

इत्यभिधाय कबन्धः स त्यक्तमुनीन्द्रशापनिर्बन्धः ।
दिव्यं देहमवाप्तो दीव्यन् रामं ययौ तदा त्रिदिवम् ॥ ९९ ॥

तदनु घनाघनलक्ष्मीरनुजसमेतस्ततो वनाद् विचलन् ।
विकचकलापामुद्यत्केकालापां चकार बर्हिततिम् ॥ १०० ॥

स ददर्श वने शबरीं [1]पददर्शनभोजिबर्हसत्कबरीम् ।
मीलितदृशमपि योगोन्मीलितदृग्गोचरात्मसुखयोगाम् ॥ १०१ ॥

[1] The following seems to be the significance.

pade darśanaṃ yasya tat; *padadarśanam* is in the sense of *padadarśitam*; *tat bhoktuṃ śīlaṃ yeṣāṃ te, padadarśanabhojino mayūrāḥ* (*supyajātau ṇinistācchīlye*); *teṣāṃ barhatulyā satkabarī* (*keśaveśaḥ*) *yasyāḥ sā, tām* (see verse 120). The expression *padadarśanabhojin* may be a *mayūrasvabhāvavarṇanam* in this context. On the way to Śabarī's

चमरीचञ्चलवालधिसमरीतिविराजमानसत्कबरी ।
शफरीशुभरीतिकदृक्छबरी न बरीभरीति किं भाग्यम् ॥ १०२ ॥

सानुजमथ तं रामं मानुजरूपेण मङ्गलायतनम् ।
संभाव्य हरिं मनसा संभाव्यपदस्य सापतत् पद्योः ॥ १०३ ॥

स तदा च तदातिथ्यं मेध्यं गृहमेध्यनुक्रमाद् रामः ।
गृह्णन्ननुजनिसहितो महितो मखवानिवाध्वरे सुहितः ॥ १०४ ॥

मुमुदे स तदा रामः पदपद्मपवित्रिताखिलारामः ।
यद् यत् फलमदिशत् सा तत्तद्गृह्णादनुग्रहात् तस्याम् ॥ १०५ ॥

वसुधाधिपतिः स सुधासमधुरमधु रञ्जनं हृदो मधुरम् ।
पीत्वाथ पदाब्जनतां पप्रच्छ स्वप्रियास्थितिं शबरीम् ॥ १०६ ॥

सापि निदध्यौ सिद्धा किंचिन्नयने निमील्य संबुद्धा ।
लङ्कानगरोद्याने पङ्काकुलहस्तिनीमिवाह घने ॥ १०७ ॥

आर्यास्य हि कार्यस्य तु कार्या सूर्यात्मजन्मना[1] मैत्री ।
असुहृद्धृत एव स ते स्वसुहृत् सीतापि सा समानीता ॥ १०८ ॥

hermitage peacocks were perhaps seen picking up and eating some small things that became visible in the footprints left by Śabarī while she walked around.

[1] *sūryātmajanman* means Sugrīva. Cf. *V.R.*, Āraṇya, canto 72, v. 20; also see Uttarakāṇḍa, the canto after 37th Sarga. In the *V.R.*, it was Kabandha, and not Śabarī, that advised Rāma to make friends with Sugrīva, for his purpose. (See *V.R.*, Āraṇya. canto 72, verses 10, 11 and 15, etc.)

न तवाविदितं किंचित् कितवातिविदूर[1] विद्यते जगति ।
स्रष्टुः कथमज्ञानं कथमज्ञानेऽवनं ततो ल्वनम्[2] ॥ १०९ ॥

सर्वज्ञः सर्वविदिति सर्वमयस्त्वं हि गीयसे श्रुतिभिः ।
अगुणो गुणमय्या त्वं सृजनादिषु वर्तसेऽजयात्तजय ॥ ११० ॥

सत्त्वरजस्तमसां त्वं सृष्टिस्थितिनाशहेतुभूतानाम् ।
आधाराधारतया विधिविधुविधुभृत्स्वरूपमुद्वहसि[3] ॥ १११ ॥

आर्तत्राणपरायण नारायण राम रावणं हन्तुम् ।
अवतीर्णोऽसि दयाब्धे भव एष तु दासमानसोल्लासः ॥ ११२ ॥

नित्यं निवसति तव हृदि सत्यं वक्ष्यामि सा रमा परमा ।
नीता या सा नूनं सीता समराय दर्शिकादर्शि ॥ ११३ ॥

संततमनुचिन्तयति त्वामेव शिवः शिवासनाथः सन्[4] ।
भक्ताय भवोत्तारक भावत्कं नाममन्त्रमुपदिशति ॥ ११४ ॥

[1] *kitavātividūra* seems to be in the sense of one who cannot be cheated by rogues, one for whom nothing is remote.

[2] This line seems to convey the idea of the *sṛṣṭi*, *sthiti* and *saṃhāra* of *jagat*, for which Viṣṇu is said to be, in fact, responsible (meaning in essence the omniscience and omnipotence of Viṣṇu).

[3] *vidhi-vidhu-vidhubhṛt* mean respectively Brahmā, Viṣṇu and Maheśvara. *Vidhur Viṣṇau* is in *Amarakośa*.

[4] See also the *Viṣṇusahasranāma* (of the *Mahābhārata*) at the end: *pārvaty uvāca*: '*kenopāyena laghunā*', etc. and *īśvara uvāca*:

śrīrāma rāma rāmeti rame rāme manorame,
sahasranāmatastulyaṃ rāmanāma varānane.

शमयति परमपि पापं गमयति चागण्यपुण्यमङ्घ्रिपयः ।
श्रीमन् राम महात्मन् महिमा न हि मादृशः पदं वचसाम् ॥ ११५ ॥

फणिपतिरपि फणितिपतिर्नालं महिमानमीश ते फणितुम् ।
यत्पदपङ्कजरजसा विचिचेत सचेतना शिला सहसा ॥ ११६ ॥

सर्वे हि सुपर्वाणः सर्वेश्वर शर्वरीशभृत्प्रमुखाः ।
प्रार्थयमाना नित्यं स्वार्थमुपायन्ति संहृतापायम् ॥ ११७ ॥

त्वन्नाभिसमुत्पन्नस्तं नापन् न प्रपन्नकल्पतरो ।
अपरनिमित्तकता न व्यपदिशति तवेश नान्तरङ्गत्वम्[1] ॥ ११८ ॥

रामानन्दघन श्रीरामानन्दाय लीलयात्ततनुः ।
रामा नन्दति संश्रितकामानन्दप्रद प्रसीद विभो ॥ ११९ ॥

शबरी कबरीभरजितपिञ्छा वाञ्छाभिपूर्तये दास्यम् ।
कुर्वाणा गीर्वाणाधिपदुरवापं परं पदं प्राप ॥ १२० ॥

राम प्राक्तनपुण्यस्तोमपरीपाकभागधेयान्मे ।
भावत्कपदाब्जनतिस्तावत् प्राप्ता भवाद् विमुक्तास्मि ॥ १२१ ॥

योगेन स युञ्जानां रामो रामामथाधिजानानाम् ।
प्रस्तुतकार्यसहायः प्रस्तुतसौरिः क्व तिष्ठतीत्याह ॥ १२२ ॥

[1] This is a reference to the *antaraṅga* and *bahiraṅga* of the grammarians connected with the *paribhāṣā* '*asiddhaṃ bahiraṅgam antaraṅge*'.

सापि ततः संतुष्टा सुग्रीवमुदग्रपौरुषं पृष्टा ।
रामं विस्मयमानं विस्मयमाना जगाद सा भूयः ॥ १२३ ॥

मन्त्रिचतुष्टयसहितो यन्त्रित इव शैल ऋष्यमूकाख्ये ।
भ्रातुः स भयादभयं प्रेप्सुः प्रावर्तताविदूरे नः ॥ १२४ ॥

इति तद्वचनं श्रुत्वा रामो राजीवलोचनः प्रेम्णा ।
अभिनन्द्य तां कृतार्थामभियुक्ततयाथ निर्जगाम पुनः ॥ १२५ ॥

तावथ घनवनपदवीमुदवहतां राघवावुभावहताम् ।
सीताविरहदुरन्ता रन्तारं राममन्वगाच्चिन्ता ॥ १२६ ॥

नवपल्लवपुष्पफलस्तवनीयवनश्रियं निपीय दृशा ।
रामः स स्मृतरामः सहचरमिदमाह तत्र सौमित्रिम् ॥ १२७ ॥

जारानुरक्तचित्ता योषेव स्वैरिणी वरायत्ता ।
आरोपितापि हृदयं श्रयति परं मे न धीरता स्थिरताम् ॥ १२८ ॥

वृकमध्यगताजेव व्याघ्रीव्रजमध्यगता मृगीव च सा ।
रक्षोमध्यमवाप्ता कथय कथं जीवति प्रियानाप्ता ॥ १२९ ॥

मुक्ताफलविमलद्विजमुक्तामृतधामलाघवं लपनम् ।
ननु विनिरीक्षे तस्याः क्व नु मन्दस्मेरमञ्जुलालपनम् ॥ १३० ॥

निरपायसुखोपायं पायं पायं प्रियामुखं भूयः ।
राकाचन्द्रच्छायं शोकानलतापमुत्सृजामि कदा ॥ १३१ ॥

मुक्ताहारविहीना मुक्ताहारा मुदा विहीना सा ।
मामेव ध्यायन्ती मा मे कालं प्रयापयन्तीति ॥ १३२ ॥

इति प्रतिकलं कलामिव विनिर्मलां विस्मृतां
सतीमतिमनोहरां मनसि रामभद्रः स्मरन् ।
स्वतीरतरुपुष्पनिष्पतदुदारधूलिच्छटा-
प्रतीतदिविषन्नदीं परमवाप पम्पानदीम्[1] ॥ १३३ ॥

इति श्रीपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये षष्ठः सर्गः

[1] The metre is *pṛthvī*.

सप्तमः सर्गः

अथ विहितविरहिकम्पामधरितसुरदीर्घिकाश्रियं पम्पाम् ।
अवलोक्यानवलोक्यामार्तिं मार्ताण्डवंशकेतुरगात् ॥ १ ॥

लक्ष्मणमाह स रामः पक्ष्मलदृशमेव तां हृदा ध्यायन् ।
क्रूरो मारो मामकचित्ते मत्तेभविक्रियां तनुते ॥ २ ॥

पाम्पेयतटालंकृतिचाम्पेयकुटप्रसूनसंपत्तिः ।
मैथिल्या ननु पङ्कजमधुकरमधुना धुनोति मे हृदयम् ॥ ३ ॥

राजीवराजिरेषा राजीवदृशा पराजिता स्वदृशा ।
सुस्थिरजीवनगा मामस्थिरजीवं चरीकरोति परम् ॥ ४ ॥

उत्पलसंततिरपि मे हृत्पलमत्यन्तमश्नुते विषमे ।
यत्तन्नयनश्रीभरकृत्तश्रीराससाद वैरभरम् ॥ ५ ॥

पाटीरानिलधाटी व्याटीकत एव सौरिपरिपाटीम्[1] ।
तन्मुखमारुतसौरभभरपरिभूतेव यालसीभूता ॥ ६ ॥

आ पम्पावनमेतत् तापं पापावहं ममातनुते ।
यत्तन्निर्मलचित्तश्रीजितमिव निम्नभूतलायत्तम्[2] ॥ ७ ॥

[1] *sauriparipāṭīm* means *paṅgutām*. Sauri is a synonym of Śanaiścara, who is said to be a *paṅgu*.

[2] The idea of the second line is not clear.

असमसुमश्रेणीयं नवपल्लवपङ्क्तिरुल्लसन्ती मे ।
चित्तं कृन्तति कान्दवकुन्तवदवनीसुतापदाब्जजिता[1] ॥ ८ ॥

अनुकम्पारहिता यत्तनुकम्पायैव कल्पते पम्पा ।
ननु कं पाति न सत्यामनुकं पातुं कृतोद्यमा सत्याम् ॥ ९ ॥

इति विलपन्तं रामं मतिमानथ लक्ष्मणो जगाद तदा ।
आर्य: कार्यविदेव न कार्या कार्यापहा मुहुश्चिन्ता ॥ १० ॥

अथ सौमित्रिवचोभि: प्रत्याश्वस्तस्तदा मुदा राम: ।
सकमलममलं कमलं पम्पासरस: पपावुपात्तधृति: ॥ ११ ॥

अथ पम्पातीरतरुच्छायाच्छन्नेन वर्त्मना गच्छन् ।
स मतङ्गगिरे: पार्श्वं साकं सौमित्रिणा ययौ राम: ॥ १२ ॥

तुङ्गमतङ्गगिरिश्रीशिखरशिखाशेखरो हरिर्नृहरी ।
शरचापधरौ शूरौ दृष्ट्वा दुद्राव दूरत: सौरि:[2] ॥ १३ ॥

हितमपि वालिप्रहितं मत्वाहितमेव सौरिरतिभीत: ।
कुहरे क्वापि विलीन: स हनूमन्तं तदाह धीमन्तम् ॥ १४ ॥

याहि हरेऽद्य हनूमन् पाहि सखे मां भयातुरं धीमन् ।
जानीहि किमर्थमित: कावेतौ काननं किमर्थमित: ॥ १५ ॥

[1] *kāndavakunta* seems to be in the sense of *kunta* a (spear) red hot like a *kandu* (a pan).

[2] *Sauri* is *sūryaputra*, i.e. Sugrīva here.

करधृतवरशरचापौ पापापहचीरवाससा रुचिरौ ।
अवगत्य तयोस्तत्त्वं सत्त्वमसत्त्वं नु वा निबोधय मे ॥ १६ ॥

तत्सत्त्वासत्त्वाभ्यां सत्त्वासत्त्वे व्यवस्थिते इह नः ।
भीतिमभीतिं वा मम बोधय करमुद्रया रयादेहि ॥ १७ ॥

इति संदिष्टो हनुमान् मतिमच्चूडामणिर्वटुर्भूत्वा ।
लक्षितशुभलक्षणयोः संनिधिमुदगात् स रामलक्ष्मणयोः ॥ १८ ॥

स विनीतात्मा मारुतिरविनीतिविदूरयोस्तयोश्चरणे ।
प्रणिपत्याह युवां कौ कुत आयातः क वाथ किं याथः ॥ १९ ॥

लोकत्रितयस्य युवां योगक्षेमाय दीक्षिताविव वाम् ।
रूपं दिव्यं परदुष्प्रापं मम शंसतीशतां जगताम् ॥ २० ॥

अनुभावविशेषं वामनुभावयतीयमाकृतिर्भव्या ।
अजगद्भर्तरि नेयं [1]त्रिजगज्जनमोहनाकृतिर्दृष्टा ॥ २१ ॥

किं किं नु चिकीर्षुर्वा कामं वैकुण्ठनायकोऽयमिह ।
भुवमवतीर्णो ध्रुवमिति रूढा मतिरद्य मां समारूढा ॥ २२ ॥

तावत्सेवकशेवधिभावत्कपदाम्बुजद्वयीप्रणतिः ।
दुस्तरदुरिताम्भोनिधिनिस्तरणायास्तु मे परं तरणिः ॥ २३ ॥

किं किं नु मया पूर्वं सुचरितमतिदुश्चरं समाचरितम् ।
यत्तावकचरणाब्जद्वयगोचरचाक्षुषप्रमाद्य मम ॥ २४ ॥

[1] MS. A reads . . . *nedaṃ jagadīśvara deva dṛśyate rūpam.*

पृच्छन्तमिति स्वच्छं प्रच्छन्नहरिर्हरिं प्रति प्राह ।
दशरथराजकुमारावावां श्रीरामलक्ष्मणौ नाम्ना ॥ २५ ॥

शासनतः पितुरवसं ससतीकः सानुजोऽहमद्य वने ।
शासितरक्षा रक्षोनीतवधूकोऽस्मि तां विचेतुमितः ॥ २६ ॥

स निशम्य वचः सम्यक् फणितं रामेण मारुतिर्भूयः ।
आह महात्मन्नास्ते सुग्रीव इति क्षमाभृतो मस्ते ॥ २७ ॥

वानरराजो बलवान् काननचरकृत्स्नतत्त्ववित् कृतवित् ।
ज्यायोहृतनिजजायो गुणवान् गुणवन्तमीहतेऽवन्तम् ॥ २८ ॥

श्रीमन् राम महात्मन् मैत्री यदि तेन ते नतेन भवेत् ।
पुनरानीतैव वधूस्तव स वधूहृच्च संगरक्षितिधूः ॥ २९ ॥

दिवि भुवि दिक्षु विदिक्षु क्वापि न दृष्टं नदृष्टमेतेन ।
भवतो वनिताहारी भवतस्तेजोऽनले भवेच्छलभः ॥ ३० ॥

मन्त्रिचतुष्टयसहितो यन्त्रित इव शैलमस्तके वसति ।
वालिविरोधादसत्स्वामी स निमीलितार्कवत् स्वामिन् ॥ ३१ ॥

इति वदति हनूमति तं रामः पुनराह तं दिदृक्षुरहम् ।
मुख्यं मम तेन समं सख्यं कर्तुं समागतोऽस्मि वटो ॥ ३२ ॥

आहानुजमथ रामो नायं स य एव पश्य न प्रपटुः ।
अपि तु सुसत्कृतवक्ता विद्वाननवद्यशब्दविद्यायाम् ॥ ३३ ॥

परमानन्दमथाप्तः परमानन्दस्य राघवस्याप्तः ।
वानरमाहात्मानं स्वाङ्गेन स वज्रघातलिङ्गेन[1] ॥ ३४ ॥

[1] For the significance of *vajraghātaliṅga*, see Uttarakāṇḍa, canto 35, vv. 46 and 47; and canto 36, v. 61.

अधितिष्ठ मम स्कन्धं सममनुजेनेव सद्गजस्कन्धम् ।
देशं तं तु नयेयं यत्र स राजा वनौकसां वसति ॥ ३५ ॥

इति पावनिना प्रोक्तो गतिसौकर्याय राघवः प्रेम्णा ।
स तथेति भ्रात्रा तं सवितेवानूरुणोदयं प्रायात् ॥ ३६ ॥

मेने मनसि हनूमान् ऐहिकमामुष्मिकं च मे लब्धम् ।
स्वसुहृल्लाभाद् राजा स्वयमयत्नलाभात् कृतार्थ एवेति ॥ ३७ ॥

श्रीरामकृपामूलकधीरानन्दात् तथा स संववृधे ।
शैलोऽपि शिलेवाङ्घ्रिस्पर्शात् किं चेततीति धीरुद्भूत् ॥ ३८ ॥

सकृदपि यस्य स्मरणं दुस्तरसंसारसागरोत्तरणम् ।
भक्त्या तं भगवन्तं भुजशिरसि वहन् कथं कृतार्थो न ॥ ३९ ॥

हंसालसगति स सुधीः स्वांसोत्तंसायमानदाशरथिः ।
गत्वाथ गिरेर्मूर्धनि ताववतार्यानयच्च सुग्रीवम् ॥ ४० ॥

प्रणनाम दण्डवद् भुवि गणनातीतेन पूर्वपुण्येन ।
शाखास्तरणगताभ्यां शाखामृगचक्रवर्त्यलं ताभ्याम् ॥ ४१ ॥

अञ्जलिपुटघटितशिराः कञ्जदृशे त्रिः प्रदक्षिणप्रणतीः ।
कृत्वा तदनुज्ञातः प्रस्थे राजा वनौकसां तस्थौ ॥ ४२ ॥

पावनिविनिवेदितरघुपतिमतिरतिमोदमेदुरस्वान्तः ।
पश्येति स निक्षिप्तं सीतालंकारभारमर्पितवान् ॥ ४३ ॥

निध्याय निधायोरसि दध्यावाध्यब्धिमग्नधीरथ तम् ।
स निरर्गलगलदश्रुभिरधरीचक्रे घनं यथाङ्गरुचा ॥ ४४ ॥

आकृत्यमृतनिपानप्राप्तानिमिषत्वमास्थिरीकर्तुम् ।
वदनसुधांशुविनिर्यद्वचनसुधापानलोलुपो हरिराट् ॥ ४५ ॥

प्रत्यग्रवधूविरहव्यग्रो वीराग्रणीरनुग्राह्य ।
स्वसुहृद्भावेनाग्रे सुग्रीवमुदग्रमग्रहीत् स्वगिरा ॥ ४६ ॥

उत्तरकोसलदेशे चित्तहरे कापि पूरयोध्येति ।
दशरथ इति तद्राजः समरक्षुण्णाखिलद्विषद्राजः ॥ ४७ ॥

तत्प्रथमतनूजोऽहं रामो नाम्नैष लक्ष्मणोऽवरजः ।
पितुरादेशादधिवनमवसं सीताभिधानया पत्न्या ॥ ४८ ॥

मायाविरचितविवरे सीता पापेन रक्षसा नीता ।
तामेव विचेतुमितस्त्वामेव सुहृत्तयाधिगन्तुमितः ॥ ४९ ॥

विरमति रामे रामाविरहविधूतेन चेतसा वचनम् ।
काननगोचरनाथो मानवनाथं नमन्नमन्नाह ॥ ५० ॥

जाने तमहं पापं ससुरासुरवीरदुर्जयं स्वामिन् ।
अपि तं कुपितं सहसा हन्यामन्यायवर्तिनं भगवन् ॥ ५१ ॥

धन्यां धरणीकन्यामन्यायपथप्रवर्तिना नीताम् ।
सीतां पुनरानीतां निश्चिनु मनसा निरामयोऽस्मि सखा ॥ ५२ ॥

अपि तु मम प्रतिबन्धः स्वच्छन्दगतस्य वालिनो बलिनः ।
ज्यायानतिपापीयांस्तद्भीतोऽत्रैव पर्वते न्यवसम् ॥ ५३ ॥

स्वयमेव स मद्भार्यां भुङ्क्ते निष्कास्य मां बलादसमाम् ।
अपि सकलं साम्राज्यं कुपिते प्रबिभेति तत्र मृत्युरपि ॥ ५४ ॥

मुनिशापाद् दुरवापस्तस्यैष गिरिस्तु मेऽभवच्छरणम् ।
संप्रति न प्रतिबन्धः शरणं यदि राम मे भवच्चरणम् ॥ ५५ ॥

इत्युक्तवति कपीन्द्रे निस्तन्द्रमतिः स रामचन्द्रोऽथ ।
अवदत् तव भार्यां यो जह्रे तमहं क्षणाद्धनिष्यामि ॥ ५६ ॥

तदनु हनूमत्कल्पितवह्निप्रत्यक्षसाक्षिकं सख्यम् ।
उपगूढपरस्परकं नरवानरचक्रवर्तिनोरुदभूत् ॥ ५७ ॥

अथ संतुष्टाः सर्वे सर्वेश्वररामसौहृदावाप्त्या ।
वालिनमतुलभुजाबलशालिनमपि मेनिरे गतं हरयः ॥ ५८ ॥

वालिविरोधनिमित्तं पृच्छति रामे फफाण सौरिस्तम् ।
श्रीमन् राम महात्मन् छृणु वक्ष्यामीति सत्कृतः स कृती ॥ ५९ ॥

दुर्मदमत्तो दृष्टः कश्चिद्दैत्यः कदाचिदागत्य ।
मायावीति निशीथे किष्किन्धाद्वारि वालिना युयुधे ॥ ६० ॥

अथ युधि सोढुमशक्तः शक्तं नक्तंचरो हरीन्द्रं तम् ।
प्रपलाय्य गिरेर्विवरं प्राविशदतिभीतहृन्महातिमिरम् ॥ ६१ ॥

वाली कनकमयाम्बुजमाली तमनुद्रुतो द्रुतं स बिलम् ।
प्रविशन् मामाह तदा निवसावहितोऽत्र तं त्वहं हन्याम् ॥ ६२ ॥

इति मामादिश्य गुहामविशद् बलसूदनात्मजः स महान् ।
स पुनरियायापि चिरं न पुनरथास्रं तु फेनिलं निरगात् ॥ ६३ ॥

विरचितभयमस्रं तन्निरचिनवमवेक्ष्य वालिनं निहतम् ।
अपिधाय शिलाभिस्तत् कपिधाम गतोऽस्मि शुम्भयानुगतः ॥ ६४ ॥

अतिदुःखमनिच्छन्तं भ्रातुः स्नेहेन मां तदा हरयः ।
मत्तः श्रुतवालिवधाश्चित्तहरे मां प्रत्यपादयन् राज्ये ॥ ६५ ॥

खरतरभुजपरिघाहतिशकलीकृततद्गुहापिधानशिलः ।
वाली बहुबलशाली निर्गत्य रुषाथ निर्दहन्निव माम् ॥ ६६ ॥

पदयोः प्रणमन्तं मामदयो नगरान्निरागसं वीरः ।
विनिरस्य रुमामपि मे वनितां जनितानयः स्वयं भुङ्क्ते ॥ ६७ ॥

उद्भटतद्धाटीभिः पटुरयमटिताखिलप्रपञ्चतया ।
गतिविजितसदागतिकः कतिधा न दधाव तद्भियागतिकः ॥ ६८ ॥

अथ दुर्मददुर्ललितः प्रथमः प्रथमानयुद्धकाङ्क्षाकः ।
जितजगतिरभीर्दुन्दुभिरिति दनुजः कश्चिदाप किष्किन्धाम् ॥ ६९ ॥

सैरिभवेषधरः सन् वैरिभयाधायितुङ्गशृङ्गयुगः ।
चरणाधूतक्षितिकः स रणाय जुहाव वालिनं बलिनम् ॥ ७० ॥

वाली निस्तुलभुजबलशाली शूराग्रणीः स्फुरन्माली ।
उग्राकारमरिं तं जग्राह रुषा विषाणयोर्हन्तुम् ॥ ७१ ॥

शतवारमरातिं तं कृतवान् कृतचक्रविभ्रमं धीरः ।
दुःक्षेपमपि क्षीबं चिक्षेप बलावलेपतो दूरम् ॥ ७२ ॥

धीरेऽस्य गिरेर्मूर्धनि दूरे पतितः परं शिलादलितः ।
गिरिरिव निर्झरधारा अरिरथ रुधिरं वमन् जहौ प्राणान् ॥ ७३ ॥

दुन्दुभितनुचलितासृग्बिन्दुभिरतिदूषितं वनं दृष्ट्वा ।
स मतङ्गमहामुनिरथ विमतं विशशाप वालिनं रुष्ट्वा ॥ ७४ ॥

यद्यत्र गिरौ वाली भिद्यत एवाशु तच्छिरः शतधा ।
इति रोषपरीतात्मा गतिमस्माकं प्रकल्पयामास ॥ ७५ ॥

स्वसदृशशूरमपश्यन्नसदृशभूसारशौर्यशालितया ।
सकृदेव सप्त सालान् स कृती विजिगाय निर्दलं चलयन् ॥ ७६ ॥

त्रिजगति नहि कोऽपि पुमान् गजगतिनानेन वालिना तुल्यः ।
अधिबलदुर्जयविक्रमनिधिरयमिति शङ्कते मनो नृपते ॥ ७७ ॥

दुन्दुभिदुष्टकलेबरमेतद् गिरिकूटवद् विभाति विभो ।
यदि चलयसि विश्वासो हृदि मे भगवन् भवत्यनिश्वासः ॥ ७८ ॥

इति कपिपतिकामनया क्षितिपतिरथ लीलया वपुस्तदलम् ।
स्वपदाङ्गुष्ठेनैनं त्रपयन् चिक्षेप योजनानि दश ॥ ७९ ॥

रामोऽथामोदकरः स्वामोघशरेण सप्तसालं च ।
छिन्दन्नन्तिकगिरिमपि भिन्दन्नपसंशयं चकार कपिम् ॥ ८० ॥

प्रमितामितसारशरं प्रमितारिवधं रघूत्तमं रामम् ।
स सहस्रमयूखसुतः सुसहायमवाप्य भानुवत् प्रबभौ ॥ ८१ ॥

स्वयमेवानुबुभूषुर्लोके लोकैकशूरशब्दमयम् ।
रामः शत्रुविरामः सुग्रीवमुदग्रपौरुषोऽवादीत् ॥ ८२ ॥

सुग्रीवाग्रजमुग्रं युद्धाय समाह्वयालमद्यैव ।
वृक्षान्तरितस्तिष्ठन् रूक्षं तं हन्मि युध्यतोर्युवयोः ॥ ८३ ॥

सुग्रीवोऽथ तथा हीत्युक्त्वा गत्वा तदैव किष्किन्धाम् ।
हरिरिव गर्जन्नग्रजमेहि रणायेति दुर्जयं न्यगदत् ॥ ८४ ॥

श्रृण्वन्नेव स वाली सुग्रीवोदग्रगर्जितं रोषात् ।
पदहतपन्नगवरवन्नगरान्निर्गत्य तं जघान घनः ॥ ८५ ॥

सुग्रीवोऽपि तदानीमग्रजमतिवेगतो जघान घनम् ।
सोऽप्येनमसौ तं स च पुनरप्येनं पुनश्च तं चासौ ॥ ८६ ॥

खरतरनखदंष्ट्राभिर्वज्राघाताभमुष्टिघातैश्च ।
अतिदारुणरण उभयोरिभयोरिव मत्तयोर्बभूव तयोः ॥ ८७ ॥

समृधे ववृधे वाली सुग्रीवः संकुचन्नसुग्रीवः ।
किं नायाति रघूत्तमशर इति खिन्नान्तरोऽन्तरे निरगात् ॥ ८८ ॥

सस्मयमस्मद्वीर्यं विस्मरसि किमित्यथ स्मयन्ननुजम् ।
निर्जित निर्जीवः स्या यदि पुनरेषीति वाल्यगादुक्त्वा ॥ ८९ ॥

सुग्रीवोऽसुग्रीवो रघुपतिमलघुश्रियं समाश्रित्य ।
राजन् यदि मयि वैरं त्वं जहि किं तेन घातयिष्यसि माम् ॥ ९० ॥

इति गलदश्रुर्वानरपतिहतमात्मानमर्पयन् पदयोः ।
रामं रम्यगुणोदधिसोमं शरणं जगर्ह दुर्गर्हम् ॥ ९१ ॥

स दयानिधिरपि दयया सोदरमिव सौहृदादतीव नतम् ।
आश्लिष्याह यतोऽहं नियतोऽपि न मुक्तवानिषुं श्रृणु तत् ॥ ९२ ॥

युवयोः सदृशाहवयोः सवयोरूपप्रभावभारवयोः ।
न भिदालक्षि तदानीं स्वभिदाशङ्का शरं रुरोध सखे ॥ ९३ ॥

अङ्कं कंचन कृत्वाशङ्कं पुनराहवाय याहि त्वम् ।
अहितं निश्चिनु निहतं विहितं वक्ष्यामि नात्र संदेहः ॥ ९४ ॥

अथ सौमित्रिरदूरे पुष्पितगजपुष्पवल्लिकां छित्वा ।
सुग्रीवग्रीवायां ग्रैवेयमिवाबबन्ध बान्धव्यात् ॥ ९५ ॥

स तया शुशुभेऽत्यर्थं लतया धृतमङ्गलं गलं गतया ।
उडुराजिराजितद्विजराजविराजत्प्रभापरीततनुः ॥ ९६ ॥

मूर्तेव जयश्रीः सा लतिका रघुवीरसत्कृपालतिका ।
तमशोभयतात्यन्तं तमसा मुक्तं कलानिधिं सेव ॥ ९७ ॥

पुनरपि कपिकुलनाथो रघुकुलनाथेन चोदितः स तदा ।
किष्किन्धामधिगत्य प्रधनाय जगर्ज दुर्जयश्रीकः ॥ ९८ ॥

वाली परबलहरदोःशाली श्रुत्वैव गर्जितं तस्य ।
स रमामर्षविधायकपरमामर्षेण निर्जगाम गृहात् ॥ ९९ ॥

साध्वी साध्वीशं तं तारा ताराधिपाननाह तदा ।
आयाहि न याहि विभो न रणं शरणं शृणु प्रियावचनम् ॥ १०० ॥

दशरथराजकुमारो रामो राजीवलोचनोऽधिवनम् ।
रक्षोहृतरमणीकः सख्यं चक्रेऽग्निसाक्षिकं भ्रात्रा ॥ १०१ ॥

तावरिनिग्रहपूर्वकदुर्ग्रहरमणीमणिग्रहव्यग्रौ ।
आस्तामङ्गदवदनादश्रौषमशेषमेतदस्मि सभीः ॥ १०२ ॥

शैशव एव जितारिः शैवं धनुराबभञ्ज सीतायै ।
विजितखरादिसुरारिः सुररिपुराजापनीतसीत इति ॥ १०३ ॥

न्यगदज्जगदेकधनुर्धर इति कनकाङ्गदोऽङ्गदोऽङ्ग दरम् ।
गतवत्यस्मि सुतं मां पाहि जहि द्वेषमद्य सुग्रीवे ॥ १०४ ॥

अभिषेचय सुग्रीवं स्वयमाहूयैव यौवराज्ये तम् ।
रामः सुगुणारामः शरणं भविता दयार्द्रधीरपि नः ॥ १०५ ॥

इति जल्पन्तीं कान्तां कान्तारचरेश्वरः समाश्लिष्य ।
योषासि बिभेषि त्वं मा भैषीर्मे भयं कुतो रामात् ॥ १०६ ॥

सुग्रीवेण द्विषता सख्यं न विधातुमुत्सहे सुभ्रु ।
रामं रविकुलसोमं चर्चामपहाय काममर्चामि ॥ १०७ ॥

इत्याश्वास्य स तारां पद्भ्यां चलयन् सपर्वतामुर्वीम् ।
सुग्रीवेण नियोद्धुं नगरान्निरगादगच्छिदस्तनयः ॥ १०८ ॥

तदनु तयोर्जननुतयोरुभयोरिभयोरिवाहवे वृत्ते ।
रामस्तु घनश्यामः शरमशनिसमं स संदधे धनुषि ॥ १०९ ॥

वृक्षान्तरितो रामो लक्ष्यं कृत्वाथ वालिनं बलिनम् ।
विससर्ज शरं घोरं स ससर्ज च वालिवक्षसि द्वारम् ॥ ११० ॥

रामशराशनिनिहतो वालिधराभृद्द्रमन्नसृक्पूरम् ।
निपपात रणक्षोणौ विवशो विचचाल चाचला सकला ॥ १११ ॥

अथ शरचापधरः सन् रामो राजीवलोचनः श्रीमान् ।
सुरराजसुतस्याग्रे विरराज विराजमानतेजःश्रीः ॥ ११२ ॥

कृच्छ्रात् संज्ञां लब्ध्वा वाली विस्फारितेक्षणः पुरतः ।
रामं रमणीयघनश्याम शरचापपाणिमद्राक्षीत् ॥ ११३ ॥

राम त्वामश्रौषं धर्मात्मानं नृपेन्द्र निर्दोषम् ।
ईदृश इति नाविन्दं किमिदानीं वच्मि नौमि गोविन्दम् ॥ ११४ ॥

गोत्रजकलहे कुत्रचिदाच्छाद्यात्मानमत्यनच्छात्मा ।
हंसि निरागसमपि मां किमितीदृशपापकर्मबद्धमतिः ॥ ११५ ॥

अयशस्करवृत्तिस्त्वं न यशस्करवृत्तितादृता भवता ।
दारहरासुरविजयोदारसखित्वेन पापिनोऽस्य हरेः ॥ ११६ ॥

यदि मह्यमिदं प्रोक्तं रावणमाबध्य तत्क्षणं नेष्ये ।
त्वच्चरणसरोजान्तिकमेतन्नीतां समानयन्नपि ताम् ॥ ११७ ॥

किमियान् कालविलम्बः शक्तस्याशक्तपद्धतिः सहनम् ।
किमतीते न हतोऽहं कृतवानसि राम दुष्करं पापम् ॥ ११८ ॥

गर्हन्तमिति स वालिनमर्हन्तमिवानयन्नयं प्राह ।
सोदररमणीहर्तुस्तव शासनमंहसे न मे नेतुः ॥ ११९ ॥

शाखामृगता भवतः शाखान्तरितं चकार मां मृगयुम् ।
सख्यं तु न ते घटते सुग्रीवेणेव तन्मयेन मया ॥ १२० ॥

स्वकृतं कुरुते सर्वं शुभमशुभं वा फलं पुरा जनने ।
अर्थेऽपरिहार्ये तन्न त्वं शूराग्र्य शोचनीयोऽसि ॥ १२१ ॥

प्राज्ञः कपिराज परं नाज्ञः परमात्मचिन्तनं तनु तत् ।
राज्ञः शासनमन्ते यज्ञ इव प्राक्तनाघशामं ते ॥ १२२ ॥

इति वदति घनश्यामे रामे तद्दर्शनानुलापाभ्याम् ।
वाली विशकलितांहःपालिः प्रणनाम तं पराभिमतम् ॥ १२३ ॥

उद्धरसि भवाम्भोधेरुद्धर शरमप्युरःस्थलार्तिकरम् ।
तव पददर्शनपूतस्तव पदमेवैमि शाश्वतं नृहरे ॥ १२४ ॥

राम घनश्याम हरे कृपया परिपालयाङ्गदं सुखदम् ।
तनुजं मम जितदनुजं मत्तुल्यपराक्रमं न मत्तुल्यम् ॥ १२५ ॥

सुग्रीव दशग्रीवस्तृणति श्रीरामतीव्रबाणाग्नौ ।
किंतु सहायस्त्वमिति प्राप्नुहि कीर्तिं न वैकृतादार्तिम् ॥ १२६ ॥

वैरमपास्य विदूरं रामं सुग्रीवमित्थमाभाष्य ।
काञ्चनकमलां मालां सुग्रीवायाग्रजस्तदा प्रददौ ॥ १२७ ॥

रामोऽरिविरामोऽथ प्रतिपद्य कपीन्द्रकल्पितप्रीतिम् ।
बलिनो वालिन उरसस्तरसा शरमुद्दधार तं च भवात् ॥ १२८ ॥

हरिरिति हरिरिति जल्पन् हरिपतिरग्रे हरिं पिबन्नक्ष्णा ।
निगलितनिगल इवालं गलगलितासुर्जगाम गोपालम् ॥ १२९ ॥

अनुचरहरयः सरयाः तदनु पलाय्य प्रपद्य किष्किन्धाम् ।
उक्त्वा तैः सह दूरं दुद्रुवुरिन्द्रात्मजेन्द्रतावाप्तिम् ॥ १३० ॥

पतिमृतिमाश्रुत्य सती तारा ताराधिपानना रुदती ।
अङ्गदमादाय सुतं यत्र स वाली जगाम तं देशम् ॥ १३१ ॥

बहुलतरोरस्ताडं तत्क्षणनिर्मुक्तमूर्धजापीडम् ।
पत्युः पदयोः पतिता चक्रन्दामन्दमिन्दिरेव परा ॥ १३२ ॥

केवल एव स्थण्डिल एवं न पुरा कदापि किं शेषे ।
किंकृतमागोऽस्माभिः पश्यसि न सुतं प्रियं प्रियां च न माम् ॥ १३३ ॥

इति प्रतिपदं पदं सकलभाग्यसौभाग्ययोः
पतिं प्रति विलप्य सा विपदपारपाथोधिगा ।
पुरः शरशरासनव्यतिकरस्फुरच्छ्रीकरं
घनाघनमघापहं सुखदमैक्षत श्रीसखम्[1] ॥ १३४ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये सप्तमः सर्गः

[1] The metre is *pṛthvī*.

अष्टमः सर्गः

अनुजन्मसमेतं तं मनुजन्मसमूहमङ्गलावासम् ।
रामं रामाजनताकामं कामं रुषाह सा सहसा[1] ॥ १ ॥

श्रीमन् राम महात्मन् करुणावरुणालय प्रभो स्वामिन् ।
अयि रघुनन्दन चन्दनशीतलशीलः कथं पुनः कालः ॥ २ ॥

मामकपतिमतिकामुकमवधीरवधीरितद्विषल्लोकम् ।
वालिनमयि भुजशालिनममुना गमयापि मामलं कृपया ॥ ३ ॥

मामकदुरितासिलता तावकहृदयैकवर्तिनीं श्रीमन् ।
चिच्छेद दयालतिकामुच्छेदय तत्प्रतीपगामपि माम् ॥ ४ ॥

मन्दं मन्दमुदास्से छिन्दन् सुन्दस्य सुन्दरीं किमिति[2] ।
कपिनायक एवास्या अपि नायक ईश मामकीनतनोः ॥ ५ ॥

नार्धविहिंसाहिंसा परमीश्वर नास्पदं प्रशंसायाः ।
मयि वाल्यर्धशरीरे जीवन्त्यां पूर्णजेतृता क्व नु ते ॥ ६ ॥

कपिनाथः स विना मां न पिनाकधरस्य पर्वतेऽपि सुखी ।
पुण्यमगण्यं भवतः पुनरप्यावाममुत्र संघटय ॥ ७ ॥

[1] This verse is missing in MS. A.
[2] The significance of this line is not clear.

यावानाधिरधीश्वर पत्युः सत्युत्सुकस्य विश्लेषे ।
तावन्तमपि त्वं तं जानासि जडापनीतसीत जयिन् ।। ८ ।।

वज्रमये मम हृदये वज्रधरस्यात्मजो वरीवर्ति ।
भेत्स्यसि नैनं संप्रति सेत्स्यति विजयः क्व मामनिर्भिद्य ।। ९ ।।

तज्जहि मामविचारं जहिहि च करुणात्मतां निसर्गधृताम् ।
परमं सौख्यमवाप्स्ये परमं मन्ये पुमांसमेव त्वाम् ।। १० ।।

इति राममुदाहृत्य प्रतिपक्षमवेत्य तत्र सुग्रीवम् ।
सा शोकपरीतमनाः पूर्णः कामस्तवेति तं प्राह ।। ११ ।।

रामेऽथ शुचातारां तारां प्रत्यात्मतत्त्वमावेद्य ।
स्थितवति सापि सुखात्मश्रीरामानुग्रहात् सुखं तस्थौ[1] ।। १२ ।।

मारकमपि निजभर्तुस्तारकमवधाय तद्वचःश्रवणात् ।
दुस्तरमपि दुःखाब्धिं निर्झरवन्निस्ततार सा तारा ।। १३ ।।

रघुपतिरलघुशुचं तां लघुगतिना तत्त्वबोधकैर्वाक्यैः ।
अपनीतशुचं कृत्वा नृपनीतिनिधिर्निनाय तां निलयम् ।। १४ ।।

पूर्वजनिधनप्राप्तापूर्वमनस्तापमाह सुग्रीवम् ।
कालः कुरुते सर्वं बाल इवात्र प्रदूयसे किमिति ।। १५ ।।

सुखमसुखं वात्र सखे स्वकृतानुकृतं प्रवर्तते जन्तोः ।
तत्र न मुह्यति विद्वान् कुत्र कृतिः केवला फलाय भवेत् ।। १६ ।।

[1] This verse is missing in MS. A.

यद्यत्समये यद् यद् भावि भवत्येव नान्यथा तत्तत् ।
दुरतिक्रमणीयोऽसौ कालः कालो हि दैवतं यदतः ॥ १७ ॥

स्वाशक्यनिराकरणे कार्ये कार्यज्ञ तत्र का चिन्ता ।
त्वं तावदहंताकृतसंतापमिमं त्यजार्कसंतानः ॥ १८ ॥

अङ्गदमग्रे कृत्वा स्वाग्रभवस्यौर्ध्वदेहिकं सर्वम् ।
याहि विधेहि यथाविधि मा चिरमुत्तिष्ठ पाहि नः सर्वान् ॥ १९ ॥

इति रामेण तदानीमादिष्टो दिष्टरूपिणार्कसुतः ।
सुतमथ पुरतः कृत्वा चक्रे कपिचक्रवर्तिनः कृत्यम् ॥ २० ॥

निर्वर्तितनैवापः सुग्रीवो रामसंनिधिं प्राप्तः ।
करपुटघटितोत्तंसस्तं प्रणनामाभयाप्रमत्तं सः ॥ २१ ॥

रामं रमणीयगुणग्रामं बद्धाञ्जलिः स सुग्रीवः ।
एहि त्वं किष्किन्धां पाहि जगन्नाथ नाथ सर्वान् नः ॥ २२ ॥

राजा भव भगवंस्त्वं तव वयमवनीन्द्र किंकराः सर्वे ।
शाधि यथासुखमस्मान् साधीयानेवमर्थयामास ॥ २३ ॥

सस्मितमाह तदानीमस्मि त्वमहं तदात्मनो राज्ये ।
अभिषेचय निर्भीकः स्वात्मानं सानुगस्त्वमित्यधिपः ॥ २४ ॥

धृतकनकाङ्गदमङ्गदमग्रजतनयं जितानयं सनयम् ।
कुरु युवराजं राजन् राजन्निजकीर्तिनिर्भरं भुवनम् ॥ २५ ॥

नाहं नगरमुपैमि प्रस्रवणगिराविहैव वत्स्यामि ।
मर्षन्नुपचितकर्षकहर्षं वर्षर्तुमत्र नेष्यामि ॥ २६ ॥

अनुगच्छति सौमित्रिर्ननु गच्छ तवाभिषेचनं द्रष्टुम् ।
अमलशरच्चन्द्रमुखीं मम ललितां मार्गयात्ममार्गसखीम् ॥ २७ ॥

इत्यादिश्य सहस्रद्युत्यात्मजमात्मसोदरेण समम् ।
प्रस्थाप्य च किष्किन्धां तस्थावतिधीरधीः स दाशरथिः ॥ २८ ॥

आज्ञामादाय तदा राज्ञो रामस्य लक्ष्मणश्चक्रे ।
अग्रे सुग्रीवं तं व्यग्रेण हृदा कपीन्द्रपदवन्तम् ॥ २९ ॥

अङ्गदमपि कनकाङ्गदमिङ्गितविल्लिङ्गितं श्रिया नृपतेः ।
यूनः काननगोचरमानसमासाद्य कारयामास ॥ ३० ॥

मङ्गलतूर्यध्वनिजिततुङ्गतरङ्गध्वनत्पयोनिधिकम् ।
अधिगतलोकमहोत्सवमधिपतिमकरोत् तदा स सुग्रीवम् ॥ ३१ ॥

प्राप्तासमसाम्राज्यस्वाप्तावाप्ताखिलर्धिमापूज्य ।
आमन्त्र्य तमामन्त्रितपूर्वं पुनराप पूर्वजन्मानम् ॥ ३२ ॥

रामानुग्रहभूयःप्राप्ताखिलपूज्यराज्यरामाकः ।
दिवि दिविजैरभिरेजे हरिरिव हरिराट् पुरि स्वकैर्हरिभिः ॥ ३३ ॥

सीतामार्गणफलकस्फीताखिलसैन्यसारसंभृतये ।
दूतानप्रैषयत प्रीतात्माथ क्वचित् स सुग्रीवः ॥ ३४ ॥

प्रस्रवणगिरेः कन्दरमस्रबदतिसुन्दरं प्रविश्य ततः ।
सोदरमवदद् रामः सादरमन्तःसदास्फुरद्रामः ॥ ३५ ॥

नन्दनकपिपालावस्कन्दनकुपितेन चेतसा प्रति माम् ।
दुर्जयचापधरः सन् गर्जति पर्जन्यवाहनो नूनम् ॥ ३६ ॥

सीताविरहविदूनः सौमित्रेऽहं करोमि किं दीनः ।
असमाम्बक इव स च मामसमाम्बक एष भीषयत्यसमम् ॥ ३७ ॥

कल्पक्षयकालगलानलपक्षयकारितानुकारितया ।
खेलति केकाभिर्या भीलतिकैकास्पदं हि केकिततिः ॥ ३८ ॥

स घनघनाघनजालं विघनाघनवर्त्म वर्तयित्वालम् ।
दुःसहदुरवस्थाया विदधाति परं किमन्यवस्थायाः ॥ ३९ ॥

धाराधरजलधाराधाराधरवाहखड्गधाराभिः ।
अरिचयमजयं च जयं जनयन्ति नयन्ति यन्ति नः सरयम् ॥ ४० ॥

शीता अपि मे वाताः सीतासंश्लेषलालसामलसाम् ।
कुर्वन्ति निकुर्वन्ति प्रत्युत संतापयन्ति चात्यन्तम् ॥ ४१ ॥

शम्बररिपुनव्याम्बकडम्बरचुम्बत्कदम्बकप्रसवाः ।
कृन्तन्ति हृदत्यन्तं चिन्तयतः सन्ततं तु मे सीताम् ॥ ४२ ॥

किं तरणमिदानीं मेऽनन्तरज वियोगवार्धिमग्नस्य ।
वार्षिकदिनमेकैकं वर्षति शरदा तु दूरयाभावि ॥ ४३ ॥

इति विलपति सीतां प्रति रामे रमणीमणीमनःकामे[1] ।
शरदाविरभूदरिभूपतिविजयरमाविसृष्टदूतीव ॥ ४४ ॥

[1] Amara has *maṇir dvayoḥ*. But generally *maṇi* is used only in masculine. If used in the feminine gender, the short *i* may be long optionally, according to the rule *kṛdikārād aktinaḥ*. Perhaps the author has this in mind, and so the usage as *maṇī* with long *ī* in the context.

सन्मानसमिव सलिलं निर्मलमखिलस्य शर्म निर्माति ।
व्यभ्रनिरोधः शुभ्रद्युतिरपि विरराज राजहंस इव ॥ ४५ ॥

कमलं सकमलमेतत् कमलं कमलाधिवासनिःशमलम् ।
न वियोगिनमातनुते सुवियोगिनमेत्य दुःखितं तनुते ॥ ४६ ॥

शाणति शारदमभ्रं स्फुरदुडुकपटस्फुलिङ्गसंस्फुरणात् ।
दुःसहतेजाश्चन्द्रो मारयितुं मारचक्रति त्रिजगत् ॥ ४७ ॥

शम्पात्मसतीविरहजकम्पाः स्तनयित्नवस्तदातिक्रुते ।
विचलन्ति भृशं पाण्डुरमचलं प्रचलन्तमाशु तन्वन्ति ॥ ४८ ॥

दर्शितसैकतजघनाः कर्शिततनवः शरन्नदीनार्यः ।
निःस्पृहमपि सच्चित्तं सस्पृहमिह तन्वते स्फुटाब्जमुखैः ॥ ४९ ॥

भृङ्गी मङ्गलगायकभङ्गीमङ्गीकरोति संगीत्या ।
पिङ्गलवासःप्रियतममङ्गलदेव्याः समस्तसेव्यायाः ॥ ५० ॥

निष्पङ्कतलं भूतलमासीदभ्रं च पाण्डुराभ्रमभूत् ।
आयाति न सुग्रीवो मायावचनः किमेष वानरराट् ॥ ५१ ॥

लक्ष्मण गत्वा त्वमितः पक्ष्मलनयनानुरक्तचित्तममुम् ।
लक्ष्म विशारदमुदितं सूक्ष्मपदं बोधयादयायास्मै ॥ ५२ ॥

इति रघुपतिसंदिष्टः पतिरिव फणिनां श्वसन् स सौमित्रिः ।
लघुविक्रमसंबन्धादापालघुविक्रमोऽथ किष्किन्धाम् ॥ ५३ ॥

पुरगोपुरभुवि तिष्ठन् चक्रे स धनुर्गुणध्वनिं भीमम् ।
पुनरपि कोऽयमुपप्लव इति कपयस्तत्र तत्रसुर्विधियः ॥ ५४ ॥

तारा ताराथ धिया भीतं भर्तारमञ्जसाश्वास्य ।
क्रुद्धं लक्ष्मणमित्थं नत्वा निजगाद निर्दरं गत्वा ॥ ५५ ॥

संख्यातीताः कपयः संख्यावन् सर्वपर्वतेभ्योऽपि ।
सीतामेव विचेतुं प्रीताः कपिराजशासनान्नीताः ॥ ५६ ॥

एते पश्य महात्मन्ननवहितो नायमीश्वरोऽवहितः ।
यात्राकालो राज्ञां सत्रा तदमीभिरेति वः सुसखा ॥ ५७ ॥

तावकघोरज्यारवमाकर्ण्य स बिभ्यदिभ्यराडैच्छत् ।
प्रत्यासन्नगतित्वादत्यासन्नं प्रसन्नमेव त्वाम् ॥ ५८ ॥

तदनाविलचेतस्कः सदनाविलचेतसं सदा सुहृदम् ।
त्वदनायासविधायकमदनामयवाक्यतः प्रचोदय तम् ॥ ५९ ॥

अवरोपितचापगुणः सममेव रुषाथ पौरुषैकनिधिः ।
यत्र सखा सुग्रीवस्तत्र जगामाथ तां पुरोधाय ॥ ६० ॥

अथ भयभक्तिसमेतो विधिवत् संपूज्य पूजनीयं तम् ।
लक्ष्मणमक्षीणकृपानिधिमधिगन्तुं स निर्ययौ सबलः ॥ ६१ ॥

त्रिजगज्जयधौरेयं निजबलतिलकं विधाय तारेयम् ।
आलम्ब्य हनूमन्तं प्रत्यग्रकुशाग्रधीः स धीमन्तम् ॥ ६२ ॥

जाम्बवदनलतनूभवनलगजगवयादिवाहिनीनाथैः ।
कोटिभिरभितोऽभिवृतः कपिगोपुच्छाच्छभल्लमल्लवरैः ॥ ६३ ॥

अधरितजलधिनिनादो बधिरितनागाधिराजचक्षुष्कः ।
चेष्टालम्बितदिविजव्यवहृतिरिनसूनुयानघोषोऽभूत् ॥ ६४ ॥

मणिमययानारूढः साकं सौमित्रिणा स सुग्रीवः ।
मङ्गलजयशब्दधरैरङ्गदसहितः सहेमवेत्रधरैः ॥ ६५ ॥

रामं रविकोटिनिभप्रभमासाद्याथ दण्डवत् पतितः ।
निजनिखिलकुलैश्वर्यव्रजननिदानं ननाम तं कामम् ॥ ६६ ॥

रामोऽपि स सुग्रीवं दोर्भ्यामुत्थाप्य नर्ममित्रं तम् ।
आहायातः सैन्यैः सह कर्तव्यं त्वमेव जानासि ॥ ६७ ॥

सीतामामार्गयितुः शरदियमनुकूलकाल आयातः ।
वानरराज महात्मन् वानरसिंहान् विसर्जय प्रथमम् ॥ ६८ ॥

इति रघुपतिसंदेशात् सुग्रीवस्तत्क्षणस्फुरद्ग्रीवः ।
पूर्वादिभ्यो दिग्भ्यो बलिनोऽथ वलीमुखान् दिदेश बली ॥ ६९ ॥

हरितनयोऽन्तकहरिते हरितनयसुतानिलात्मजप्रमुखान् ।
सीतामार्गाभिमुखान् विससर्ज वलीमुखानथात्मसखान् ॥ ७० ॥

हस्ताङ्गुल्याभरणं हस्ते दत्त्वा हनूमतः श्रीमान् ।
निजनामाङ्कितममुना व्रज सीता विश्वसेदतीव त्वम् ॥ ७१ ॥

याहि हरे नः कार्यं बहुधा त्वय्येव विद्यते सर्वम् ।
आयाहि कृतार्थः सन् पाहि जगत्प्राणनन्दन श्रीमन् ॥ ७२ ॥

धीमानिति रामेण श्रीमान् सविशेषसत्कृतो हनुमान् ।
श्रीरामपदाम्बुजयोर्धीरात्मा निर्ययौ शिरः कृत्वा ॥ ७३ ॥

मासादर्वाक् सर्वे सीतासंदेशहारिणो यूयम् ।
आगच्छत नो चेद् वः सागस्कान्नावगच्छतासुमतः ॥ ७४ ॥

इत्यादिश्य कपीन्द्रः प्रत्याशं तान् वलीमुखान् सुमुखान् ।
रामं राजीवदृशं सबलः परिवार्य लालयन् तस्थौ ॥ ७५ ॥

अथ ते दूताः सीतां प्राक्प्रत्यगुदक्षु दिक्षु नालोक्य ।
मासादर्वाक् सर्वे त्रासादासादितेश्वरा अभवन् ॥ ७६ ॥

अङ्गदवृषभहनूमद्गजगवयगवाक्षजाम्बवत्प्रमुखाः ।
दक्षिणदिशमासाद्य प्रचलितवाराः प्रतस्थिरे वीराः ॥ ७७ ॥

सरसीः सरितस्तरसा परितः परिशील्य पावनीरवनीः ।
अदराः सदरींश्च गिरीनुरुमरुभूमिं जगाहिरे हरयः ॥ ७८ ॥

अथ ते तत्र चरन्तं कंचन नक्तंचरं मदोन्मत्तम् ।
प्रचलत्पर्वतसंनिभमिभगतिमभियोऽवलोकयांचक्रुः ॥ ७९ ॥

नवयौवनशाली तं युवराजो राजमानतेजस्कः ।
सीतामयमेवाहरदिति दितिजं मुष्टिना जघान घनः ॥ ८० ॥

स तु मुष्टिहतोऽमन्दं क्रन्दन् निपपात निर्गतासुरलम् ।
साकं सुरलोकेन प्रशशंसैनं वनौकसां लोकः ॥ ८१ ॥

ते तदनु नगान् सनगान् सवनानि वनानि सदरींश्च गिरीन् ।
स्थलजलदुर्गनिरर्गलमार्गविहारा विरेजिरे हरयः ॥ ८२ ॥

दुर्जयदोर्बलधैर्यान्निर्जलमवगाह्य ते महद् गहनम् ।
सीतामार्गणनिरताः स्फीताम्बुपिपासयाकुलाः सकलाः ॥ ८३ ॥

बहुधा बहुधामभरा जलमपि जलजाननां सतीं सीताम् ।
परितः परिचिन्वन्तः परिसरगिरिकन्दरं परं ददृशुः ॥ ८४ ॥

तद्विवरविनिर्यद्भिर्जलपक्षिभिरम्बुनिस्रवत्तनुभिः ।
अनुमाय जलं तस्मिन् विविशुस्तत् कन्दरं निरस्तदरम् ॥ ८५ ॥

घोरान्धकारभीकरमवगाह्य परस्परानुबद्धभुजाः ।
सर्वे सर्वेशार्पितचित्ता जग्मुर्बिलं बलात् कपयः ॥ ८६ ॥

बहुदूरगतास्तस्मिन्नतिलोकालोकलोकनीयपुरम् ।
तत्र सरः सरसरसं फलभरभुग्नप्रपातभर्मतरु ॥ ८७ ॥

दृष्ट्वा कांचन कन्यां तत्पुरपरमाधिदेवतां नत्वा ।
बहुलपिपासाहूतान् दूतान् स्वान् रामचोदितानवदन् ॥ ८८ ॥

अथ ते मिहिरप्रभया प्रीतान्तरया स्वयं स्वयंप्रभया ।
स्वच्छन्दाभ्यवहृतयेऽनुज्ञातास्ते फलाम्बुभिः प्रीताः ॥ ८९ ॥

पीतामृतकल्पजला निर्भरभुक्तामृतोपमानफलाः ।
नेमुः पुनरेत्य च तामुद्धर दयया दयानिधे न इति ॥ ९० ॥

बिलनिर्गमनार्थं सा योगिन्यभ्यर्थिता भृशं कपिभिः ।
सर्वे सकृदक्षीणि प्रणिमीलयतेति तान् नतानवदत् ॥ ९१ ॥

तेऽपि तथानुविधाय प्रकटितयोगप्रभावतस्तस्याः ।
बिलबहिरवनिं जग्मुश्चित्तान्येषां तु विस्मयं परमम् ॥ ९२ ॥

उन्मीलितनयनानां तेषां मासात्ययोऽथ सर्वेषाम् ।
ज्ञातोऽज्ञातसतीको राजाज्ञातिक्रमाद् भिया साकम् ॥ ९३ ॥

अथ ते पुनरपि कपयः परितः सरितः सरांसि शैलांश्च ।
बद्धायामनिबन्धनलब्धाखिलदक्षिणक्ष्माश्रेरुः ॥ ९४ ॥

धीरास्ते कपिवीरा भूयो भूयो विचित्य तां सीताम् ।
गोष्पदमितमपि भूतलमास्पदमालोकनस्य ते चक्रुः ॥ ९५ ॥

आस्पदमाहर्तुर्वा सीतां वा नोपलेभिरे वीराः ।
सर्वे ते सायासाः सैन्धवतीरं समं समासेदुः ॥ ९६ ॥

तत्र समासीनास्ते कुत्रचिदासेव्यमारुतेऽब्धितटे ।
धृतकनकाङ्गदमङ्गदमखिलाः परितो विशश्रमुर्विरताः ॥ ९७ ॥

नियतः कालोऽतीतः सीता नैवावलोकितास्माभिः ।
किं कर्तव्यमिदानीमिति युवराजोऽवदत् तदा सदसि ॥ ९८ ॥

राज्ञः शासनसंस्मृतिचकितास्ते सर्व एव सानुशयाः ।
नोचुः किमपि तदानीं युवराजं तं विराजमानभयम् ॥ ९९ ॥

निजवचननिशमनोत्तरमुत्तरमनवाप्य तेभ्य आर्हेभ्यः ।
स्वयमेव स सुग्रीवश्चण्डतराज्ञः प्रचण्ड एव मयि ॥ १०० ॥

जानन्त्येव हि सर्वे मानं कथमाप्नुयामहं तस्मात् ।
मौनं भवतामेतन्नूनं भावि ब्रवीति मे विशदम् ॥ १०१ ॥

सागस्कृतयास्माकं नूनं सुग्रीवशासनं ह्युग्रम् ।
तस्मात् परमत्रैव प्रायः प्रायोपवेशनं श्रेयः ॥ १०२ ॥

इत्यन्वर्थं जल्पति सार्धं तेनैव ते तदन्वीयुः ।
प्राणमिवेन्द्रियवर्गस्त्वनुचरवर्गः कथं जहाति पतिम् ॥ १०३ ॥

अथ ते कथयामासुः स हतोऽपि कृती जटायुरेक इति ।
यद् रामरमण्यर्थं युयुधे रौद्रेण राक्षसेन्द्रेण ॥ १०४ ॥

अन्तिकगिरिविवरगतस्तेषां वाचं निशम्य संपातिः ।
प्राहावरजजटायोर्निधनं कथयन्ति के पुनर्यूयम् ॥ १०५ ॥

संपातिरहं ज्यायाननुजन्मा मे जटायुरतिबलवान् ।
आवामारविमण्डलमुत्पतितौ पक्षपाटवात् पूर्वम् ॥ १०६ ॥

ग्लानं तमवेक्ष्याहं पक्षावाच्छाद्य तत्र रक्षितवान् ।
दग्धौ मम पक्षौ तत्पतितश्चिरमत्र तं न पश्यामि ॥ १०७ ॥

स हतः केन किमर्थं कथयत वः प्रार्थये महावीराः ।
मामवतारयतास्मै दद्यामद्याम्बु चाम्बुधेस्तीरम् ॥ १०८ ॥

गिलतीति भिया तस्माद् बिभ्यत्सु कपीश्वरेषु साहसिकः ।
अङ्गद एव तमाह श्रीमान् राजा वनेऽवसद् रामः ॥ १०९ ॥

तद्भार्यायां चौर्याद् राक्षसराजेन नीयमानायाम् ।
अवरुध्य हतस्तेन भ्राता तव पक्षिराड् जटायुरिति ॥ ११० ॥

तामेव विचिन्वन्तो वयमेते सर्व एवमायाताः ।
तां तं चापश्यन्तः प्राप्ताः प्रायं प्रभोस्ततो भीताः ॥ १११ ॥

इति तद्वचनं श्रुत्वा संपातिः प्राह हर्षयन् सर्वान् ।
रावणपुरि लङ्कायां सीता सा दृश्यते मयाद्येति ॥ ११२ ॥

तद् ध्रुवमसुरेन्द्रपुरं गृध्रतया दूरदृष्टिरस्माकम् ।
शतयोजनविस्तीर्णं कलयत मध्ये पयोनिधिं तीर्णम् ॥ ११३ ॥

तीर्त्वाब्धिं पश्यत तां भीत्या किं वो विहायसा पतताम् ।
श्रुततत्संपातिवचा युवराडवतारयांचकार स तम् ॥ ११४ ॥

अवतीर्य जलं दत्त्वा स पुनः प्रतिरूढनव्यपक्षः सन् ।
भवतां दर्शनतः संभृतपक्षोऽस्मीति खं जगाम खगः ॥ ११५ ॥

अथ तेषु कपीन्द्रेषु प्रस्तुतलवणोदलङ्घनेऽतिघने ।
अहमस्मीति न कोऽपि ब्रूते संजातसारविशयतया ॥ ११६ ॥

अथ कपियूथाधिपतीनखिलानाहूय वालिभूरवदत् ।
कथयत वो वः सारं तदुपरि वक्ष्यामि कार्यकर्तारम् ॥ ११७ ॥

केचिदिति व्याहरते युवराजायाब्रुवन् दशेति वयम् ।
विंशतियोजनमपरे प्राहुस्त्रिंशच्च योजनानि परे ॥ ११८ ॥

अन्ये चत्वारिंशत्पञ्चाशत् केचिदाहुरात्मगतिम् ।
एके षष्टिमथैके सप्ततिमपरे त्वशीतिमाचख्युः ॥ ११९ ॥

नवतिं ब्रुवति तदानीं जाम्बवति न कोऽपि भूय आह ततः ।
राजाह युवा शतमपि निःसंदेहं विलङ्घयेयमिति ॥ १२० ॥

पुनरुल्लङ्घनशक्तिः परमस्ति न वेति शङ्कते चेतः ।
इति तस्मै व्यवहरते मन्त्रिवरः प्राह जाम्बवान् वृद्धः ॥ १२१ ॥

लङ्घनपुनरुल्लङ्घनशक्तिस्तव विद्यते न संदेहः ।
त्वं हि नियन्तास्माकं न हि गन्तव्यं त्वया कदाचिदपि ॥ १२२ ॥

शतयोजनविस्तीर्णं तूर्णं निस्तीर्य लीलयैवाब्धिम् ।
सीतां वीक्ष्य कृतार्थो यः पुनरायाति दर्शयिष्ये तम् ॥ १२३ ॥

श्रीमन्नत्र हनूमन्नलमसि विमलं यशः समारोढुम् ।
शैशव एव खरांशोर्बिम्बं फलमित्यतिप्लुतो गिलसि ॥ १२४ ॥

वज्रहतिस्त्वयि कुण्ठा दत्तवरस्त्वं हि सर्वगीर्वाणैः ।
वायोस्तनयस्तुल्यस्तुल्यस्तव नास्ति विक्रमेण परः ॥ १२५ ॥

बुद्ध्या तु बृहस्पतिरसि वाचा वागीश्वरो नयेऽसि कविः ।
अतिबल एव बलेन प्रबलस्त्वमुपेक्षसे किमित्यस्मान् ॥ १२६ ॥

हरिरेव परः साक्षाद् रामो राजीवलोचनो नूनम् ।
कुरुषे यदि तत्कार्यं कीर्तिर्लोकातिवर्तिनी ते स्यात् ॥ १२७ ॥

अस्माकं च सखीनां राज्ञश्च प्राणदानमेवैतत् ।
उत्तिष्ठ हरिश्रेष्ठ श्रेयः संप्राप्नुहि स्वयं भूयः ॥ १२८ ॥

स्तुतवति जाम्बवतीत्थं स्मृतनिजबलपौरुषोऽञ्जनातनयः ।
संजनयन् कपिहर्षं हर्षेण प्राह जाम्बवन्तमथ ॥ १२९ ॥

तात भवद्वात्सल्यात् सुग्रीवानुग्रहाज्जगन्नेतुः ।
रामस्य कटाक्षादिह दुष्करमपि कार्यमुत्सहे कर्तुम् ॥ १३० ॥

सुकरं चैतद्वारिधितरणं सुयशस्करं परं कुर्वन् ।
लङ्कां च सरक्षस्कामुत्पाट्य सहावनीजयानेष्ये ॥ १३१ ॥

मामकबलमकलङ्कं लीलानिर्मूलितद्विषल्लङ्कम् ।
पश्यत यूयं सर्वे वालाग्रवशं च रावणं कुर्वे ॥ १३२ ॥

निरवधिसमरोत्साहस्फुरदुरुजैत्राकृतिं हनूमन्तम् ।
धीमन्तमनन्तबलं कामं संमान्य जाम्बवानाह ॥ १३३ ॥

श्रीमन्नलमविकार्यं सर्वं निर्वोढुमद्य नः कार्यम् ।
अद्य तथापि सतीं तां सीतामालोक्य शीघ्रमायाहि ॥ १३४ ॥

लङ्कापतिरतिमायी बलवान् मायाविभिर्वृतोऽनेकैः ।
कामपि मायां कुर्यात् कुरुषे यदि संगरं त्वमेवैकः ॥ १३५ ॥

त्वद्वार्ताश्रवणं वा नेदानीं नः कपीन्द्र जायेत ।
तत्स्वामिनानुगम्य प्रथयितुमपि तन्महाबलात्मबलम् ॥ १३६ ॥

इति जाम्बवतो वाक्यं मतिमानप्यङ्गदोऽनुकूलतया ।
अभिनन्द्य हनूमन्तं विभियं तुष्टाव तत्र धीमन्तम् ॥ १३७ ॥

महाबलतनूभवस्तदनु निर्भरोत्साहतः
समाहितमतिः सरित्पतिविलङ्घने जाङ्घिकः ।
महीन्द्रवरवेषसंचरदहीन्द्रशायिप्रिया-
विलोकनकुतूहलादुपययौ महेन्द्राचलम्[1] ॥ १३८ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये अष्टमः सर्गः

[1] The metre is *pṛthvī*.

नवमः सर्गः

अथ स हनूमान् धीमान् रक्षोनीतां विलोकितुं सीताम् ।
उदपतदगराट्छिखरादुच्चैरुदधेर्विराड्धियं विदधे ॥ १ ॥

उत्पतनपूर्वकालिकतत्पदपीडाधुरंधरः स धरः ।
न दधार धराधरतां न धरा या यद्भयादसावधरा ॥ २ ॥

गिरिततिरतिवेगादुत्पततस्तस्य[ाति]वेगतोऽनुगता ।
पतिताब्धौ पर्यायादघना घनमीशते हि नान्वेतुम् ॥ ३ ॥

बन्धव इव परमधिगतसिन्धव एते बभुर्वनस्पतयः ।
तुङ्गतरङ्गलताच्छलवलमानान्योन्यबाहुसंश्लिष्टाः ॥ ४ ॥

उत्पतति रयात् तस्मिन् द्रोणीभूतोऽम्बुधिस्तदाधस्तात् ।
सेतोर्भाविन उच्चैः खनित इवाभूत् स मूलदार्ढ्याय ॥ ५ ॥

रामामोघशिलीमुख इव खेलति खे वलीमुखे तस्मिन् ।
सर्वसुपर्वप्रहिता सुरसा[1] तरसा रुरोध तत्सरणिम् ॥ ६ ॥

तद्धीबलजिज्ञासुस्तद्धितहन्त्रीव नागसूरास्यम् ।
व्यादाय विशैतन्मे वदनमिति व्याजहार सा धीरम् ॥ ७ ॥

[1] Surasā was *nāgamātā* come in the guise of a *rākṣasī*. See *V.R.*, Sundara. canto 1, vv. 145 and 149.

धीमानथ स हनूमानाह कृतार्थो विशामि ते वक्त्रम् ।
रामेण प्रहितोऽहं सीतावार्तानुवर्तिना दूतः ॥ ८ ॥

जननि कृपां कुरु मह्यं यामि नमस्तेऽस्तु देहि मे मार्गम् ।
साह पुनर्व्रतमेतन्मम बहुनालं न लङ्घनीयं ते ॥ ९ ॥

श्रुततद्वचनः कपिराट्छतयोजनविस्तृतं ततान वपुः ।
सापि ततान तदास्यं व्यापकमस्मादपि क्रमाद् वृद्धा ॥ १० ॥

धीमानथ स हनूमानणुरूपमवाप्य तन्मुखं गत्वा ।
निर्गत्य बहिर्मातर्वदनगतो निर्गतोऽहमित्यवदत् ॥ ११ ॥

अथ तद्बुद्धिबलाभ्यां तुष्टा सा तं नमन्तमाशीर्भिः ।
विजयिनमुक्त्वा मुक्त्वा त्रिदिवं प्रति सा पुनर्ययौ सुरसा ॥ १२ ॥

राक्षसधामास्कन्दनपिशुनात्युद्दामधूमकेतुधियम् ।
कुर्वति तारापथगे तत्र हनूमत्यनूनवेगेन ॥ १३ ॥

आश्रयजलधिप्रहितो विक्रमणायानिलात्मजस्य हरेः ।
आनाकव्यापिशिरा मैनाकः प्रादुरास पाथोधेः ॥ १४ ॥

मारुतिरथ तं दृष्ट्वा मार्गप्रतिबन्धकत्वभावनया ।
तरसा गच्छन्नुरसा निजघान घनं तमन्तरिक्षगतः ॥ १५ ॥

तुङ्गे स्थितवान् शृङ्गे स धरः समुवाच दिव्यरूपधरः ।
मानय मैनाकं मां मित्रं पित्रा तवेन्द्रतस्त्रातम् ॥ १६ ॥

विश्रम्य सखे शिखरे भुक्त्वा पीयूषवत्फलं च जलम् ।
मम याहि हरे तत इति शमयामासागकामनां स्पृष्ट्वा ॥ १७ ॥

शतयोजनमितपाथोनिधिपूरविलङ्घने क आयासः ।
मम संमत एव सुहृत् त्वमसीति गिरिं गिरा च सच्चक्रे ॥ १८ ॥

अथ तत्र पुनस्तारापथमधिगत्याधिगच्छति स्वच्छम् ।
छायामादाय जले रंहस्तस्याशु सिंहिकाबध्नात्[1] ॥ १९ ॥

स निरुद्धगतिः श्रीमान् चक्षुर्विक्षिप्य दिक्षु सर्वासु ।
छायाग्राहिजलग्रहमभिवीक्ष्य विभीर्जघान तं पद्भ्याम् ॥ २० ॥

शितशतकोटिकठोरैर्नखरैः स विदारितो ममार खरैः ।
सुखमेव स खं गत्वा पुनरपि लङ्कापुरोन्मुखोऽनुययौ ॥ २१ ॥

रिङ्गत्तुङ्गतरङ्गप्रेङ्खत्पाथोधिपारमेष परः ।
पश्यन्नश्रममभ्राद् भ्रश्यन् शिश्राय तत्सुवेलशिरः ॥ २२ ॥

स सुरासुरदुर्धर्षामसुराधिपतेर्विलोकयन्नगरीम् ।
अतिगुप्ततनुः सुतनुं प्रति विचिनोमीति निश्चिकाय धिया ॥ २३ ॥

तदयं तदनु हनूमानुदयं प्राप्तो मरीचिमानिव सः ।
वासाय सुवेलाचलमासायं साधु रोचयामास ॥ २४ ॥

रविरस्तगिरावरुणो रामस्य हरेस्तथा बभौ स्थविरः ।
दक्षिणमक्षि रुषारुणमिति मतिरुदपादि धीमतां तु यथा ॥ २५ ॥

अरुणा वरुणाशेयं तरुणं तरुणीव रञ्जयन्त्यरुणम् ।
संध्यारागमिषोन्मिषदुद्भटकौसुम्भवाससा रेजे ॥ २६ ॥

[1] Siṃhikā was a Rākṣasī. See *V.R.*, Sundara., canto 1, v. 184.

स्थविरोऽपि रविश्चित्रं तरुणारुणविभ्रमो विबभ्राम ।
अनुरज्यति सर्वोऽपि क्व नु वैमुख्यं कृतास्पदे स्त्रैणे ॥ २७ ॥

अनुरक्ते वारुण्यां तस्मिन् याते तया सह क्वापि ।
सख्य इवेतरहरितस्तामन्वीयुस्तमःकृतावृतयः ॥ २८ ॥

नक्तंचरसंघाते व्यक्तं संचरति सत्कृताघाते ।
उदगादुदयं चन्द्रः सतपारकृपः स रामचन्द्र इव ॥ २९ ॥

प्राचीं चुम्बति चन्द्रे प्राचीकमत प्रभञ्जनप्रभवः ।
शङ्कामपहाय कपिर्लङ्कामन्वेतुमीप्सितावाप्त्यै ॥ ३० ॥

शशिवदनमनोज्ञायां निशि नक्षत्रस्रजि व्रजन्त्यां स्वम् ।
कतमः कृतसंसर्गः सतमोमयचेतनो न निद्राति ॥ ३१ ॥

चन्द्रकरव्यतिकरतः सान्द्रतमःस्तोमनिर्भिदाकरतः ।
आदर्श इवात्मास्यं नादर्शनमस्ति वस्तु किंचिदपि ॥ ३२ ॥

तदनु हनूमान् धीमानचलादवरुह्य राक्षसेन्द्रपुरीम् ।
यावत् प्राविशदरुणत्तावल्लङ्काधिदेवता सा तम् ॥ ३३ ॥

कस्त्वं चोरवदस्यां पुरि विशसि च किं करोषि हन्मि त्वाम् ।
त्रिजगज्जनदुर्धर्षां लङ्कां साक्षादवेहि मां मूर्ताम् ॥ ३४ ॥

अथ तत्प्रतिबद्धगतिर्मारुतिरतिमात्रक्रुद्धधीरमतिः ।
वामात्मकराघाताद् वामामपि तां तथाकृतावामाम् ॥ ३५ ॥

अतिबलसुतबाहुबलादतिभीतिमवाप्य विस्मयेन समम् ।
स्वसमयमपहायैनं प्राह पुरी साथ साधयेति पुरीम् ॥ ३६ ॥

लङ्कां निर्जित्य निरातङ्काखिलतत्पुरप्रचारपरः ।
शङ्कामपहाय सुधीर्लङ्कां स विवेश सूक्ष्मदेहेन ॥ ३७ ॥

अरिघातुकातिभीकरपरिघाप्राकारभासुरां स पुरीम् ।
शुभ्राभ्रंकषसौधां बभ्राम गतश्रमः समन्तात् ताम् ॥ ३८ ॥

निद्राणस्त्रीपुंसां भद्रावहरत्नदीपिकावासाम् ।
उन्निद्रमहोल्लासां निर्णिद्रदृशावलोकयामास ॥ ३९ ॥

वायुरिव वायवीयस्तनयः सनयः पुरं समस्तमपि ।
अनिरुद्धगतिर्गत्वा सुन्दरमपि राजमन्दिरं प्राप ॥ ४० ॥

अकलङ्कमनस्कः स तु कलविङ्कसमानविग्रहो हनुमान् ।
चञ्चत्काञ्चनमणिमयशय्यासु ददर्श तादृशः सुदृशः ॥ ४१ ॥

तत्र विचित्रास्तरणे रमणीयोल्लाभशोभिपर्यङ्के ।
रक्षोराजवधूटीं सीतां संशय्य निश्चिकायान्याम् ॥ ४२ ॥

परवनितादुरवापश्रीमन्महनीयलक्षणोपेताम् ।
सीतां तत्र विचिन्वन् नैतादृक् सेत्यपासरत् तस्मात् ॥ ४३ ॥

पुष्पवदतिभास्वद्विसपुष्पगृहोल्लासमुल्ललितम् ।
पुष्पस्रगलंकरणं पुष्पकमप्याप पुर्यलंकरणम् ॥ ४४ ॥

सीतादर्शनलालसचेताः स विचित्य पुष्पकं सर्वम् ।
चित्रीयमानहृदयः पुत्रः पवनस्य पानभूमिमगात् ॥ ४५ ॥

तत्र विचित्रपदे घनमदिरापानेन मोहिता महिलाः ।
शतशः स ददर्श न तां सीतां श्रीमत्पतिव्रतैकनुताम् ॥ ४६ ॥

मारुतिरथ धीरमतिश्चारुतरं पुष्पकं पुनश्चिन्वन् ।
स चचार सर्वपुरमपि विचचारादर्शनेन सीतायाः ॥ ४७ ॥

आसादित एव मया प्रासादचयः सचन्द्रशालाकः ।
सोपवनं पुरमखिलं नोपनता सा सुहृन्मदीयदृशा ॥ ४८ ॥

कं पाति स संपातिर्मिथ्यावाचाश्नुते फलं किं वा ।
इति बहुधा परिभाव्य प्रतिभाशाली ययावशोकवनीम् ॥ ४९ ॥

पुस्फोर तदा वामं कामं कमनीयमक्षि सीतायाः ।
पस्पन्दाक्षि च दक्षिणमिष्टविनिद्रस्य रामभद्रस्य ॥ ५० ॥

वामैरक्षिभिरखिलैर्वामा दोषोऽपि नित्यदोषस्य ।
दोषाचरराजस्य प्लोषाय प्रास्फुरन् पुरः पुरतः ॥ ५१ ॥

नन्दनवननवनवहरिचन्दनमन्दारपारिजातमुखैः ।
चित्रं चैत्ररथादपि जैत्रः पुत्रो नभस्वतोऽलभत ॥ ५२ ॥

लोकोत्तरशुभलक्षणलक्षिततनुरक्षिगोचरा तत्र ।
बहुलप्राक्तनजन्मासादितपुण्येन देवतेवास्त[1] ॥ ५३ ॥

नानासूनविताने नानाफलभारभूरिसंताने ।
स्फीताशोकविताने सीतां सोऽवैत् सन्नायुसंताने ॥ ५४ ॥

अदयारिस्त्रीजाले हृदयंगमदिव्यशिंशपामूले ।
केवल एव स्थण्डिल उपविष्टां तत्र दुर्घटाभीष्टाम् ॥ ५५ ॥

[1] This verse is missing in MS. A.

उपवासकृशां दीनां दीनारविनिर्मिताङ्गयष्टिमिव ।
चान्द्रमसीमिव रेखां सान्द्रतमःसंकुलां कुलाभरणाम् ॥ ५६ ॥

मुखचन्द्रकलङ्कायितचलदलकसखालिकामपेतसुखाम् ।
चिरसत्कृतचिकुरचयां विरचितरुचिरैकवेणिकोपचयाम् ॥ ५७ ॥

कान्तवकुन्तप्रतिकृतिकुन्तलस्मृतिकान्तमस्तकाभरणाम् ।
शोणाब्जप्रतिमल्लस्रवदश्रुविशालचारुचक्षुष्काम् ॥ ५८ ॥

श्रीराममेव संततमन्तःकरणे विचिन्तयन्तीं ताम् ।
वाचा च गृणन्तीं तं शरणं श्रीराम राम पाहीति ॥ ५९ ॥

दृग्जितचकितकुरङ्गीं दुःसहविरहाग्निदूयमानाङ्गीम् ।
गतिजितमदसारङ्गीमनधिगतौपम्यचारुसर्वाङ्गीम् ॥ ६० ॥

दिव्यमनोहरशीलां दिव्यतमोहारिदीपिकालीलाम् ।
रक्षोवनदवकीलामक्षोभ्यपतिव्रताव्रताभीलाम् ॥ ६१ ॥

प्रोषितसकलकलापां[1] विस्मृतपीयूषसारसंलापाम् ।
अधिगतविविधालापां निगलितनयनाश्रुजालकालापाम् ॥ ६२ ॥

नीलाम्बुदचयचिकुरां विमलकपोलावगीतसन्मुकुराम् ।
वदनाधरितहिमकरां कमलद्युतिनिर्जयैकतानकराम् ॥ ६३ ॥

विधिवशविचलितभाग्यां सुमनोल्लनातिशायिसौभाग्याम् ।
विगलितविविधाभाग्यामनुभवपदभाविसन्महाभाग्याम् ॥ ६४ ॥

[1] *kalāpa* here is in the sense of *bhūṣaṇa*.

मिथ्याव्यवसितमध्यामध्यासितरूक्षराक्षसीमध्याम् ।
कविराड्गिरमिव तथ्यां तथ्यानवलोक्यसत्सभापथ्याम् ॥ ६५ ॥

रुचिविजितनिशातारां मारासिलतां यथानिशातारम् ।
अरिपरिभूताकारां त्रिभुवनसाम्राज्यदेवताकाराम् ॥ ६६ ॥

मूर्तां मन्मथशक्तिं मार्ताण्डकुलैकभूषणासक्तिम् ।
वार्ताश्रवणाभावादार्तामार्तस्य रामभद्रस्य ॥ ६७ ॥

अनिरीक्षितशोकान्तां स निरीक्ष्य रघूत्तमस्य तां कान्ताम् ।
मेने मनसि हनूमान् मौनेन समेयिवानलं धीमान् ॥ ६८ ॥

सीतामपहार्यैतामेतादृशदिव्यलक्षणोपेताम् ।
एतावन्तं कालं नेता रामः कथं दधारासून् ॥ ६९ ॥

कथमेषा निर्दोषा दोषाचरयोषिदाहृतोन्मेषा ।
भवति त्रिभुवनभूषाभूषापि कथं कृताभिसंभाषा ॥ ७० ॥

इति चिन्तयति हनूमति पतितप्रष्ठोऽसुरक्षमाधिपतिः ।
सीतादर्शनलोलः प्रीतात्मा प्रादुरास दुर्लीलः ॥ ७१ ॥

करदीपसहस्रदिवाकरदीधितिधीकरः प्रभीतिकरः ।
करदीकृतदिक्पालः करदीव्यदमूल्यदिव्यरत्नसरः ॥ ७२ ॥

केवलतरुणीमण्डलमध्यगतस्तारकावृतेन्दुरिव ।
उत्सृष्टनिशान्तः सन्नुच्चैः कृतनैकसत्सितच्छत्रः ॥ ७३ ॥

वालव्यजनैरीषत्कालव्यवधानमन्तरा स्त्रीभिः ।
धवलांशुमहोधवलैर्वीजितमूर्तिर्ययावशोकवनीम् ॥ ७४ ॥

काञ्चनकाञ्चीनूपुरकटकस्फुटशब्दसंश्रुतेः स्त्रीणाम् ।
निबिडतरुच्छदपटलीपुटलीनतनुर्वेलीमुखस्तस्थौ ॥ ७५ ॥

करिणं करिणीभिरिवायान्तं तं वीक्ष्य राक्षसाधिपतिम् ।
मेने स तु जगदखिलं पायाद् यदि दुष्टचेष्टितो नालम्[1] ॥ ७६ ॥

सकलङ्ककरस्पर्शात् संकुचितां पद्मिनीमिवार्तिचिताम् ।
स निकटमेत्य बभाषे भीतामिव तामभीतवत्सीताम् ॥ ७७ ॥

अयि करिकरकल्पोरु त्वयि करुणा[ ]ममास्ति तत् त्वमपि ।
मयि किर करुणारसमयदृशमसदृशदृक् करोषि किं रोषम् ॥ ७८ ॥

किं रामाय स्पृहयसि निष्कामाय त्वयि प्रकाममये ।
शतधा शितशूलधरैः शूरैः परिमार्गितोऽपि नो दृष्टः ॥ ७९ ॥

राज्यभ्रष्टो दृष्टः कृपणो वनगोचरोऽनुजानुचरः ।
नष्टप्रायः स मया दृष्टो नष्टो भविष्यति क्षिप्रम् ॥ ८० ॥

[1] The significance of this line seems to be the same as that of the verse in the *Vālmīki-Rāmāyaṇa*:

yadyadharmo na balavān syād ayaṃ rākṣaseśvaraḥ,
syād ayaṃ suralokasya saśakrasyāpi rakṣitā.

(Sundara., canto 49, v. 18)

Also see the verse:

ājñā śakraśikhāmaṇipraṇayinī śāstrāṇi cakṣur navaṃ
bhaktir bhūtapatau pinākini padaṃ laṅketi divyā purī,
utpattir druhiṇānvaye ca tad aho nedṛg varo labhyate
syāccced eṣa na rāvaṇaḥ kva nu punaḥ sarvatra sarve guṇāḥ.

(*Bālarāmāyaṇa*, quoted in *Kāvyaprakāśa*)

मत्तो मत्तेभगते भीतेन न तेन ते फलं सुभ्रु ।
पूरय मामककामं भज साम्राज्यं जगत्त्रयीपूज्यम् ॥ ८१ ॥

व्यवहरतीत्थं चौर्यादपहरति स्वं[ह्यप]त्रपं धैर्यात् ।
नक्तंचरपरिपाले व्यक्तं प्रत्याह साथ तत्काले ॥ ८२ ॥

मायामृगरूपेण छिद्रं परिकल्प्य भिक्षुरूपधरः ।
हृतवानसि मां चौर्यादिव हविरसमर्थ आध्वरीयं श्वा ॥ ८३ ॥

अस्त्रविदग्रेसरतः शस्त्रभृतामीश्वरान्ममेश्वरतः ।
कस्त्रस्यति न त्वादृङ्निस्त्रपमेवं ब्रवीषि किं स्त्रीषु ॥ ८४ ॥

यदि ते शक्तिः शौर्यं हृदि भावय मत्पतिं महावीर्यम् ।
वञ्चितवानसि किमहो संचितमश्नासि पाप पापफलम् ॥ ८५ ॥

जीवनमेतत् त्रिजगत्पावनमन्नाथदर्शनान्तं ते ।
अचिरादायातीशो रुचिराकृतिरम्बुधिं विशोष्य शरैः ॥ ८६ ॥

रामशरैरतिघोरैः समरभुवि क्षुण्णसर्वसामन्तः ।
त्वमथ तदीयमहास्त्रप्रमथितशीर्षः पतिष्यसि क्षिप्रम् ॥ ८७ ॥

अहमिव तावकललना ललनार्धवपुःप्रसादतः पुरि ते ।
क्रन्दन्ति शुचामन्दं मन्दमते सत्यमेव मे वचनम् ॥ ८८ ॥

विजिजीविषसि यदि त्वं त्यज विषमधियं पुनः समर्पय माम् ।
रामाय नमन्तं त्वां स महात्मा पाति सापराधमपि ॥ ८९ ॥

तृणमन्तरतः कृत्वा फणतीत्थं तत्पतिव्रतारत्ने ।
विजिघांसुरधान्मन्दो मन्दोदर्या निवारितः समभूत् ॥ ९० ॥

तदनु स राक्षसयोषाः समनुशशास स्फुटं न चेदेषा ।
मासयुगादर्वाङ् मे वश्या नाश्यां महानसं नयत ॥ ९१ ॥

इत्यादिश्य वधूभ्यः पत्यावमरद्विषां विनिष्क्रान्ते ।
बहुधा भर्त्सितसीतास्त्रिजटा तद्रक्षिराक्षसीराह ॥ ९२ ॥

अस्वप्नोत्सवकारी दुःस्वप्नोऽभून्ममाद्य राक्षस्यः ।
दिव्यानेकपपृष्ठे भव्याकृतिरक्षिगोचरो रामः ॥ ९३ ॥

सीता चेयं प्रीता श्रीरिव हरिमाश्रिता पतिं रामम् ।
रामेण सहारातिविरामेण पुरीं च पुष्पकेण गता ॥ ९४ ॥

मुण्डस्तैलाभ्यक्तः खण्डितमूर्धा स रक्षसां राजा ।
दुर्दमकर्दममग्नो रक्षिगणः कृष्यते कयापि रुषा ॥ ९५ ॥

नैनां भर्त्सयतैतत्पतिरतिविजयी जितारिरेष्यति सः ।
नेष्यत्यभिभूयारीन् प्राभीरेनां पुनः परं स्वपुरम् ॥ ९६ ॥

अभ्रमुवल्लभपृष्ठं बभ्रमुरारुह्य विभ्रमेणाभ्रे ।
अभयादभयं रामादाप्ताः प्राप्ता विभीषणप्रमुखाः ॥ ९७ ॥

त्रिजटास्फुटदुःस्वप्नप्रत्यायितदैत्यनायकात्ययकाः ।
सीतामपहाय ततो भीता विनिदद्रुरन्तिकद्रुषु ताः ॥ ९८ ॥

अथ सा राक्षसवचसा रक्षस्त्रीतर्जनादिना दीना ।
त्रातारमपश्यन्ती सीता पारं परं च दुःखाब्धेः ॥ ९९ ॥

हे नाथ जगन्नाथ कारिविरामाद्य राम ते रामाम् ।
सीतां मामरिनीतां शक्तः किमुपेक्षसे निरागस्काम् ॥ १०० ॥

जाने तव भुजाने सारं विनिकृत्तशत्रुदोःसारम् ।
पापान्मम तु दुरापात् परमनुरक्तोऽपि किं विरक्तोऽसि ॥ १०१ ॥

अस्वशरण्यदृगार्ता सस्वरमुच्चैरलं विलप्य सती ।
मृतिमेव परं श्रेयो मत्वा दीर्घां ददर्श निजवेणीम् ॥ १०२ ॥

मारुतिरनुपेक्ष्यां तां मनसावेक्ष्यान्तरं च दैववशात् ।
उपधामिव रामकथामित्थं चक्रे सुधीः स कर्णसुधाम् ॥ १०३ ॥

स्वर्णगरजयप्रतिपन्निर्णयविषयीकृताकृतिर्जगति ।
उत्तरकोसलदेशानुत्तंसयतीव पूरयोध्येति ॥ १०४ ॥

तस्या राजा दशरथ इति जयति महारथः कृतारिरथः ।
बाहव इव तस्य हरेराहवशूराः सुतास्तु चत्वारः ॥ १०५ ॥

पित्राज्ञातस्तत्र ज्येष्ठः श्रेष्ठो गुणैरगाद् गहनम् ।
रामः शत्रुविरामः सहजेन च रामया मनोरमया ॥ १०६ ॥

लङ्काधिपतिरशक्तस्तं कालमिवाभिजेतुमन्तरतः ।
पञ्चवटीतीरात् तद्वञ्चनबुद्ध्या जहार तां वनिताम् ॥ १०७ ॥

तामथ रामश्चिन्वन् सहजेन स ऋष्यमूकमाप गिरिम् ।
तत्र चकारार्कभुवा सुग्रीवेणाग्निसाक्षिकं सख्यम् ॥ १०८ ॥

तज्जायाहर्तारं वालिनमथ हेममालिनं रामः ।
हत्वैकेन शरेण प्रास्थापयदेनमेव तद्राज्ये ॥ १०९ ॥

तदनु सुहृत् सुग्रीवो वानरराजः स वानरानखिलान् ।
आनाय्यानुशशास श्रियमिव सीतां विमार्गयध्वमिति ॥ ११० ॥

तेषामन्यतमोऽहं तरसा सिन्धुं विलङ्घ्य गतमोहम् ।
अत्राशोकवने तामद्राक्षं क्षुद्ररक्षसा नीताम् ॥ १११ ॥

व्याहृत्य सुधीरित्थं विरराम स पत्रपञ्जरच्छन्नः ।
कर्णसुधां रामकथां श्रुत्वा सा सादरा ददर्श दिशः ॥ ११२ ॥

कमपि न पश्यन्ती सा वक्तारं चित्तविभ्रमस्वप्नम् ।
मन्वाना तत्र परं मेने जागर्ति हृत् कुतस्त इति ॥ ११३ ॥

अथ साह श्रुतिमधुरं यदि गदितमिदं वचः प्रमाणपदम् ।
स दयालुरदोवक्ता किमिति ममाक्ष्णोः शुचं न मार्जयति ॥ ११४ ॥

धीमानथ स हनूमानवतीर्य तरोर्ननाम तां सीताम् ।
दृष्ट्वा समकुचदेनं रक्षोमायेति सा श्रिता मौनम् ॥ ११५ ॥

दूरादेव वसन्नथ धीरात्मा शङ्कितां विलोक्य स ताम् ।
मस्तकविन्यस्ताञ्जलिपुट एव नमन्नुवाच वाचमृताम् ॥ ११६ ॥

मातर्मायी नाहं मायिकुलान्तस्य देवि रामस्य ।
दूतस्त्वां हि दिदृक्षुः सत्यं प्राप्तो वदामि नो दैत्यः ॥ ११७ ॥

विश्वसिहि नमस्तुभ्यं शश्वद्विश्वातिशायिवीर्यस्य ।
रामस्याहं दासः कामं संत्यज्यतां पराशङ्का ॥ ११८ ॥

रामः स महात्मा निजनामाक्षरमुद्रिताङ्गुलीयमिदम् ।
प्रददौ विश्वासाय प्रददामि गृहाण देवि पश्यैतत् ॥ ११९ ॥

इत्युक्त्वा स हनूमान् दत्त्वा रामाङ्गुलीयकं धीमान् ।
सीतामानन्दरसप्रीतां चक्रे सहात्मनात्मज्ञः ॥ १२० ॥

रामा रामाभरणं राममिवालोक्य सागतं स्वगतम् ।
नत्वा शिरसि दृशोरपि कृत्वाथ मुहुर्मुहुर्हृदा मुमुदे ॥ १२१ ॥

आनन्दाश्रुपरीता सानन्दपयोधिपूरमग्नेव ।
प्राविन्दत न मुदवधिं प्रावन्दत नाथमेव जगदवधिम् ॥ १२२ ॥

चारुतरास्या सीता मारुतिमाहाथ संनिधेहीति ।
दृष्टं ननु मे कष्टं स्पष्टं हि पिता त्वमिष्टदिष्टमसि ॥ १२३ ॥

बन्धुरसि त्वं करुणासिन्धुः किं ते प्रतिप्रियं कुर्याम् ।
न भवत्प्रभवोपकृतेस्त्रिभुवनसाम्राज्यमप्युपैति तुलाम् ॥ १२४ ॥

यदमूल्यैषोपकृतिस्तदमूल्यतयैव वर्ततां हृदये ।
स्वत उत्कृष्टं कृतधीरपकृष्टतमं क ईहते कर्तुम् ॥ १२५ ॥

मृदुहृदय कदापि हृदा त्वदुपकृतिं नैव विस्मरामि हरे ।
इयमातनुतेऽतनु ते तारकमाचन्द्रतारकं हि यशः ॥ १२६ ॥

कच्चित् कुशली नाथः कौसल्यानन्दवर्धनो रामः ।
अनुजन्मसमेतो मां दनुजन्महृतां कदावति प्रणताम् ॥ १२७ ॥

स्वविरोधिशिरोधिच्छित्खरतरशरजालभीकरः समरे ।
रामः स कदा रावणमामयमिव सद्भिषग्घरेत हरे ॥ १२८ ॥

कल्पतरुश्रितवितते: कल्पयति ममाप्यनन्यभाविन्याः ।
रामः शत्रुविरामः कामं कल्याणदः कदा कामम् ॥ १२९ ॥

इति पृच्छन्त्यां तस्यां मतिमान् हरिराह तां तथार्तिहताम् ।
धीमाननुचिन्तयति श्रीमानिदमेव नित्यमवनिसुते ॥ १३० ॥

रामः स न जानाति त्वामत्र निवासिनीं वशी वशिनीम् ।
मातर्मयि कथयति सति नातः परमम्ब हे विलम्बयति ॥ १३१ ॥

अम्ब वनौकःकोटिभिरम्बुधिमुल्लङ्घ्य राघवः सहसा ।
आयाति भवद्भर्ता मायाविकुलाखिलस्य संहर्ता ॥ १३२ ॥

नरवानरसख्यं कथमासीदिति सीतया तया पृष्टः ।
आह हनूमानस्यै भूयः प्रणयं विवर्धयंस्तस्यै ॥ १३३ ॥

शरचापधरौ शूरौ स निरीक्ष्य भ्रातरौ महावीरौ ।
भीतस्तत्त्वबुभुत्सुर्मामेव प्राहिणोत् पतिस्ताभ्याम् ॥ १३४ ॥

वरवर्णिनि नरवर्णौ संनिधिमधिगत्य राघवस्याहम् ।
अकरवमनयोः सख्यं सत्यमवेत्याहितप्रजासौख्यम् ॥ १३५ ॥

कृतवित् स पवनतनुभूः स विभुः स्वविभूतिमाश्रितस्तेन ।
लङ्कां भस्मीकुरुते शङ्कां त्यज देवि देवताविनुते ॥ १३६ ॥

तनुतनवस्त्वमिव कपे कपयः सर्वेऽपि ते कथं पृथुभिः ।
रणविजितसुरैरसुरैः समरं समरंहसः करिष्यन्ति ॥ १३७ ॥

इति तस्याः संदेहं स्वं देहं मेरुमन्दरप्रतिमम् ।
कृत्वा व्यपनीय तया यतया प्रोक्तः स पूर्वरूपमगात् ॥ १३८ ॥

प्रत्ययहेतुं नेतुः किंचिदभिज्ञानमर्पयेत्युक्त्वा ।
प्रीता तस्मै सीता चूडारत्नं ददौ सतीरत्नम् ॥ १३९ ॥

रत्नं स्वेष्टाकर्षणफलकमिवामूल्यमूलिकारत्नम् ।
स कपिः प्रादाय मुदा मेने कृतकृत्यमात्मनात्मानम् ॥ १४० ॥

आह रहोवृत्तं सा पदमपि सीता पतिव्रतोत्तंसा ।
प्रज्ञातमभिज्ञानं पत्युः प्रेमप्रभावविज्ञानम् ॥ १४१ ॥

अङ्के प्रणिधाय शिरः पङ्केरुहलोचने ममाधिवनम् ।
निद्रितवति निर्णिद्रः कश्चित् काकस्तुतोद मेऽङ्गुष्ठम्[1] ॥ १४२ ॥

उत्थायाथ तमैन्द्रं निध्याय चुकोप काकमस्तोकम् ।
अभिमन्त्र्यास्त्रेण तृणं चिक्षेप रघूत्तमस्तदा तस्मै ॥ १४३ ॥

भीतस्तेन स काकः साकः संभ्रान्तसर्वलोकः सन् ।
कुत्राप्यपरित्रातस्त्राहीति पुनस्तमेव राममगात् ॥ १४४ ॥

निरीक्ष्य स दयानिधिः शरणदः शरण्यार्थिनं
परीक्ष्य गुणवत्तया शरनिराकृतैकेक्षणम् ।
ररक्ष स हि रक्षकः किमिति मां हृतां रक्षसा
न रक्षति निरागसं निगद हे मरुन्नन्दन[2] ॥ १४५ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये नवमः सर्गः

[1] The statement in the *V.R.* in this context is *vidadāra stanāntare* (Sundara., canto 38, verse 22). Our author substitutes *tutoda me 'ṅguṣṭham*. See the Introduction.

[2] The metre is *pṛthvī*.

दशमः सर्गः

पावनिराकर्ण्य जगत्पावनया कुम्भिनीभुवाभिहितम् ।
प्राहाभयदायिवचः स्वाहामिव चेतसानपेतपतिम्[1] ॥ १ ।

लक्ष्मीपतिरिव लक्ष्मीमक्षीणपराक्रमः स रामस्त्वाम् ।
रक्षोगणमक्षोभ्यं प्रक्षोभ्य शरैः पुरं पुनर्नयति ॥ २ ॥

मातः शृणु मद्वचनं नेतः परमस्ति ते परं कष्टम् ।
वार्ताश्रवणाभावादार्तासि गताथ शोच्यते किमिति ॥ ३ ॥

स विरोधिशिरोधिच्छिद् द्विषदवरोधावरोधखिन्नां त्वाम् ।
संप्रति मत्तः श्रुत्वा संप्रमिततया क्षणादुपैति रणात् ॥ ४ ॥

नाभ्यवहरति स्वपिति व्याहरति सदा तवैव नाम मुदा ।
हृदयादनपेतां त्वां स दयानिधिरेति धीरधीरास्स्व ॥ ५ ॥

अम्ब विलम्बयतो मे कार्यविलम्बोऽवलम्बनीयः स्यात् ।
अर्हस्य पुनर्यातुं मातर्वैदेहि देहि मेऽनुज्ञाम् ॥ ६ ॥

इति जल्पन्तमजल्पन् मतिमन्तं साधु सा हनूमन्तम् ।
सपदि यियासून् मदसून् मुद्रिकयेशस्य मुद्रितानकरोः ॥ ७ ॥

[1] This verse is missing in MS. A.

जिगमिषति त्वय्यसुदे युगमितनिमिषास्मि निर्वहामि कथम् ।
इति चकितमतिं सीतां वातात्मज आह तामभीतात्मा ॥ ८ ॥

मातर्मा भैषीस्त्वं प्रातः कमलाक्षि रोचते यदि ते ।
समधिष्ठितमत्पृष्ठां निमिषान्नेष्यामि रामसांनिध्यम् ॥ ९ ॥

न गतिप्रतिबन्धो मे जगति प्रतिविद्यते जगन्मातः ।
इति तेन तदाभिहिता सीता परिभाव्य भव्यमाह वचः ॥ १० ॥

बलवानलमेव भवान् नेतुं नेतारमद्य यद्यपि माम् ।
रामे रणहतरक्षस्तोमे तेनानुगन्तुमिच्छा मे ॥ ११ ॥

तत्तस्य जगत्त्रितयीवित्तस्य रघूत्तमस्य मे पत्न्याः ।
सदृशमिति प्रतिभाति हि सत्याः सत्यापितासुरक्षत्याः ॥ १२ ॥

इत्युक्तवतीं सीतां प्रत्युक्तपराक्रमः स रामसखः ।
तुष्टाव परं बहुधा दुष्टासुरभारभञ्जनैकरतिम् ॥ १३ ॥

अचिराद् रक्षति स यथा रुचिराननचन्द्रदर्शनोन्मनसम् ।
साह वरारोहा मामाहवशूरस्तथा हरे ब्रूहि ॥ १४ ॥

धर्ममवाप्नुहि[1] वाचा धर्मज्ञ दयालवाल दाक्षिण्यम् ।
जनयाञ्जनेय धीमन्ननया किं मामकीनबोधनया ॥ १५ ॥

देवरमपि मद्वाचा देवरतं ब्रूहि कर्मणा प्राचा ।
प्राप्तफलायां मयि ते नात्तस्योपेक्षणं यशोहेतुः ॥ १६ ॥

[1] The expression in the *V.R.* in this context is *vācā dharmam avāpnuhi*. (Sundara., canto 39, v. 10). See the Introduction.

रघुवीरपदाम्बुजयोः कपिवीर ब्रूहि मन्नमोनियुतम् ।
याहि यथासुखमस्मादायाहि स्वामिना समं सहसा ॥ १७ ॥

वस वासरमत्र फलप्रसवातिमनोहरे वने वैकम् ।
गमनश्रममपनुद निर्गमनं श्वस्ते हरे सुखायास्तु ॥ १८ ॥

मारुतिरथ सीतायाश्चारुतराङ्घ्रिद्वयीं प्रणम्य सुधीः ।
तामाश्वास्यामृतवाग् रामाश्वासाय तत्वरेऽथ परम् ॥ १९ ॥

अव्याजप्रेमरसात् स व्याहृतमङ्गलाशिषस्तस्याः ।
कृच्छ्रात् प्राप्यानुज्ञामुच्छ्रायितमुत् प्रचक्रमे गन्तुम् ॥ २० ॥

स्वच्छमतिः स हनूमान् गच्छन्नित्थं विचिन्तयामास ।
कृतकार्याकृतरोधं कृतमन्यदपि प्रशस्यते विकृतम् ॥ २१ ॥

रक्षःपतिना साकं दक्षः संभाष्य गन्तुमिच्छामि ।
घटते तन्न विनाजिं स्फुटमत उत्पाटयामि कुटराजिम् ॥ २२ ॥

इति निश्चितदोर्विभवः प्रबभञ्ज वनं प्रभञ्जनप्रभवः ।
स पितेव सुतोऽतिबलः कुपिताहततद्वनावनारिबलः ॥ २३ ॥

अकलङ्कसुधांशुयशः सकलं लङ्कापतेरसौ शकलम् ।
कुर्वन्ननवधिगर्वात् सूनवनं तच्चकार सूनवनम् ॥ २४ ॥

कोऽयं कपिरिति सीतां पप्रच्छुरथोत्थितास्तु राक्षस्यः ।
साह विजाने नैनं युष्मन्माया हि जानते क इति ॥ २५ ॥

निजगदुरथ ता भीताः सीतां संत्यज्य रावणाय गताः ।
कोऽपि हरिः कोपिहरस्त्वदशोकवनं चकार शोकवनम् ॥ २६ ॥

स श्रुततद्वागादिशदस्मृतनन्दीशशापवागसुरः ।
स्ववशीकरणाय कपेः स्वमशीतिसहस्रकिंकरप्रकरम् ॥ २७ ॥

अथ ते धनुरसिमुसलप्रासगदापरशुपट्टसादिधराः ।
यावदमी निर्जग्मुस्तावद् यमकिंकराः सराजाज्ञाः ॥ २८ ॥

कृतवनभङ्गः स हरिश्चैत्यप्रासादमप्रसादपरः ।
अभ्रंकषमतिशुभ्रं यश इव शत्रोरपातयत् सुयशाः ॥ २९ ॥

नानायुधसंनद्धान् मानातीताभिमानकृतयुद्धान् ।
हरिरिव स हरिर्हरिणानहरत् प्रासादपालिनो बलिनः ॥ ३० ॥

तानपहृत्य बलादथ मानधनः क्ष्वेलितैर्दिशो दलयन् ।
प्रार्थयमानः स रणं सार्थकधीः प्राप तोरणं शरणम् ॥ ३१ ॥

रक्षःकिंकरपटली किंकरपटलीव सा यमस्यास्य ।
प्रतिपेदे दृष्टिपथं मुष्टिपदाघातकेलिलोलस्य ॥ ३२ ॥

हरिरिव हरिरयमुदयं तोरणमपयन् रणं निरस्तदयम् ।
कृत्वा करपादहतैः किंकरवारं निवारयामास ॥ ३३ ॥

रक्षांसि तमांसीव प्राप्य हरिं तं हरिं यथैनांसि ।
हरिभक्तमिवासक्तं कर्माणीवाफलानि लीनानि ॥ ३४ ॥

निर्जितकिंकरनिकरे गर्जति पर्जन्यवत् पुनस्तस्मिन् ।
भीताः कतिचन दूतान् रणनिहतान् रावणाय तानूचुः ॥ ३५ ॥

दष्टाधरमथ कुपितो दृष्ट्वासुरचक्रवर्त्यलं कपितः ।
पञ्च बलाध्यक्षानरिवञ्चनकरणाय चोदयामास ॥ ३६ ॥

रथगजवाजिभटावलिवलिताः पञ्चापि तेऽरिपञ्चास्यम् ।
तोरणशरणं गत्वा ते रणमतिदारुणं तदा तेनुः ॥ ३७ ॥

उग्राहवलोलमतिर्जग्राह स लोलमुद्गरं हनुमान् ।
तूर्णं तद्बलमखिलं चूर्णं चक्रेऽथ तेन चक्रीव ॥ ३८ ॥

हरिवन्नदति हरीन्द्रे पुनरपि निष्पिष्टदुष्टरक्षस्के ।
तानपि निहतानाजावूचुः केचित् प्रधाव्य तद्भर्त्रे ॥ ३९ ॥

रक्षःपतिरथ स श्रुतरक्षःशिक्षः क्रुधातिशोणाक्षः ।
मन्त्रिभिरभिमन्त्र्य समं मन्त्रिसुतान् सप्त चोदयामास ॥ ४० ॥

कालेन यथा रक्षःपालेन नियोजितास्तु ते सप्त ।
संख्यातीतबलैः सह संख्याय हनूमता विनिर्जग्मुः ॥ ४१ ॥

मारुतिरथ तानेतान् मारुतवच्चास्त्रवर्षिणः स घनान् ।
दर्शनसमकालकृतादर्शनभावाङ्कितक्विपश्चक्रे[1] ॥ ४२ ॥

हरिहर्यक्षे पुनरपि तोरणमासाद्य दुःसहक्ष्वेले ।
श्रुततद्वचो दूतैः क्रोधविवृत्तेक्षणः क्षपाचरराट् ॥ ४३ ॥

रक्षःपतिरथ साक्षात् त्र्यक्षं मन्दोदरीसुतं दक्षम् ।
अक्षं विजितविपक्षं शिक्षय रिपुमित्यशाद् विशालाक्षम् ॥ ४४ ॥

स विनिर्गत्य बलैः सह रविबिम्बविभेदिभेरिकारावैः ।
अच्छेद्यतनुं प्लवगं चिच्छेद शितैः शरैः समस्ताङ्गे ॥ ४५ ॥

[1] This is a reference to the grammatical point about the *kṛt-* suffix *kvip*, which is known as *sarvalopin*. Not a single letter of this suffix comes down to practical usage.

सोऽपि स्वकदोःस्तम्भप्रापितमहनीयमण्टपस्तम्भः ।
प्रममाथ बलं सकलं समरेऽध्यक्षैः समं समक्षमरेः ॥ ४६ ॥

धनुरच्छिनदाच्छिद्य द्विषतो हस्ताद् वलीमुखः स बली ।
अथ तावसिचर्मधरौ खेटाविव खेऽटतुर्विचित्रगती ॥ ४७ ॥

उद्धतविक्रमकतया युद्धमुभौ चक्रतुस्तदा वक्रम् ।
ववृधे वज्रशरीरो हरिरथ नीचैर्बभूव तत्राक्षः ॥ ४८ ॥

उत्पतति रथात् तस्मिन् रक्षसि नीचैरिवास्थितोऽधस्तात् ।
निगृहीततदङ्घ्रिः सन्नुच्चैरुद्भ्राम्य पातयामास ॥ ४९ ॥

स प्रस्तरनिक्षिप्तः क्षिप्रं संभिन्नमस्तकस्त्वक्षः ।
स पुरेव ययौ स्वर्गं स्वपुराद् वरवाससुन्दरीवर्गम् ॥ ५० ॥

हरिवन्निनदति तस्मिन् हरिवीरे तोरणं पुनः प्राप्य ।
श्रुत्वाक्षवधं रक्षोराजः सुस्राव शोकजन्मास्रम् ॥ ५१ ॥

निर्जिगमिषति जिगीषुर्निशिचरनाथे स्वयं तदेन्द्रजयी ।
आगत्य पितुः पादावभिवन्द्याहवं व्रजेयमित्यवदत् ॥ ५२ ॥

इन्द्रजिदथ मन्द्रसमित्संनहनः सर्वसैन्यसंपन्नः ।
भेजे रणभुवमचिराद् भेरीभूरिस्वनैर्दिवं दलयन् ॥ ५३ ॥

स शतारसखैर्विशिखैर्विततार कपेररेरपि प्रमदम् ।
हरिरपि गिरितरुवर्षं तस्मिन् प्रववर्ष वार्षिकाब्द इव ॥ ५४ ॥

शरहतगिरितरुवर्षः स रहस्यविदस्त्रवेदविद्यायाः ।
दुःसहविक्रममेनं कः सहत इति स्फुटं स मेनेऽन्तः ॥ ५५ ॥

अनितरशस्त्रनिबर्हणमेनं निर्णीय रावणिर्मनसा ।
जिह्ममतिः पवनसुतं ब्रह्मशरेणाबबन्ध निर्व्यसु तम् ॥ ५६ ॥

प्रशशंसुरथेन्द्रजितं स्वीयाः सर्वेऽपि राक्षसेन्द्रसुतम् ।
पतितमिवार्कं भुवि तं चक्रुः शणवल्कसारसंवीतम् ॥ ५७ ॥

अनितरबन्धसहत्वाद् ब्रह्मास्त्रस्याथ तेन निर्मुक्तः ।
सेहे स हनूमान् परमसुरपतिं द्रष्टुमिष्टमरिबन्धम् ॥ ५८ ॥

अथ ते निशिचरयोधाश्छिन्दन्तस्तं तथा विनिन्दन्तः ।
रावणसंनिधिमधिकं भीतवदवलोकयन्तमानिन्युः ॥ ५९ ॥

राक्षसपतिरथ रूक्षश्चक्षुर्भिर्निर्दहन्निव प्रेक्ष्य ।
हरिहर्यक्षं साक्षात् त्र्यक्षं प्राह प्रहस्तमध्यक्षम् ॥ ६० ॥

कोऽसौ किमितश्च वनं विबभञ्ज शुभं जघान चाक्षमुखान् ।
प्रष्टव्य इति स्पष्टं निर्दिष्टः पृष्टवान् स रुष्टात्मा ॥ ६१ ॥

अभयस्तत्र सभायां तिष्ठन्नग्रे निशाचरप्रष्ठम् ।
प्राह प्रणमद्रक्षोव्यूहं प्रत्युत्तरं प्रसिद्धतरम् ॥ ६२ ॥

दासः कोसलवसतेः श्रीरामस्यास्मि सार्वभौमस्य ।
सचिवः सुग्रीवस्य प्रकटितमहसां वनौकसां भर्तुः ॥ ६३ ॥

नाम्ना चास्मि हनूमानाम्नायमयस्य धर्मपुत्रोऽहम् ।
पवमानतनूजो द्विषदवमानविधाय्यखर्वदोर्गर्वः ॥ ६४ ॥

सीतापतिना प्रहितः सीतां द्रष्टुं पुरीमिमां प्राप्तः ।
वनभञ्जनमस्माकं प्रकृतिर्निहतास्तु मन्निहन्तारः ॥ ६५ ॥

स हि सुग्रीवोऽत्युग्रः प्राह दशग्रीव मन्मुखेन त्वाम् ।
त्यज राजसुतां सीतां न हि ते प्राणा न चेज्जहासि सतीम् ॥ ६६ ॥

रावण रणभुवि मरणं रामशरेभ्यस्तवाशरेभ्य भृशम् ।
प्रत्यर्पितसीताकः शरणं यदि न प्रयासि तच्चरणम् ॥ ६७ ॥

झटिति त्यज तां सीतां जडिमानमपास्य चेज्जिजीविषुता ।
करुणाजलधिः स महाञ्छरणागतरक्षकः प्रसीदति ते ॥ ६८ ॥

कृतवानसि दुष्कृत्यं वचनं नैवं शृणोषि मे पथ्यम् ।
नप्ता विश्वसृजस्त्वं गोप्तासि समस्तरक्षसां बत रे ॥ ६९ ॥

पुत्रश्च पुलस्त्यस्य प्रकृतिः पापीयसी तथाप्यासीत् ।
वीतायुषमद्य त्वां सीतामोहेन मृत्युना ग्रस्तम् ॥ ७० ॥

नष्टं नेष्टे कोऽपि त्रातुं तातः पितामहः केऽन्ये ।
शृणु मद्वचनं सत्यं न त्वं नेमे निशाचरा राजन् ॥ ७१ ॥

अविनाभूतविनाशाद् विपरीतधिया परं परीतानाम् ।
न रसायनमपि रसवद् विरसाय मुमूर्षवेऽपि पीयूषम् ॥ ७२ ॥

कति कति न मया नीता इति मनुषे मानुषान्यकामिन्यः ।
अनयासि हतस्त्वनया न हि ताः सीता न तत्पती रामः ॥ ७३ ॥

[1]इङ्गालानां स्पर्शो भङ्गाय न चाल्प कल्पतेऽङ्गानाम् ।
[1]अङ्गारस्याङ्गारे स्पर्शस्तनुतेऽङ्गभङ्गमस्तनुते ॥ ७४ ॥

[1] The *Vaijayantīkośa* notes *praśāntārcir iṅgālaḥ*. *aṅgāra* is burning charcoal, and *iṅgāla* refers to the charcoal after the fire has been extinguished.

रघुसिंहधनुर्मुक्ता लघुशरपङ्क्तिः परं शिरःपङ्क्तिम् ।
अचिराद् बलिमातनुते रुचिरा रणभूमये विनिश्चिनु ते ॥ ७५ ॥

इति कर्णकठोराक्षरमुक्तवति कपौ स पापचेतस्कः ।
निदिदेश निशाटभटान् स्फुटमसिभिरसौ हठाद् विशस्य इति ॥ ७६ ॥

न हि दूतवधो दृष्टः स हि दुष्टवचाश्चिकित्स्यतां तावत् ।
इति शास्त्रगिरा सुकृती निरुरोध विभीषणोऽसिघातमतिम् ॥ ७७ ॥

तर्हि प्रियपुच्छतया बर्हिःप्रतिलीढपुच्छकं कुरुत ।
रामयतान्तःकरणं भ्रामयतामुं पुरेऽत्र सर्वत्र ॥ ७८ ॥

अज्ञाननिधेराज्ञां विज्ञायाभिज्ञमानिनो राज्ञः ।
वस्त्रैस्तैलनिषिक्तैस्तद्वालमवेष्टयन्नतीवालम् ॥ ७९ ॥

स तथा ववृधे वालः पवनभुवो दीर्घदर्शिनो दीर्घः ।
लङ्कावासः सर्वं संवेष्टयितुं तथा यथा नालम् ॥ ८० ॥

तस्य विशालं वालं ते तत्राह्वाय वह्निनादीप्य ।
निन्युर्नृपसरणिं तं निशिचरयोधा निरुद्धसद्योधाः ८१ ॥

अथ ते निशिचरयोधा दधतो दृढबद्धरज्जुपर्यन्तान् ।
पश्यत रामप्रहितं दूतं हि तमित्यघोषयन्नुच्चैः ॥ ८२ ॥

पटुपटहमहारावैः स्फुटतरकरतालमुच्चरत्क्ष्वेलम् ।
अनुजग्मुरमुं तिग्मद्युतिमिव चक्षूंषि तत्र रक्षांसि ॥ ८३ ॥

तनुमतितनुमथ तन्वन् विगलितबन्धो विधूतनिर्बन्धः ।
अतिवेगादिव खगपतिरुदपतदसुरेन्द्रचन्द्रशालान्तम् ॥ ८४ ॥

अरिभूपतिभूरिपुरीपरिभूतिरनेन वह्निना सुकरा ।
मारुतिरिति मत्वा तच्चारुतरं वेश्म वह्निसाच्चक्रे ॥ ८५ ॥

स गृहाद् गृहमुत्प्लुत्य प्रत्यग्रकुशाग्रधीरथारिपुरीम्
अग्राहयत समग्रां वालाग्रोदग्रवह्निनाह्वाय ॥ ८६ ॥

पुरभिच्छरभिन्नपुरप्रतिमा द्युतिमात्रवीतिहोत्रहुता ।
स्वाहाकारायितघनहाहाकाराप मृत्युवक्त्रतुलाम् ॥ ८७ ॥

प्रज्वलदुग्रज्वलनज्वालामालावलीढसर्वगृहा ।
सा लङ्कालं कालप्रमथननृत्तप्रधानभूमिरभूत् ॥ ८८ ॥

स विभीषणवेश्म विना सकलं पुरमग्निसाद् विधाय सुधीः ।
शुश्रावासुरयोषिन्मिश्रार्तिरवं श्रवःसुखं सुमुखः ॥ ८९ ॥

तत्र हनूमति लङ्कां चित्रं दहति प्रतिक्रियानीशाः ।
पुरमपहाय निशाटाश्चिरमवसन् दूरतः शिरःशाटाः[1] ॥ ९० ॥

दारापत्यधनादीन् प्रसभं हित्वा पलायमानास्ते ।
मध्येलङ्कमशङ्कं कपिना केचिन्निपातिताः पतिताः ॥ ९१ ॥

वालं न ददाह हरेः पालम्ब इव प्रलम्बमानोऽग्निः ।
सीतापातिव्रत्याद् वातात्मभवस्य शीतलो भूत्वा ॥ ९२ ॥

[1] *śiraḥśāṭāḥ* seems to be Sanskritization of an idiom in the regional languages of South India. When sombody is in distress, and compelled to leave home, he is said to go away covering his head in shame with the upper garment, the only property left him.

रामस्याहं दासः सुग्रीवस्य प्रभोः प्रधानपुमान् ।
कोटिरपि रावणानां नाटीकृत एव मे नखाग्रतुलाम् ॥ ९३ ॥

इत्यसकृन्मारुतिना प्रत्यसुरसमक्षमुल्लसद्धृतिना ।
उदपादि कठोरपदं पदघातनिपातितासुरेन्द्रपुरम् ॥ ९४ ॥

लङ्कापुरदाहनिरातङ्काविर्भूतभूरिघोररवः ।
प्रलयभ्रममातेने दलयन् दिग्दन्तिकर्णकुहराणि ॥ ९५ ॥

उत्कामरदृष्टासुरतत्कालभवार्तशब्दधाराभिः ।
उदपादि सुरीशोकच्छिदपारमहोत्सवो जगत्सु तदा ॥ ९६ ॥

कालानललीलावहवालानलमालिकापरीतपुरीम् ।
स निरीक्ष्य चकार तदावनिजां प्रति साप्यमुं चिरं चिन्ताम् ॥ ९७ ॥

वालं विपरीताग्निज्वालं निर्वाप्य मारुतिः सिन्धौ ।
क्षामामधिगतयोगक्षेमां भूयो ननाम तां सीताम् ॥ ९८ ॥

सापि निपीय दृशैनं प्रणमन्तमथाक्षतं हनूमन्तम् ।
स्वक्षेमदर्शनागतमक्षीणमुदाह मङ्क्षु याहीति ॥ ९९ ॥

अम्ब तवोदारकृपालम्बनचक्षुर्निरीक्षिताङ्गतया ।
दहनोऽपि ददाह न मां महिमैष तवैव देवि तेऽस्तु नमः ॥ १०० ॥

इत्यसकृन्नत्वा तामत्यवहितधीस्तदा तदाज्ञातः ।
पुनरपि कपिवीरोऽब्धिं तीर्त्वा पर्जन्यवज्जगर्ज मुदा ॥ १०१ ॥

भित्वाशाः खमदन्तं श्रुत्वा कपिसिंहसिंहनादं तम् ।
बभ्रमुरुन्नमितमुखा विभ्रमवशगास्तदाङ्गदप्रमुखाः ॥ १०२ ॥

प्रतिगर्जत्सु प्रमदात् तेषु कपीन्द्रेषु तीर्णपाथोधिः ।
समहः स महेन्द्रगिरावक्तीर्णस्तूर्णमभ्रतोऽभ्र इव ॥ १०३ ॥

अथ संभाव्य यथार्हं तांस्तैः संभाव्यमान एवार्हन् ।
सीताशीतलवार्ताश्रवणप्रवणान् हरीन् हरिः प्राह ॥ १०४ ॥

दृष्टं ननु युष्माभिर्लङ्घनमुदधेरलङ्घनीयस्य ।
सुरसा मध्येमार्गं तरसा व्यरुणन्ममाहिसूर्मार्गम् ॥ १०५ ॥

तामतिलङ्घ्योपायाद् व्रजतो मम सिंहिकाग्रहीच्छायाम् ।
पद्भ्यां तामच्छिन्दं पारं परमम्बुधेस्ततोऽविन्दम् ॥ १०६ ॥

लङ्कां जित्वा सतनुं लङ्कामविशं वशी निशीथिन्याम् ।
सकलं पुरमवलोक्याविकलं विकलोऽस्मि तामनालोक्य ॥ १०७ ॥

अथ दैववशादवशादविशं तदशोककाननं यत्र ।
दर्शनमखिलैनोनिष्कर्शनमभवन्ममावनीजायाः ॥ १०८ ॥

आर्तां जयलक्ष्मीमिव मूर्तामसुरेन्द्रभर्त्सितां सीताम् ।
मार्ताण्डान्वयकेतोर्वार्ताभिरमोदयं दयावालाम् ॥ १०९ ॥

आश्वास्य सविश्वासां भर्तुरभिज्ञानदानतोऽथ नतः ।
कृततद्वनभङ्गस्तत्प्रकुपितरक्षोभटच्छटाच्छिदहम् ॥ ११० ॥

अथ शक्रजिता बद्धो ब्रह्मशरेणासुरेन्द्रसंनद्धः ।
अनुशास्य नयं तमनयमर्पितवह्निस्तदास्मि लाङ्गूले ॥ १११ ॥

तदहं तत्पुरमखिलं व्यदहं वालाग्निनैव रुष्टालम् ।
दृष्ट्वा पुनरपि सीतां कृतकृत्यो वः प्रसादतः प्राप्तः ॥ ११२ ॥

स्फीतासुरपुरमथितुः सीतावार्तामृतं निपीय हरेः ।
खेटा इव तेऽखेलन्नैशपदस्योद्दिदृक्षया हरयः ॥ ११३ ॥

मधुवनमथ ते राज्ञः सुग्रीवस्योग्रशासनस्यायन् ।
दधिमुखमभिभूय वनावनमुखमखिला वलीमुखाः प्रमुखाः ॥ ११४ ॥

पृथुमधुपानापीनावशचरसेना विवासितव्यसना ।
गणयति राज्ञो नाज्ञामिति स नतो वालिसूनवे प्राह ॥ ११५ ॥

दधिमुख इत्थं यूने राज्ञे विज्ञापयत्यधीरसुखे ।
अधिमुखवल्दवहेलैः प्रमदैः प्रादर्शि देवमार्गोऽस्मै ॥ ११६ ॥

स प्राह युवा राजाभिप्रायमथात्मनस्तथैवेति ।
अप्रहतहिताचारः स प्रययौ तत्र यत्र सुग्रीवः ॥ ॥ ११७ ॥

नत्वा स जयाशंसापूर्वकमवनीभुजे शशंसालम् ।
मधुवनमधुना तव तन्निर्मधु निर्मथितमङ्गदप्रमुखैः ॥ ११८ ॥

दधिमुखवचनश्रवणादधिगत्य कृतार्थतां कपीनां सः ।
अपि तां सीताभर्त्रे प्रमुदा समुदाजहार पीनांसः ॥ ११९ ॥

उग्रां सुग्रीवाज्ञामकृतार्थाश्चेन्न लङ्घयेयुस्ते ।
कृतदुष्करकार्यतया प्रततोत्साहेन मन्मधूनि पपुः ॥ १२० ॥

रामः सहसौमित्रिः कामपि संप्रीतिमास्थितोऽथाह ।
आनय तर्हि महात्मंस्तानविलम्बेन वानराधिपते ॥ १२१ ॥

अथ दधिमुखमेव तदानयनाय प्राहिणोत् प्रभुः स तदा ।
स च गत्वाङ्गदमुख्यान् मत्वा तानानयत् प्रभोर्मुख्यान् ॥ १२२ ॥

पवमानसुतप्रमुखाः पवमानरयेण ते समागत्य ।
रामस्य नवीनघनश्यामस्य ववन्दिरे पदाम्बुरुहे ॥ १२३ ॥

लक्ष्मणमपि राजानं नत्वा शिरसाथ तैः परं पृष्टाः ।
द्रष्टारं सीतायास्तुष्टाः प्रादर्शयन् हनूमन्तम् ॥ १२४ ॥

हृष्टात्माथ हनूमान् दृष्टा सीतेति मञ्जुलां वाणीम् ।
[1]उक्त्वा रामाश्लिष्टस्त्यक्त्वा बन्धं जगाम चिद्घनताम् ॥ १२५ ॥

सीताचूडापीडं नूत्नं रामाय दर्शयन् रत्नम् ।
काकार्तिकथापूर्वकसीताशोकार्तिमीरयामास ॥ १२६ ॥

रमणीमणिमिव चूडामणिमुपनीतं निधाय हृद्देशे ।
मुक्तास्रजमिव चक्षुर्जलकणजालं स कल्पयामास ॥ १२७ ॥

बुद्ध्वा चिरमथ दध्यावध्यासवचःश्रुतेः स सीतायाः ।
वध्वाननसरसीरुहमध्वास्वादप्रसक्तचित्ततया ॥ १२८ ॥

अथ जिज्ञासौ रामे प्राह हनूमान् यथाक्रमं सर्वम् ।
पारावारविलङ्घनमुखदशमुखपत्तनप्रदाहान्तम् ॥ १२९ ॥

शतयोजनमितवार्धेस्तरणं सुरसावरोधनिःसरणम् ।
मैनाकमनःप्रीणनमात्तस्वच्छायसिंहिकाहननम् ॥ १३० ॥

[1] MS. B seems to have one more verse before the second half of this verse, which is however not very clear. The following words can be made out:

rāmabhujāśliṣṭatanuḥ premabharāt pavananadanas tadanu.

सैन्धवपरतटनटनं निर्जितलङ्काजयोक्तिसंघटनम् ।
निशि निशिचरपुरगमनं प्रतिगृहसौधप्रवेशनिर्गमनम् ॥ १३१ ॥

तत्र हि सर्वत्र पुरे तदनवलोकेन चिन्तनं च चिरम् ।
दर्शनमथ सीतायाः कर्शनमखिलैनसामशोकवने ॥ १३२ ॥

भर्त्सनमसुरेन्द्रभवं तर्जनमसुराङ्गनाभवं तस्याः ।
समये सति संभाषणमर्पणमीशाङ्गुलीयमुद्रायाः ॥ १३३ ॥

विश्वासमथाश्वासं तद्वनभङ्गं रणप्रसङ्गं च ।
अक्षाद्यरिशिक्षां च स्वस्य ब्रह्मास्त्रबन्धमैन्द्रजितम् ॥ १३४ ॥

दृष्टाभिभर्त्सिताधिकरुष्टासुरराजशासनात् पुच्छे ।
घनवह्निसमर्पणमथ तेनैव तदीयसर्वपूर्दहनम् ॥ १३५ ॥

सर्वमिदं मदभिहितं सत्यं सत्यस्वरूप यद्धि हितम् ।
कुरु गुरुरसि राम धिया न विलम्बनमत्र युज्यते कर्तुम् ॥ १३६ ॥

धर्षयितुमशक्या सा नगरी चतुरङ्गसेनयाजस्रम् ।
अरिघातुकपरिघाभिः प्राकारैर्मेरुमन्दराकारैः ॥ १३७ ॥

यद्यपि पटुगुप्तितया ह्यतयैवारिपूरनिर्भेद्या ।
संभूयापि सुरासुरसङ्घैः किं भूयसा ममोक्तेन ॥ १३८ ॥

श्रीराम तथापि मया कृपया तव तत्र यत् कृतं शृणु तत् ।
भग्नः प्राकारचयः परिघा परिपूरिता महाश्मचयैः ॥ १३९ ॥

अरिदुःसंक्रमसंक्रमधीरचतुष्टय्यधः कृता श्रीमन् ।
अरिनिर्मथनमहोत्कटघोरशतघ्नीचयश्च विध्वस्तः ॥ १४० ॥

रक्षोराजबलौघः प्रक्षोभ्य मया हतश्चतुर्थांशः ।
गोष्पदमितमपि न पदं दग्धं न हि विद्यतेऽद्य तत्र पुरे ॥ १४१ ॥

श्रीमन् राम महात्मन् साकं सूर्यात्मजन्मना स्वामिन् ।
पश्यसि यदि वीररुषा नश्यति सद्यः परं परस्य पुरम् ॥ १४२ ॥

अरिंदण्डनाधिरोपितकोदण्डगुणध्वनिं तवाकर्ण्य ।
हरिणा इव हरिनादादपहाय पुरीं परे पलायन्ते ॥ १४३ ॥

सत्वरमभिगन्तव्यं गत्वरजीवां सतीं सुजीवयितुम् ।
जित्वर राम महात्मन्नत्वरमाणः कथं लभेत शुभम् ॥ १४४ ॥

इति क्षितिसुताकथाक्षरसुधासमास्वादना-
लसत्यसमसंमदं सपदि रामचन्द्रानने ।
जलैरिव बलैर्वलीमुखपतिर्यथापां पति-
र्मृधाय ववृधे द्विषद्गुरपुरीनिरोधाय सः[1] ॥ १४५ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये दशमः सर्गः

[1] The metre is *pṛthvī*.

एकादशः सर्गः

अथ दाशरथी रामो दधदामोदं स सद्गुणारामः ।
प्रशशंस हनूमन्तं कुशलकथाजीवितस्वरामं तम् ॥ १ ॥

दुष्करमयि देवैरपि पुष्करदृग्दर्शनं कृतं भवता ।
उपकृतिरप्रत्युपकृतिरसमतया तेऽसमं यशः सूते ॥ २ ॥

शतयोजनविस्तीर्णं कतमः सरितां विलङ्घयेत पतिम् ।
ससुरासुरसुदुरासदमसुराधिपतेः पुरं प्रदग्धुमलम् ॥ ३ ॥

आहाथ कपीशानं स्नेहादाहूय सूर्यजन्मानम् ।
दुर्जयरावणनगरीनिर्जयलाभाय निश्चिनूपायम् ॥ ४ ॥

इति वदति श्रीरामे सूर्यसुतः सूर्यसंस्फुरत्तेजाः ।
प्रत्याह प्रणतशिरा राक्षसराजन्यजन्यलीलोत्कः ॥ ५ ॥

अन्धुमिवामी सिन्धुं सर्वेश वयं तरेम तं सर्वे ।
शुभवन्तौ च भवन्तावंसोत्तंसौ हनूमतस्तरतः ॥ ६ ॥

लङ्कापुरविजये नः शङ्कारिविराम राम नैवास्ति ।
असमत्सेनापतयो भस्म व्यातन्वते भवत्कृपया ॥ ७ ॥

श्रीमन् राम महात्मन्नेकेन हनूमता हता विमताः ।
संख्ये संख्यातीताः किमुतास्माभिर्भवद्बलैः सकलैः ॥ ८ ॥

व्यक्तं ब्रूहि हनूमन्नक्तंचरराजराजधान्यास्त्वम् ।
गुप्तिमिति ब्रुवति हरावुक्तिं प्राह प्रणम्य रामाय ॥ ९ ॥

यद्यपि तत्र समग्रा दुर्निग्रहविग्रहोग्रसामग्री ।
भगवन् भवदीयोज्ज्वलतेजोज्वलने तु भस्मसाद् भविता ॥ १० ॥

इति वदति हनूमति तामतिशुभदोपश्रुतिं प्लवङ्गपतिः ।
श्रुत्वाह महाबाहो श्रीमन् विजयामहे वयं लङ्काम् ॥ ११ ॥

श्रीमानथ दाशरथिर्धीमानमरेन्द्रचापचारु दधौ ।
अवशीकृतशत्रुश्रीस्ववशीकरणैकसाधनं स धनुः ॥ १२ ॥

अभिमुखपतदरिविततेरभिमन्त्रदमभीतिदायि चास्माकम् ।
अभिजित्समयेऽमुष्मिन्नभियानमिति प्रणीतवान् रामः ॥ १३ ॥

अभयंकरमाप्ततते: स भयंकरमोज आस्थितोऽरितते: ।
करुणावीररसद्वयवरुणालयसङ्गलीलया शुशुभे[1] ॥ १४ ॥

[1] It is not clear whether the author means *karuṇā* as a separate *rasa*. But, in the texts on dramaturgy, instances of *karuṇā* are noted as cases of *dayā*, which is included in the types of *vīrarasa*, namely as *dayāvīra*. For Ānandavardhana and Abhinava *dayāvīra* is a *nāmāntara* of *śāntarasa*, whereas it is not so for Dhanaṃjaya and Dhanika. See my note 207 to *Daśarūpāvalokalaghuṭīkā* (Adyar Library Series, vol. 97, 1969). The expression *vīra* by itself, generally stands for the *yuddhavīra*. Thus in the person of Rāma in this context, the poet says, one could realize the situation conducive to the aesthetic appreciation involving the two types (*rasadvaya*) technically known as *dayāvīra* and *yuddhavīra*, with friends and enemies as the respective *ālambanavibhāva-s*. This seems to be the significance of the verse. By this the author also seems to hint that in the poem *vīrarasa* is the main *rasa*. See the Introduction.

आकर्ण्य स भानुभवः प्राकरणिकशासनं शुभानुभवः ।
रामस्य रमाभर्तुर्भर्तुः प्रजहर्ष हर्षयन् स्वबलम् ॥ १५ ॥

अथ धन्यः सेनान्यः सर्वानानीय संनिधिं स निधिः ।
संतर्प्य सकलकामैस्तेभ्यः प्राहाहवं समृद्धेभ्यः ॥ १६ ॥

उद्ग्रीवास्ते सर्वे सुग्रीवाज्ञां शिरःस्रजं कृत्वा ।
अरिनिर्मथने नर्मणि कुशलतयालं प्रगर्ज्य निर्जग्मुः ॥ १७ ॥

रवजितहरयो हरयः प्रोच्चलपुच्छाश्च तत्र गोपुच्छाः ।
उल्लल्दाहवलीलापल्लवितमुदस्तदच्छभल्लाश्च ॥ १८ ॥

उद्यत्प्रमदाम्बुधयः प्रोद्यद्दुर्वारवीर्यशेवधयः ।
अनुचरबलविलसद्वरवनचरसेनाधिनायका निरयुः ॥ १९ ॥

स्वबलैकरसं रामं स्वबलैः सहितो वनौकसां राजा ।
स ववार सहायतया नववासरनायकप्रभूतश्रीः ॥ २० ॥

अधिगतशुभलक्षणयोः पथि कृतमनसोस्तु रामलक्ष्मणयोः ।
मुदमुदवहतामथ तावुद्वहनेनाञ्जनेयतारेयौ ॥ २१ ॥

जन्ये रावणमन्ये धन्याः पश्यन्त्वहं परं हन्याम् ।
इति जल्पन्तः संख्यामतिलङ्घ्य वलीमुखा रणाभिमुखाः ॥ २२ ॥

पीनां सपदि कपीनां सेनां संधाय राघवः सेनाम् ।
निश्चक्रामानुपदं कल्पान्तकृतान्तनिश्चयैकपदम् ॥ २३ ॥

सुहृदा सुग्रीवेण श्रीमाननुजन्मना तदा रामः ।
मध्ये मेरुरिवाद्रिः कामपि कान्तिं पुपोष पुष्पवतोः[1] ॥ २४ ॥

[1] Amara notes *ekayoktyā puṣpavantau divākaraniśākarau.*

भानुरिवारुह्य बभौ हनुमन्तं पूर्वसानुमन्तमिव ।
स करैरिव शरनिकरैरुच्छेत्तुमरातिमन्धकारमिव ॥ २५ ॥

अपि गोपवशेऽवर्तत कपिगोपुच्छाच्छभल्लमल्लमयी ।
सेना नानाविकृतिस्त्रिगुणा जगदीशितुर्यथा प्रकृतिः ॥ २६ ॥

यावन्ति जगन्ति यतो जीवन्ति यतोऽपि यन्ति यं चान्ते ।
अपि तस्यादिमपुंसः कपिसेनाकल्पने क आयासः ॥ २७ ॥

क्षितिरुहततिमतिविततक्षितिधरसहितां क्षितिं च तत्समये ।
पिदधाना कपिसेना प्रलयपयोधिप्रभां बभारालम् ॥ २८ ॥

अधरितजलनिधिघोषैः प्रधनोत्सहमानसैन्यनिर्घोषैः ।
वनमपि निरवनमभवत् केसरिकरिकासरादिसत्त्वततेः ॥ २९ ॥

वर्गः कपिसैन्यानां दुर्गमगिरिनिम्नगाशरण्यानाम् ।
आच्छाद्य भुवं गच्छन्नधितटमुदधेरथासिकां विदधे ॥ ३० ॥

असुहृज्जयकामनया स्वसुहृद्भिरलं समेयिवान् रामः ।
सिन्धुं प्रतिबन्धकमपि बन्धुमिव प्रार्थयन्नथानंसीत् ॥ ३१ ॥

नृवरः पवनसुतांसादवतीर्यातीव वीर्यवान् रामः ।
तीरे धीरसमीरे नीरेजदृगम्बुधेश्चिरं दध्यौ ॥ ३२ ॥

भीकरमकरैकपदं भ्रूकुटिगुणमेकमुत्कटोर्मिगणम् ।
विस्तीर्णमगाधममुं निस्तीर्णः स्यां कथं पयोधिमिति ॥ ३३ ॥

दुस्तरदुरधिगमाम्बुधिनिस्तरणोपायनिश्चयाभावात् ।
धीरोऽपि स दाशरथिः शरधिं तं चिन्तयंश्चिरं तस्थौ ॥ ३४ ॥

आत्मानमथ ध्यायति नात्माभिज्ञः परात्मनि श्रीशे ।
अब्धिर्बुद्धिविहीनो न प्रतिपत्तिं न वा प्रसत्तिमगात् ॥ ३५ ॥

अथ परुषरुषा रामः प्रथमः पुरुषः प्रकाशितभ्रुकुटिः ।
यमकरकरवालल्लतासदृशं स्वदृशं पयोनिधौ निदधौ ॥ ३६ ॥

आनय ननु सौमित्रे मानहरं दुर्मदस्य मच्चापम् ।
पापमिवापो जलधेः शोषं गमयामि सैनिकांस्तोषम् ॥ ३७ ॥

पश्यन्तु सुराः सर्वे मच्छरमहिमानमुद्यताश्चर्यम् ।
पद्भ्यामेव कपीशा गच्छन्तु गतव्यथाः प्रतापीशाः ॥ ३८ ॥

इति धनुरारोप्य रुषा तत्र शरं कल्पभानुमत्कल्पम् ।
संदधति तदा रामे विचचाल सहाचला चलैः सकलैः ॥ ३९ ॥

परुषरुषि परमपुरुषे प्रतिपद्य भयं सहानुगैर्जलधिः ।
दिव्यं रूपमवाप्तो भव्यं शरणं स राममेवाप्तः ॥ ४० ॥

दिव्योपायनपाणिर्नव्योदितगद्गदस्वरो नम्रः ।
ब्रूहि [1]त्राहीति फणन्नब्धिर्जग्राह रामपदपद्मे ॥ ४१ ॥

प्रणिपातपरास्तरुषो रामस्य दयां दयानिधेः सिन्धुः ।
लब्ध्वा लङ्कामार्गं पृच्छति रामे शशंस तं स्वन्तम् ॥ ४२ ॥

अयि राम महाबाहो मयि विरचय सेतुमुच्चकैरचलैः ।
तत्रासावतिकुशलो नल इति स हि विश्वकर्मणस्तनयः ॥ ४३ ॥

तत्करपरिमृष्टशिलाव्युत्करमुन्मज्जयाम्यहं पयसि ।
तेन पथारिवधाय प्रयता यूयं प्रयात निरपायम् ॥ ४४ ॥

पत्यौ सरितां सेतोरत्यौत्सुक्येन वर्त्म निर्दिशति ।
मदमोघशरशरव्यं वद जलधे नव्यमित्यथावादीत् ॥ ४५ ॥

इति रामविनिर्दिष्टो दुष्टासुरदुष्टदेशमम्भोधिः ।
प्राह तमोमयमेकं नक्तंदिवमात्मपीडनैकपरम् ॥ ४६ ॥

अथ रामशरो मुक्तः स धरातलमाशु कम्पयन्नुक्तम् ।
कृत्वा देशं निरसुरलेशं पत्त्रीव पत्यगात् तूणम् ॥ ४७ ॥

आमन्त्र्य रमानाथं रामं शिरसा प्रणम्य पाथोधिः ।
स जगाम यथागतमथ नेता सेतौ नलं दिदेशालम् ॥ ४८ ॥

नल कुशलोऽसि पितेव त्वं तं तर्तुं[1] ततः सरस्वन्तम् ।
सेतुं विरचय वार्धावरिचयकीर्तिच्छटाच्छिदाहेतुम् ॥ ४९ ॥

हरिनाथ हरे वानरसेनानाथैः समानयाद्य नगान् ।
गुरुभिर्लघुभिरिवैभिस्तनुते तैरेष सेतुमात्तनुते ॥ ५० ॥

यावदुवाच हरीन्द्रं रामः स च यावदाह सैन्येन्द्रान् ।
तावत्तैरानीतैर्वेला जलधेः समाकुलासीत्तैः ॥ ५१ ॥

गुरुभिर्गिरिभिस्तरुभिः स नल संधानलाघवाल्लघुभिः ।
दशयोजनविस्तीर्णं सेतुं शतयोजनोदितं चक्रे ॥ ५२ ॥

अतिशीघ्रमनायासं मतिमान् स बबन्ध सेतुमम्बुनिधौ ।
सुरसदसि यथा सर्वे पितुरतिकुशलं नलं शशंसुरलम् ॥ ५३ ॥

[1] Archaic forms like *trāhi* and *tartum* (in XI. 41) are sometimes noticed in the poem. See the Introduction.

वानरनाथेन समं नरनाथः सेतुबन्धनं वीक्ष्य ।
सुस्थिरमवनिधरेन्द्रवदस्थिरजीवं रिपुं तदा मेने ॥ ५४ ॥

रघुकुलनेतुः सेतुः सिन्धौ स तथा हताशुभः शुशुभे ।
दशमुखमुखदशकमवाक् सुस्राव यथास्रमात्तदुर्दशकम् ॥ ५५ ॥

स्वसुताबाष्पनिषेधप्रसृतावनिबाहुशाखिकेव घना ।
ददृशे सुदृशां तु दृशा दाशरथिजयैकहेतुरथ सेतुः ५६ ॥

यावद् राक्षसनगरीगिलनाय कृतः स कालसर्प इव ।
विधिनावगतावधिना शुशुभे सेतुः शुभंयुताहेतुः ॥ ५७ ॥

लङ्कापतिरथ लङ्कां प्लुष्टाहितवालवह्निविप्लुष्टाम् ।
प्रेक्ष्येषदपत्रपया लक्ष्यं वैलक्ष्यमाप पापमतिः ॥ ५८ ॥

स सभायामशुभायामासीनो मन्त्रिभिः सहाभीष्टैः ।
आहानिलसुतकल्पितहाहाकारः पुरः परं दृष्टः ॥ ५९ ॥

एकः कपिरेत्य पुरं त्रिपुरं पुरभिद्यथाकुलीचक्रे ।
सर्वे बलिनः शूरा दुर्वारपराक्रमा जगज्जयिनः ॥ ६० ॥

अक्षो निहतः संख्ये रक्षोऽध्यक्षेषु सत्सु युष्मासु ।
किं कर्तव्यमिदानीं मन्त्रयत ब्रूत चात्मनस्तन्त्रम् ॥ ६१ ॥

निशिचरनाथेनैवं दिष्टा दुष्टा निशाचरा जगदुः ।
त्रिजगद्विजयिन् राजन्ननवहिता वञ्चिता वयं कपिना ॥ ६२ ॥

स्वामिन् यदि विचिकित्सा नः प्रेषय रामलक्ष्मणौ सबलौ ।
हत्वा पुनरेष्यामः कस्त्वां पुनराहवे सहेत पुमान् ॥ ६३ ॥

वयमेव वधिष्यामो रामं रणमूर्ध्नि सानुजन्मानम् ।
अनुभुङ्क्ष्व यथाकामं सीतामपनीतवल्लभाशंसाम् ॥ ६४ ॥

इति राक्षसवीरैरितवीरालापान् निवारयन् वरधीः ।
स विभीषण आह तदा रविभीषणदीधितिं नतोऽधिगतिम् ॥ ६५ ॥

राजन्नेते राजद्रोग्धारो नैव तत्त्वबोद्धारः ।
रामं परमात्मानं विद्ध्यवतीर्णं जगद्धिताय हरिम् ॥ ६६ ॥

सीता च सती साक्षाल्लक्ष्मीरक्षय्यवैभवप्रभवा ।
दूरीकृतदुष्टासुरदुर्मन्त्रस्तां प्रयच्छ रामाय ॥ ६७ ॥

शरणागतवात्सल्यात् करुणाजलधिः स रामचन्द्रस्त्वाम् ।
एवं चेदनुमनुते नैवं चेन्नैव जीवनं न श्रीः ॥ ६८ ॥

परिभावय चेतसि परमरिभावनमुत्सृजन् महात्मासि ।
सुन्दवधूवधमुखवरवालिवधावध्यदःकृतं कृत्यम् ॥ ६९ ॥

शैशव एव हि शैवं प्रबभञ्ज धनुर्धनुष्मदक्षोभ्यम् ।
विक्रमशुल्कां सीतामक्रमभङ्गं बभार भूमिसुताम् ॥ ७० ॥

दुर्जयदोर्बलभार्गवनिर्जयनिर्वर्णितात्मसारस्य ।
रामस्य रणे पुरतः स्थातुं स्थाणुर्बिभेति किमुतान्ये ॥ ७१ ॥

तमधर्मविदूरतमं शमधर्मपरायणं शतारशरम् ।
रामं रविकुलसोमं न त्वं समरे प्रकल्पसे सोढुम् ॥ ७२ ॥

हरिमिव हरिणा नामी रामं निर्जेतुमाशराः शक्ताः ।
रामं तमनन्तबलं नापीन्द्रजयी न कुम्भकर्णश्च ॥ ७३ ॥

मुञ्च रुषा सह सीतामञ्च विनीतोक्तिभिस्तमेव विभो ।
सिञ्च कृपारसतो नः संचल नाप्तस्य मे सदा वचसः ॥ ७४ ॥

सुचिरोपगूढयाखिलरुचिरोत्कटदिव्यराज्यलक्ष्म्या त्वम् ।
श्लाघ्यो जहिहि क्षिप्रं सीतां सीतापतिः प्रसीदति नः ॥ ७५ ॥

केवलधर्मालम्बनमेव लपन्तं वचः सगर्भ्यं तम् ।
निर्भर्त्स्य निशाचरराडतिपरुषरुषापसारयामास ॥ ७६ ॥

चतुरोऽथ चतुरमात्यैः सह सहजमपास्य पापकर्माणम् ।
रामस्य जगन्नेतुश्चरणं जग्राह सन्नमच्छरणम् ॥ ७७ ॥

राम घनश्याम हरे पाहि जगन्नाथ मामवेहि नतम् ।
शरणागतवत्सल इति करुणाजलधे तव स्थिरं हि यशः ॥ ७८ ॥

त्वद्दारहरस्याहं राक्षसराजस्य सोदरोऽवरजः ।
अभिहितहितवाक् प्रत्युत रुष्टज्येष्ठावमानितः प्राप्तः ॥ ७९ ॥

अभयं देहि महात्मन्नभयं धत्ते पदं भवद्भक्ते ।
सत्यं शरणं प्राप्तं न त्यज मां राम पाहि दासोऽस्मि ॥ ८० ॥

न विजाने श्रीजाने महिमानं तावकं तथा स्तोतुम् ।
तदनन्तशकुन्ताधिपविष्वक्सेनादयो यथाधीनाः ॥ ८१ ॥

अव्याजकृपासिन्धो क्रव्यादकुलीनमप्यसद्बन्धुम् ।
भव्याय नियोजय मां नव्याब्दश्याम राम तद्यशसे ॥ ८२ ॥

नारायणनामावलिपारायणतत्परावनप्रवण ।
दीनपरायण दीनं दाशरथे पाहि मां दयाजलधे ॥ ८३ ॥

एवं ब्रुवते राक्षसराजावरजन्मने तदा रामः ।
करुणामयमूर्तिरहो शरणागतवत्सलो ददावभयम् ॥ ८४ ॥

न हि विश्वसनीयोऽसावहिवत् पिहितेहितोऽहितावरजः ।
सहितः शूरैरेष प्रहितो भ्रात्रेति भाति मेऽतीव ॥ ८५ ॥

इत्यपि कपिकुलनाथे प्रत्यवरुध्य प्रजल्पति श्रीमान् ।
रामो राजीवाक्षः सस्मितमवदत् स वानराध्यक्षम् ॥ ८६ ॥

अनुजस्तनुजो वारेरथवारिः प्रार्थयेत चेदभयम् ।
दास्यामि चिरोपनतं व्रतमेतन्मे कपीन्द्र निस्तन्द्रम् ॥ ८७ ॥

जलधेर्जलमानाय्य श्रीमान् रामस्तदा मुदा हरिभिः ।
शङ्कामपहायैनं लङ्काराज्येऽभिषेचयांचक्रे ॥ ८८ ॥

तदपारकूपारसमथ वीर्यं चौदार्यमुधताश्चर्यम् ।
प्रेक्ष्य स्वामिनि रामे सर्वे सानन्दतामविन्दन्त ॥ ८९ ॥

अविभीषणवृत्तिधरः स विभीषणनामको महानसुरः ।
विरराज महाराजः सुरराजवदीशमाश्रितो रामम् ॥ ९० ॥

राक्षसकपिराजाभ्यां रामः संसेवितः सपक्षाभ्याम् ।
पक्षाभ्यामिव शैलः शिश्राय श्रीमदुत्तमः श्रेयः ॥ ९१ ॥

वालिवधेन विशुद्धः पार्ष्णिः सुहृदप्यलम्भि सुग्रीवः ।
यदयः स्वयमनुकूलो रिपुरप्युपजापझर्झरो जातः ॥ ९२ ॥

इति कृतमतिरथ रामः सुग्रीवविभीषणाहिताधिकदोः ।
आत्मचतुर्भुजभावं सुधियां तु धियावबोधयामास ॥ ९३ ॥

[1]इष्टौ राक्षसभर्तुर्दुष्टावथ शात्रवेक्षणादिष्टौ ।
शुकसारणनामानौ हरिरूपधरौ विचेरतुः सैन्ये ॥ ९४ ॥

दृष्ट्वा मारुतिरथ तौ दुष्टावसुरौ जगाद भानुभुवे ।
तत्तीव्रशासनार्तावथ तौ ययतुस्तु रक्षकं रामम् ॥ ९५ ॥

सैन्यावलोकनाय प्रहितावावां सुरारिणा स्वामिन् ।
इति सत्यवचस्कौ तौ सकलं स बलं प्रचारयामास ॥ ९६ ॥

[2]पुनरपि तावानीय श्रीमान् रामः स्वसंनिधिं वरधीः ।
आरुह्य हनूमन्तं सबलः संतीर्णवानुदन्वन्तम् ॥ ९७ ॥

स सुवेलाचलमस्तकमसुरावधिगत्य मोचयामास ।
तत्रानुजन्मयुक्तो वृत्रारिरिवाखिलैर्बलैस्तस्थौ ॥ ९८ ॥

धर्मैकनिकेतनधीः शर्मैकपरो दिदेश दाशरथिः[3] ।
दैत्याधिपदूत्याय स तारेयमथारिदूत्यधौरेयम् ॥ ९९ ॥

यद्वष्टभ्य बलं मे रावण सीता हृता बलादबला ।
तद्दर्शय रक्षस्त्वद्दोर्दविघनाघने शरौघघने ॥ १०० ॥

[1] The five verses from *iṣṭau rākṣasabhartuḥ*, etc. (XI. 94-98) are read in the MS. A before the verse 58 (*laṅkāpatir atha*, etc.) in the same canto. The reading of these verses here in MS. B appears to be is better.

[2] MS. A reads the first line as
tāv ānīya punaḥ śrīrāmo rājīvalocanaḥ śrīmān.

[3] MS. A reads the verse thus:
dharmaikaniketanadhīḥ śaramaikaparaḥ puraḥ parasyāpi,
nyāyyatayā tāreyaṃ nṛhariḥ prāhāridūtyadhaureyam.

अथ वा प्रथमोदञ्चितमपराधमिमं सहेय तां सीताम् ।
यदि यच्छसि नम्रः सन् नो चेन्नीचाशु मोक्ष्यसे प्राणैः ॥ १०१ ॥

इति वद मदमत्तनिशाचरपरिवृढसंनिधौ दृढं सदसि ।
इति संदिष्टस्तारातनयस्तं दुष्टमभ्यगाद् वेगात् ॥ १०२ ॥

सभ्यैरभिपृष्टः कपिरिभ्यैकमुखः कुतो भवान् क इति ।
उत्तरमाह रघूत्तमदूतं मामङ्गदं तु विद्धीति ॥ १०३ ॥

जड झटिति जगज्जननीं जहिहि च जगतामधीशितुर्जायाम् ।
यदि हृदि विजिजीविषुता भज दाशरथिं परं दयाजलधिम् ॥ १०४ ॥

नो चेन्नीच दुरात्मन् रावण रणमूर्ध्नि मोक्ष्यसे प्राणैः ।
सहते दुःसहतेजा रामो रामापहारिणं न त्वाम् ॥ १०५ ॥

गुप्तं कक्षक्रिमिवत् सप्तसमुद्रेष्वमज्जयद् यस्त्वाम् ।
वाली निस्तुलभुजबलशाली शूराग्रणीरनेन हतः ॥ १०६ ॥

गदया नृपचूडामणिरदयार्द्रहृदुद्धतं निपीड्य त्वाम् ।
बन्दीमनयत यश्चिरमिन्दीवरदृग्भिरम्भसि क्रीडन् ॥ १०७ ॥

जवनं तन्नृपभुजवनमवनीपरिपालनं रुषा यस्य ।
परशावनले प्रहुतं परशावदशां स चामुनानीतः ॥ १०८ ॥

रावण रणधरणौ त्वां तृणमिव जीर्णं दवानलस्तूर्णम् ।
भस्मीकुरुते हृतधीरसीति तदानुतप्यसेऽकृतधीः ॥ १०९ ॥

कृतदुष्कृतफलमनुभवयतमनुभविता यतोऽसुरेन्द्र त्वाम् ।
अमरेशितुरपि समरे भीमात् त्रातुं न शक्ष्यते रामात् ॥ ११० ॥

भण्डनभुवि खण्डितमतिचण्डश्रीरामकाण्डमण्डल्या ।
कङ्का लङ्कापरिवृढ पङ्काशङ्काः स्पृशन्ति नैव त्वाम् ॥ १११ ॥

अत्यासन्नो मृत्युः प्रत्यासन्नो हि कोसलेन्द्रस्ते ।
तद्धितमधरीकुरुषे बुद्धिविहीनौषधं मुमूर्षुरिव ॥ ११२ ॥

जातोऽसि विधेर्वंशे विधिवचनपयोधिपारदृश्वासि ।
आयुर्भाग्ययशोहरपरदाररतिं न हा जहासि कुतः ॥ ११३ ॥

मुञ्चसि मिथिलेन्द्रसुतामञ्चसि रामं च राक्षसेन्द्र न चेत् ।
रणभुवि रामेषुहतः शेषे सकले बलेऽपि निःशेषे ॥ ११४ ॥

असि निशिचर कुशलकृतिर्यत्परदाराभिमर्शिना भवता ।
निजदाराश्लेषोऽपि ध्वंसप्रतियोगितां समारोपि ॥ ११५ ॥

चौर्याद्देवीं हरता क्रौर्याधिष्ठानदोर्बलं व्यक्तम् ।
परमपि शरणं यस्ते स सरस्वांस्तीर्ण एव रामेण ॥ ११६ ॥

किं बलमाश्रित्य भवानम्बरचरवैरिराज जीवति रे ।
यदि विषमामिषबुद्ध्या पीतं पातुं तमीशते के वा ॥ ११७ ॥

इति वालितनूजवचः श्रुतिपुटपटलीप्रतप्तनाराचम् ।
शृण्वन् खण्डयतामुं खड्गैरित्यादिशद् रुषा स भटान् ॥ ११८ ॥

जगृहुश्चत्वारस्तं तारेयमथातिधैर्यधौरेयम ।
बाह्वोरिरिराजयशोराह्वोरसुरेशितुर्भटा विकटाः ॥ ११९ ॥

चतुरश्चतुरस्तानपि निजभुजदण्डावलम्बिनश्चण्डान् ।
चण्डगतिक्रान्तद्यौः कुण्डलिन इवाण्डजन्मराडधुनात् ॥ १२० ॥

अथ पतितेषु स तेषु प्रथमानपराक्रमक्रमोऽधस्तात् ।
सनयस्तारातनयः सहसा निधिमाप राघवं महसाम् ॥ १२१ ॥

कथयामास यथावत् कथितं सुग्रया समानमैन्द्रसुतः ।
रघुपतिरथ तच्छ्रुत्वा ससुहृत् प्रशशंस तं कपीन्द्रसुतम् ॥ १२२ ॥

अथ निशिचरकुलनाथः प्रथमानमहोत्सवं रणे रामम् ।
सौधोत्सङ्गगतोऽम्बुधिरोधोगतमैक्षताक्षतश्रीकः ॥ १२३ ॥

स सुवेलाचलमस्तकमधिरुह्य परं विलोक्य शत्रुपुरम् ।
विमतसितच्छत्रायुतमच्छिनदेकेन पत्त्रिणा रामः ॥ १२४ ॥

अद्भुतकरशरमहिमाविर्भवदुरुभीतिवेपथुः सौधात् ।
अवरुह्य शिरःछेदादिव विललज्जे स राज्यलिङ्गहृतेः ॥ १२५ ॥

प्रतिकर्तुमशक्यतया प्रतिपक्षपराक्रमे परं व्यक्ते ।
रूढरणारूढमतिर्मूढप्रतिपत्तिमूढवानसुरेट् ॥ १२६ ॥

स्फुटतररघुवीरोद्भटकोदण्डकलाप्रचण्डपाण्डित्यम् ।
दृष्ट्वाप्यरयो हरयो मनसा रामस्य मेनिरे विजयम् ॥ १२७ ॥

निस्तीर्णार्णववानरविस्तीर्णानीकिनीविकीर्णधृतिः ।
प्रजुगोप पुरं सम्यक् स जुगुप्सितवृत्तिरिन्द्रवैरीन्द्रः ॥ १२८ ॥

वरणं स भटावरणं सप्रतिहारं प्रतिप्रतीहारम् ।
चतुरं चतुरङ्गबलं चतुरश्चतुरर्णवोपमं चक्रे ॥ १२९ ॥

स सुपर्वरिपुः सकलैरसुवसुसर्वस्वनिस्पृहैरसुरैः ।
महितोऽहितविजिगीषासहितो विदधे हि तानलं सुहितान् ॥ १३० ॥

लङ्कापतिना लङ्कापूर्वद्वाराय मन्त्रिधीपूर्वम् ।
सकलचमूरक्षाचणरणलघुहस्तः प्रहस्त आदिष्टः ॥ १३१ ॥

दक्षिणगोपुररक्षादक्षिणदोःसारदुर्जयौ दनुजौ ।
हृदि निश्चित्योभौ तौ निदिदेश महोदरं महापार्श्वम् ॥ १३२ ॥

दुर्जयवनचरसेनानिर्जयपटुबाहुशालिने बलिने ।
पश्चिमगोपुररक्षां निश्चितवान् राक्षसेन्द्र इन्द्रजिते ॥ १३३ ॥

उत्तरगोपुररक्षामुत्तरवीर्यातिरेकशालितया ।
स्वयमायत्तां चक्रे न यमायत्तां कृतिं विवेद विधेः ॥ १३४ ॥

नानायुधसंनद्धान् नानासवपानबद्धयुच्छृद्धान् ।
रणविजितसुरानसुरानसुराधिपतिः पुरेऽभितश्चक्रे ॥ १३५ ॥

मदमातङ्गघटाभिर्मुखरितहरिदन्तहेमघण्टाभिः ।
वाजिभिरभिमतराजिभिरभिचरतीव स्वयं दशास्यपुरी ॥ १३६ ॥

अधिगतरथरथिनिकरैः पत्तिभिरविपत्तिविद्भिरत्यन्तम् ।
रथ्यासु ररक्ष पुरीं राक्षसराजः स सर्वतोमुखधीः ॥ १३७ ॥

सहचरनिशिचरयोधैः सह स सभायां शुभाय यतमानः ।
कामपि लीलां कुर्वन् राममरिं चिन्तयन् विसस्मार ॥ १३८ ॥

अथ नानाविधमायाकोविददुर्वारवीर्यदैतेयान् ।
पुनरपि पुररक्षायै रक्षायै चादिशद् धरादुहितुः ॥ १३९ ॥

चित्रं तत्र चरित्रं क्षणदाचरनायकस्य तस्यासीत् ।
रामं परमात्मानं ज्ञात्वापि युयुत्सते यतस्तेन ॥ १४० ॥

चित्रं हि विधेश्चरितं यत् प्रेरयति प्रियाप्रियेषु जनान् ।
अविशेषेणाशेषान् निजकृत्या केवलं कृती कृतिनः ॥ १४१ ॥

प्रकृतिः खलु दुर्लङ्घ्या कस्यापि यदीश्वरस्य सेच्छैव ।
तद्वशगाः सर्वेऽत्र हि तस्यैकस्यैव सा वशे वसति ॥ १४२ ॥

स समुन्निनीषति तु यं सुकृतं तेनैव कारयत्यसमम् ।
यमधो निनीषतीशः कारयति स तेन दुष्कृतं सकलम् ॥ १४३ ॥

ज्ञातापि स नैर्ऋतराड् ज्ञानाङ्कुरलेशलेशशून्य इव ।
रामेण सह नियोद्धुं संनद्धः सर्वसंपदो रोद्धुम् ॥ १४४ ॥

[1]इति प्रतिपदोदितप्रधनकौतुकः प्रोद्धत-
प्रतीपनृपदुर्जयप्रबलसेनया पत्तनम् ।
विधाय वरगुप्तिकं समवधाय रामाद् भयं
वधाय समरोन्मुखो दशमुखो बभूवाद्भुतम्[2] ॥ १४५ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये एकादशः सर्गः

[1] Before the last verse in this canto, the following six verses are found in the MS. B:

jantor asvātantrye mantor avabhāti nāvakāśaścet,
svāvidyābharajanitasvātantryāropa eva tanmūlam.
kañcukapañcakavṛta iva pañcabhir abhisamvṛtaḥ pumān (kośaiḥ),
tattattādātmyavaśāt tattatsukhaduḥkhabhāvito bhavitā.
mohavyatireke sati dehatrayabhinnabhāvabhāvanayā,
kasya kṛte kiṃ kurute puruṣaḥ paripūrṇakāmatāsubhagaḥ.
saṃsargāviṣayamanovṛttiviśeṣaḥ sa cet paraṃ viṣayaḥ,
īśaḥ kleśavihīno nandati paripūrṇacidghanānandaḥ.
ahamadhyāse prathamaṃ paramadhyāsāḥ pare bhaviṣyanti,
ahamadhyāsavihīnaḥ katham adhyāsāya-kalpate jantuḥ.
svāvidyābharapīḍitavidyā. . . . . puruṣāḥ,
karmaphalāny aśnantaḥ śarma labhante na saṃsṛtau patitāḥ.

[2] The metre is *pṛthvī*.

द्वादशः सर्गः

अथ रिपुनगरीगोपनमधरितयुगविगमवह्निरह्नाय ।
श्रुत्वा रामः सुहृदं तत्त्वाकलनेन काममाहेदम् ॥ १ ॥

सेनान्ये सेनान्यं प्रतिघटय हरीन्द्र वानरच्छटया ।
नीलं प्रतिभटजालप्रलय प्रलयानलोल्लसल्लीलम् ॥ २ ॥

लङ्कादक्षिणगोपुररक्षी स महोदरो महापार्श्वः ।
प्रतिघटनीयोऽनेन प्रबलेनैन्द्रात्मजन्मना यूना ॥ ३ ॥

लङ्काप्रत्यग्गोपुरगोप्तानाप्ताग्रणीः स शक्रजयी ।
अभियातव्यो नितरामभिया तनयेन तादृशा वायोः ॥ ४ ॥

उत्तरगोपुररक्षां रक्षोराजः स्वयं किलातनुते ।
तत्तस्याभिमुखेऽहं मत्तस्य वसामि सानुजः सुसखे ॥ ५ ॥

अभिभीषयितारीणामभितो गतभीर्विभीषणामात्यैः ।
अभयं विदधानो नः शुभयोगावहितधीश्चरानुचरैः ॥ ६ ॥

इति रघुपतिरतिधीरः कपिकुलनाथं सनाथमुरुसैन्यैः ।
सादरमरिसोदरमपि निदिदेश निदेशवर्तिनं रामः ॥ ७ ॥

अथ संख्यायासंख्यैः स्वबलैरबलापहारिणो नृहरिः ।
पशुमिव सवनीयं संनिरुरोधारेः पुरं निरुच्छ्वासम् ॥ ८ ॥

अथ तत्पुररणभेरीघोररवः शुश्रुवे हरित्करिभिः ।
अलघुरघूद्वहसेनाखिद्यन्मूर्तारिपूःप्रणाद इव ॥ ९ ॥

शरचापधराः शूराः पुरतः पुरतो विनिर्ययुर्वीराः ।
उत्तंसितराजाज्ञाश्चित्तं राज्ञोऽनुरञ्जयांचक्रुः ॥ १० ॥

दिक्करटिश्रुतिपटलीपाटनपटुसिंहनादभूयिष्ठाः ।
कपिवीरा अपि कामं रणपाण्डित्यादतोषयन् रामम् ॥ ११ ॥

वानरराक्षससैन्ये दुःशमसमराभिचूर्णितान्योन्ये ।
व्यक्तं हि विजानाते नक्तं नाहो न कौतुकात् समिति ॥ १२ ॥

पटुकरटिघटाघीङ्कृतिरुद्भटभटहुङ्कृतिश्च ठङ्कृतिभिः ।
दनुजनुषामथ धनुषां ब्रह्माण्डकटाहमाशु भेत्तीव ॥ १३ ॥

अधरितजलधिनिनादो दाशरथिधनुर्गुणप्रणादोऽपि ।
मुखरितनिखिलजगत्को मखरिपुनाशं प्रशंसतीवोत्कः ॥ १४ ॥

वारं वारं वनचरवीराः श्रीरामतेजसोदाराः ।
निशिचरवारमुदारं समरे तत्राभिदारयामासुः ॥ १५ ॥

किरणैरिव चण्डांशोर्नक्तंचरमण्डलं प्रचण्डमपि ।
तम इव वानरवीरैः क्रमशः शकलीकृतं तदा सकलम् ॥ १६ ॥

रावणिरधिरणमथ बलमणिमानममानमाप्तमात्मीयम् ।
निध्यायान्तर्धायी योधनमरियोधनिर्भरं भेजे ॥ १७ ॥

अन्तर्धानगतः सन्नन्तक इव शात्रवं शरैः कृन्तन् ।
स्वीयाखिलबलजलधेर्दोषाचरराजभूरभूत् प्रतिभूः ॥ १८ ॥

तदवार्यशरासारच्छलझञ्झाजर्जराखिलस्वबलः ।
रामः प्रचुकोप तदा तज्ज्ञात्वा रावणिर्विवेश पुरीम् ॥ १९ ॥

जाम्बवदाद्यैरम्बकविद्धैरवलम्बितोऽवलम्बतया ।
हनुमान् रामाज्ञातः प्राणान् द्रोणाचलाहरः प्रददौ[1] ॥ २० ॥

पुनरपि कपिवीरास्ते गिरितरुहस्ता रणेषु कृतहस्ताः ।
रुरुधुः शात्रवनगरीं सर्वत एवातिगर्वतः सरवम् ॥ २१ ॥

पुनरपि कपिकुलकलकलनिनदसमाकर्णनाद् विदीर्णमनाः ।
रावण एव रणाय स्वयमतिघोरामरारिभिर्निरगात् ॥ २२ ॥

अथ कपिराक्षसबलयोरधिगतनिजनाथचोदनाबलयोः ।
दैवासुरबलयोरिव कदनमभूदस्मृतात्मजाबलयोः ॥ २३ ॥

गजवाजिशताङ्गभटप्रमथनमथनव्ययात्तकीर्तिपटम् ।
प्रधनं प्रत्यर्थियशोमथनं तदभूदभूतपूर्वघनम् ॥ २४ ॥

असिमुसलगदापरशुप्रासमुखानेकसाधनोपेताः ।
शरचापधराः शूरा नैर्ऋतवीरा निजघ्नुररिवीरान् ॥ २५ ॥

गिरितरुपटुपाषाणप्रतिकृतशस्त्रास्त्रवृष्टयो हरयः ।
खरतरनखदंष्ट्राभिः प्रतिपक्षबलान्यपक्षयं निन्युः ॥ २६ ॥

शूरा वनचरवीराः सुतरामरिदुर्निवारदोःसाराः ।
नियमेन निजाभिमुखान् न यमाभिमुखान्न तेनुरुग्रमुखान् ॥ २७ ॥

1 For information on the differences from the *Vālmīki-Rāmāyaṇa* see the Introduction.

रामेण रणे केचित् केचित् सौमित्रिणा हता विमताः ।
कपिराजेन च यूना हनुमन्नलनीलजाम्बवत्प्रमुखैः ॥ २८ ॥

अतिकायमहाकायाकम्पनधूम्राक्षवज्रदंष्ट्रमुखैः ।
जितकतिपयकपिवीरैः कपिवीरजितैरवापि वीररवः ॥ २९ ॥

नरदेवान्तकशुम्भत्कुम्भनिशुम्भप्रहस्तमुख्यानाम् ।
अन्तर्धिमनन्तर्धिः प्रेक्ष्य रणे रावणोऽभिचुक्षोभ ॥ ३० ॥

कृतधीरथ धीरशरैर्हतधीरकपीश्वरः परं धीरः ।
वितथीकृतधीर्धर्मत्रतधीरमवैक्षतानुजं दनुजः ॥ ३१ ॥

स विभीषणमात्मविदामविभीषणमात्मभीषणं मेने ।
स्थाने यद्सावीश्वरकरुणाकलिताखिलासुरैश्वर्यः[1] ॥ ३२ ॥

अरिभावनया तस्मिन् परिभावनया विना विनाशाय ।
शक्तिं कामपि तस्मिंश्चिक्षेप जगत्त्रयीकृतक्षेपः ॥ ३३ ॥

शैवीं शक्तिममोघां सौमित्रिरवेक्ष्य तां तदायान्तीम् ।
रामेण कृताभीतिर्मेने नासौ वृथा वधार्ह इति ॥ ३४ ॥

तिष्ठन्नग्रे तस्याः प्रष्ठः परमार्थदृक् स वीराणाम् ।
विशिखैरथ निशितशिखैर्निजघान घनो यथाम्बुभिर्दृषदम् ॥ ३५ ॥

आशु तदाशुगनिकरैर्निहतापि हतास्यदुर्निवारा सा ।
वक्षः परमवगाढा रक्षःपतिमाप मुत् तदागाढा ॥ ३६ ॥

[1] MS. B reads the second half thus:
sthāne tatsthāne 'sāv ādeśaḥ kalpito yato yena.

मूर्च्छितमथ तं पतितं लक्ष्मणमक्षीणलक्षणं वीक्ष्य ।
रक्षःपतिरपहर्तुं नालं वोढुं न चापि चालयितुम् ॥ ३७ ॥

धीमानथ स हनूमानागत्य घनेन मुष्टिनाहत्य ।
रक्षःपतिमतिवेगादतिवेलार्त्यम्बुधावमज्जयत ॥ ३८ ॥

लक्ष्मणमविलक्ष्माणं तत्क्षणमेवाहतक्षणं गृह्णन् ।
धीमान् समिति हनूमान् श्रीमन्तमुपानिनाय रामं तम् ॥ ३९ ॥

दनुजक्षितिपालक्षतमनुजं मनुजन्मनायको रामः ।
दृष्ट्वा कालानलवत् कोपाज्जज्वाल जातशोकोऽपि[1] ॥ ४० ॥

न विषादात्रसरोऽसावविषादिनि शात्रवे स्थिते पुरतः ।
इति रघुपतिरतिवेगात् प्रतिपक्षमगात् सुहृद्दशावरजः ॥ ४१ ॥

रामः कामधगग्निप्रतिमः प्रतिपक्षशिक्षणौत्सुक्यात् ।
घन इव घनकोदण्डश्चण्डः स ववर्ष काण्डकाण्डानि ॥ ४२ ॥

कल्पान्तानलकीलाकल्पानल्पाशुगान्वितारिबलः ।
रामो रणगुणरणनैर्भीमोऽभीयाय रावणाय रणे ॥ ४३ ॥

वर्षन्तममर्षाच्छरवर्षं तममर्त्यदुःसहं दुष्टम् ।
दृष्ट्वैव दुराधर्षः स जहर्ष हरिर्हरियथा करिणम् ॥ ४४ ॥

[1] For the significance of *kopājjajvāla jātaśoko 'pi*, the following verse from the *Kṛtyārāvaṇa* may be seen:

vivṛddhātmāpy agādho 'pi duranto 'pi mahān api,
bāḍaveneva jaladhiḥ śokaḥ krodhena pīyate.

(Source mentioned in the anonymous *Kalpalatāviveka*; L. D. Series no. 17, Ahmedabad, 1968)

तदवार्यशरासारं स दवानलवद् घनो घनैः स्वशरैः ।
विनिवार्य विलासेन स्वनिदानमभीतिदानमत्याक्षीत् ॥ ४५ ॥

चण्डरघूद्वहवरदोर्दण्डाद्वयहिण्डमानकोदण्डात् ।
गलितैः काण्डैः काण्डं गिलितं समरे जहार धैर्यभरेः ॥ ४६ ॥

अस्त्रं यद् यदभेद्यं शस्त्रं वाधत्त रक्षसामिन्द्रः ।
तत्तत् तत्क्षण एव च कृत्तं कर एव रामतीव्रशरैः ॥ ४७ ॥

रामामोघशिलीमुखकृत्तामरशत्रुशस्तशस्त्रचयः ।
अप्रामाण्यज्ञानास्कन्दित इव निश्चयः परं विफलः ॥ ४८ ॥

मकुटी प्रकटितरत्ना तदनु च दनुजेशितुस्तदा यत्नात् ।
रामशरहृतागाद् गां भीमतदीयप्रतापसंपदिव ॥ ४९ ॥

निर्मथितवर्मकार्मुकसाङ्गशताङ्गः शरैः स शाताङ्गः ।
चुक्षोभ तदा रक्षोराजश्चित्रीयमाणधीराजः ॥ ५० ॥

चित्रगतस्येवारेस्तत्र सपत्नाकृतस्य देवारेः ।
रामाकारणकरुणासीमा समवाप जीवनौषधताम् ॥ ५१ ॥

कुसुमितकिंशुकसदृशं व्यसुमितमरिमाह राघवः सदृशम् ।
रावण रणभुवि विजितैरावण रणकर्कशासि रे श्रान्तः ॥ ५२ ॥

यद्यपि सद्यःशिक्षास्पदमेव भवांस्तथापि धर्मदृशा ।
अद्य त्वां मुञ्चेयं बलिनाथ रणक्षितिं त्वयाञ्चेयम् ॥ ५३ ॥

हरिरिव हन्मि परं त्वां रावण सीतापहारिणं हरिणम् ।
यद् बलमबलाहरणं तद् बलमभिदर्शयाप्य याप्य[1] रणम् ॥ ५४ ॥

[1] *yāpya* seems to be *saṃbuddhi,* in the sense of *he yāpya=he adhama* (*raṇam āpya tad balam abhidarśaya*).

उष्णांशुसखैर्विशिखैर्दोष्णां तव विंशतिं प्रतापोष्णाम् ।
तरसासुरसाधक ते शिरसां शरसात्करोमि राशिमपि ॥ ५५ ॥

रक्षःपरिबृढ भवतो वक्षः शकलीकरोमि शातशरैः ।
त्र्यक्षस्त्रातुं नालं रक्षति कस्त्वामिहाधमाचक्ष्व ॥ ५६ ॥

अरिभवपरिभवनिश्चितविजयव्यतिरेकदूयमानमनाः ।
प्राप पुरीमथ मुक्तः पापः प्रातःशशिश्रिया युक्तः ॥ ५७ ॥

रघुपतिरथ विजितारिर्लक्ष्मणमधिगम्य सत्वरं भूयः ।
विललाप कृपार्द्रीकृतचित्तश्चिन्तावशादिवोन्मत्तः ॥ ५८ ॥

राज्येन रमण्या वा पूज्येन किमस्ति जीवनेन फलम् ।
अस्मिन्नेवं सति मे सहजे सहजे स्वतेजसाप्रतिमे ॥ ५९ ॥

देशे देशे दारा देशे देशे च बान्धवा बहवः[1] ।
पश्यामि न तं देशं यत्र भ्राता सहोदरस्तु सखे ॥ ६० ॥

अहमपि नैव वहेयं महता दुःखेन मद्वपुर्हेयम् ।
प्रविशामि प्रायं मां प्रविहाय हरे प्रयाहि किष्किन्धाम् ॥ ६१ ॥

अनृतं नोदितपूर्वं सुनृशंसं मां तथापि शंसन्तु ।
प्राज्ये पटुपटहरवं राज्ये न त्वां विभीषणाकरवम् ॥ ६२ ॥

[1] This is a restatement of the oft-quoted verse from the *V.R.*:
deśe deśe kalatrāṇi deśe deśe ca bāndhavāḥ,
taṃ tu deśaṃ na paśyāmi yatra bhrātā sahodaraḥ.
(Yuddha., canto 101, v. 15)

See also the Introduction.

वत्सः सौमित्रिः क्वेत्यनुयुक्तः किं ब्रवीमि मातृभ्यः ।
मत्संदेशमपि त्वं मात्रे नय पावने नयैकनिधे ॥ ६३ ॥

उत्सन्नसुचरितश्रीर्मत्सदृशः कोऽपि नास्ति पापीयान् ।
वत्सं यत्प्राणप्रियमुत्सवदूरं स दुर्दशं कलये ॥ ६४ ॥

मुखमद्यापि सुधाकरसखमस्य वलीमुखेन्द्र भाति सखे ।
पश्यत हरयो यूयं दृश्यत एवास्य जीवनाशा मे ॥ ६५ ॥

इति दुस्तरदुःखभरं रघुपतिमाश्वास्य जीवतीत्याहुः ।
द्रोणक्षितिधरशिखरप्राणप्रदवल्लिकावरस्पर्शात् ॥ ६६ ॥

मूर्छैव मृतिर्नासौ न च्छायापैति हृच्छयः प्राणः ।
उज्जीवति नो विशयस्तज्जीवातुप्रयोग आस्थेयः ॥ ६७ ॥

तदनु श्रीमद्रामप्रार्थनया लक्ष्मणावनप्रवणः ।
पवनसुतो जीवातुं स ययौ संजीवनं समानेतुम् ॥ ६८ ॥

वृत्तान्तमिमं प्रणिधिभिराकर्ण्य निशाचरेश्वरः सपदि ।
विघ्नं तत्र विधातुं निघ्नं तं कालनेमिमापालम् ॥ ६९ ॥

अर्धनिशीथं व्यर्थं स्वगृहानुपयातमीषदनुयातम् ।
चित्रीयमाणहृन्नतिपात्रीकृतमस्तकः स आनर्च ॥ ७० ॥

राजन् किमिति निशीथे भ्राजत्तेजःपराजितार्थनिधे ।
लङ्काधीशागमनं किंकारणकं तवेति सोऽवादीत् ॥ ७१ ॥

राजाथ समाचख्यौ समरहतं लक्ष्मणं स्वतः सख्यौ ।
तज्जीवनजीवातुं निर्गतमनिलात्मजं समानेतुम् ॥ ७२ ॥

तद्विघटनमाकल्यं कल्यं न भवन्तमन्तरेणान्यः ।
ईष्टे कर्तुं कार्यं कार्यं तन्मन्त्रियं त्वया त्वरया ॥ ७३ ॥

मुनिरिव मध्येमार्गं हनुमन्तं यान्तमाश्रितं दुर्गम् ।
चिरय वचश्चित्रचर्यैर्मारय वा वीर मारणोपायैः ॥ ७४ ॥

एवं चेत् कृतमेतन्नैवं चेतोव्यथा ममोदेति ।
सोदरनिश्चितन्ये खेदरयाद् भ्रातुरप्यदो मन्ये ॥ ७५ ॥

तत् प्रतिषिध्य निषेधं निर्वह सर्वं हि कार्यमार्य सखे ।
नो चेदद्य निहन्मि त्वामिति स व्याजहार विप्रमितिः ॥ ७६ ॥

मित्रादपि मित्रघ्नाद् वित्रासमवाप्य कालनेमिरथ ।
अवमानमेव पश्यन् पवमानभुवः पुरो भुवं भेजे ॥ ७७ ॥

काकोलकीलितान्तरलोकोत्तरकान्तिकान्तनैकफलम् ।
अविकल्पधियानल्पं वनमेकमकल्पयद् द्युकल्पमलम् ॥ ७८ ॥

विषजलपूर्णकमण्डलुदण्डलसद्वेष आत्तकाषायः ।
ईषन्मीलितचक्षुर्भिक्षुर्भूत्वा स तत्र चित्रकरः ॥ ७९ ॥

पावनिरपि विपिनं तत् पश्यन् हृत्संशयप्रदं प्रविशन् ।
यत्र मृषामुनिरवसत् तत्र तृषा संजगाम कामगतिः ॥ ८० ॥

दृष्ट्वा दूरादेनं दिष्ट्यायातीति दुष्टधीः स यतिः ।
अमनस्क इवातस्थौ समनस्कोऽपि प्रतारणाय कपेः ॥ ८१ ॥

तस्करमस्करिपदयोः स्वच्छं पप्रच्छ स प्रणम्य जलम् ।
मुनिरप्याशीःपूर्वकमाहैनं स्वागतं समीपगतम् ॥ ८२ ॥

मां रामकार्यगौरवमारादारोपितं मयि स्वामिन् ।
त्वरयति तन्मे तृष्णां कर्शय सलिलं प्रदर्शय प्रेम्णा ॥ ८३ ॥

स हनूमन्तं सहसा साहसिकः प्राह तं यियासन्तम् ।
मामकमधुरकमण्डलुसलिलं पिब पिण्डशुद्धिदायि हरे ॥ ८४ ॥

आह हनूमानथ तं नाहमनेनाल्पवारिणा तृप्तिम् ।
कलयामि विमलकमलं कलयामितत्तृष्णिवारि वारि मुने ॥ ८५ ॥

इति वदति हनूमति संप्रतिपन्न इवातिमायिमस्करिराट् ।
प्रत्याह महामकरीवृत्त्या स दुरासदं सरः किमपि ॥ ८६ ॥

योगादवगतयावद्भूगोलस्यास्य मेऽस्ति नावगतम् ।
स्वत एव स सौमित्रिः सुप्तोत्थितवत् समुत्थितः सपदि ॥ ८७ ॥

अथ संतुष्टाः सर्वे प्रथमानमहोत्सवाः पुनः प्रधने ।
रामेण समं समरे हरयो न्यवसन् करोल्लसद्गिरयः ॥ ८८ ॥

तत् त्वमपि जलं पीत्वा तत्त्वं मत्तः प्रमत्तदुरवापम् ।
गृह्णन् कृतकृत्यः सन् गुरुदक्षिणया प्रदक्षिणीकुरु माम् ॥ ८९ ॥

पुष्णास्यखिलानर्थान् निष्णातमदीयमन्त्रसंग्रहतः ।
उष्णाभीशुरिवालं मुष्णासि तमः समस्तमप्यमुतः ॥ ९० ॥

हरिवर पीताम्भस्कः करिवरदपदप्रदायि मन्त्रपदम् ।
लब्ध्वा जन्म कृतार्थं विरचय धर्मार्थकाममोक्षार्थैः ॥ ९१ ॥

तत्सर एवाच्छजलं वत्स हरेरस्य गच्छ दर्शय रे ।
यत् सागरति पयोभिः स्वच्छात्रं कंचनोत्ससर्जेति ॥ ९२ ॥

इत्याख्यातस्तेन प्रत्याख्यातत्वरेण पथि हनुमान् ।
अन्तेवसता तस्य प्रान्ते वसदुच्चकैः सरो गमितः ॥ ९३ ॥

तत्र पिबन् जलममलं दुस्त्यजमकरीगृहीतसंहननः ।
अभवत् खरनखरशिखाविदलितमकरीकरालसंहननः ॥ ९४ ॥

तन्नखनिर्भिन्ना सा सद्यो व्यद्योततामरीभूय ।
शापेन विनिर्मुक्ता [युक्ता च पुनर्निजेन] रूपेण ॥ ९५ ॥

बहुधाथ हनूमन्तं संमान्य बुधाङ्गना विशापतया ।
तुष्टा तुष्टाव मृषारूपं रूपं तथा जगाद मुनेः[1] ॥ ९६ ॥

नैनं पुनरपि याया एनःपरमास्पदं परं यायाः ।
यत्रौषधयः सहसा तत्रेति निगद्य सा गता त्रिदिवम् ॥ ९७ ॥

सोऽपीश्वर इव कोपी हरिरिव करिणं जिघांसुरसुरवरम् ।
पुनरेत्य ममाक्षीणामवदद् गुरुदक्षिणां गृहाणेति ॥ ९८ ॥

प्रजघान महावीरो निजमुष्टितलेन वज्रकल्पेन ।
कपटमुनिं स हनूमान् मनुमुपदिश मानवादनेति वदन् ॥ ९९ ॥

अतिदारुणरण आसीत् तदनु हनूमन्निशीथिनीचरयोः ।
स तु मायावी मायाबहुलं बहु लम्भयांचकार रणम् ॥ १०० ॥

[1] I do not find in the *V.R.* the narrative about the demon (Kālanemi) being sent as a false ascetic, the story of the *makarī-graha* of Hanumān, the final release of the celestial nymph from her curse, the disclosure by her of the truth about the ascetic, and his consequent destruction by Hanumān. I am unable to know from which source the author took these details. See the Introduction.

अतिघातुक इति तेन प्रतिघानुगतेन रामदूतेन ।
निहतः शिश्ये रणभुवि न हतः को वा कृताशुभो महताम्[1] ॥ १०१ ॥

तीर्त्वा मायाजलधिं जलधिमिवैनं मनःसमानरयः ।
गत्वादाय गिरिं परमभिराममधावदञ्जनातनयः[2] ॥ १०२ ॥

हरिशासनतस्तद्गिरिरक्षणनियतास्त्रिकोटिगन्धर्वाः ।
निरुरुधुरेनमनेन प्रबलेन हता हि दीर्घतालेन ॥ १०३ ॥

सगिरिः स हरिः खगतो हरिरिव देदीप्यमानतेजस्कः ।
दक्षिणदिगभिमुखः सन् यावत् प्रायादुपोपसाकेतम् ॥ १०४ ॥

तावद् भरतो निरतो रामघनार्तिप्रदर्शिदुःस्वप्नः ।
उत्थाय निशान्तेऽमुं यान्तं महसा ददर्श दुर्दर्शम् ॥ १०५ ॥

दक्षिणदिगभिमुखत्वादस्य तयोस्तत्र वर्तमानत्वात् ।
एष तयोरपकुरुते नूनमिति स्वे विनिश्चिकाय हृदि ॥ १०६ ॥

अथ कोपेन सचापे तस्मिन्नेतज्जिघांसया भरते ।
उपरम भरतासौ ते सुहृदिति गीः शुश्रुवे दिवस्तेन ॥ १०७ ॥

तेनोपरते भरते धीमति धीमानथो हनूमान् सः ।
त्वरयातिरयाद् भेजे रामं गिरिणा समं गुणारामम् ॥ १०८ ॥

[1] MS. A reads the last quarter as
mahatā śīrṣe 'tha muṣṭinā daityaḥ.

[2] MS. A reads the second line thus:
gatvā droṇakṣitidharam evādāya vyadhāvad abhrapade.

अथ तद्दिव्यौषधिभृद्भूभृद्वल्लीमतल्लिकायोगात् ।
सुप्तोत्थित इव वेगात् सद्यः सौमित्रिरुत्थितस्तत्र ॥ १०९ ॥

मुमुदे रामो मारुतिमाश्लिष्य प्राणदस्त्वमस्येति ।
क्व कारिरिति ब्रुवता जगृहे धनुरुत्थितेन तेन तदा ॥ ११० ॥

रामस्तु निजोत्सङ्गं नीत्वा तं लक्ष्मणं समाश्लिष्य ।
आघ्राय मुदा मूर्ध्नि प्रावर्षद् वार्षिकाब्दवच्चास्रम् ॥ १११ ॥

पुनरपि करधृतगिरयः समराय जितारयः स्वतो हरयः ।
रामं रामानुजमपि भीमं भीमारवैः प्रशंसन्तः ॥ ११२ ॥

रुरुधुः सुररिपुनगरीमुरु धुन्वन्तो बलं निशाटानाम् ।
कर्णज्वरकरवानररवतः स तु रावणो बभूवार्तः ॥ ११३ ॥

[1]अथ शक्रजयी पितरं प्रथमो मायाविनां च शूराणाम् ।
आश्वास्य रणाय स्वयमाश्वापान्तर्धिमात्तशस्त्रर्धिः ॥ ११४ ॥

तादृशि तस्मिन् रणभुवमुपगतवति भीकरास्त्रवर्षघने ।
[2]घननादा इव हंसा वानरसेनाः पलायिता अभवन् ॥ ११५ ॥

आसाद्य रणे रामं ससुहृत्कं सानुजं स शक्रजयी ।
नागास्त्रेण बबन्ध क्षणमात्रमचेतनो यथा न्यवसत् ॥ ११६ ॥

[1] The narrative about Indrajit (consisting of verses 114 to 121) is not found in MS. A.

[2] See the saying: *jaladharasamaye mānasaṃ yānti haṃsāḥ* (*Sāhitya-darpaṇa*, VII) and Mallinātha on *Meghasaṃdeśa* I. 11:

kālāntare mānasasya himaduṣṭatvāt, himasya ca haṃsānāṃ rogahetutvāt, anyatra gatā haṃsāḥ punar varṣāsu mānasam eva gacchantīti prasiddhiḥ.

मन्वानः स्वस्य जयं तावन्मात्रेण राक्षसेन्द्रसुतः ।
निजनगरमवजगाहे स जयारवभृत्यनत्यतिप्रवणः ॥ ११७ ॥

अथ नियतिनियोगात् खगपतिरतिवेगात् समागतस्तत्र ।
नागशरव्यतिकरतः स्वामिनमाराद् विमोचयांचक्रे ॥ ११८ ॥

रविरिव हिमनिर्मुक्तः श्रीमान् रामः प्रतापवान् भूयः ।
प्राचोदयत समग्रं बलमरिनगरीनिरोधनायोग्रम् ॥ ११९ ॥

पुनरपि कपिगोपुच्छास्त्रिभुवनमल्ला अथाच्छभल्लाश्च ।
करपरिधृततरुगिरयः सकलकलं शात्रवं पुरं रुरुधुः ॥ १२० ॥

कपिसेनाकलकलतः पुनरपि कर्णज्वरैककारकतः ।
रक्षोऽधिपतिरभीक्ष्णं चुक्षोभ रघूत्तमस्य माहात्म्यात् ॥ १२१ ॥

उच्छ्रायितनिद्राकं कृच्छ्रात् प्राबोध्य कुम्भकर्णमथ ।
मन्यूद्दीपितमनसं निन्यू राजानमाज्ञया स्वभटाः ॥ १२२ ॥

स व्यवहृतात्मकष्टे भव्यव्याहारतः परं रुष्टे ।
क्रव्यादभूभृति मुदा क्रव्यादरिसिन्धुमुन्ममन्थ मदात् ॥ १२३ ॥

नव्यं भयमातन्वन्नव्यन्तरवत् प्रतापितारिबलः ।
कव्यन्तेवसदीशः कव्यं जठरेऽकरोदरिक्रव्यम् ॥ १२४ ॥

संकुलसमरे तस्मिन् न्यङ्कुलसद्वैरिभिर्विहृत्य विभीः ।
दिव्येषु मिषत्सु रणे भव्येषुहतः शशाम रामेण[1] ॥ १२५ ॥

[1] In the *V.R.*, Lakṣmaṇa and others also had the principal role in killing Kumbhakarṇa. (See *V.R.*, Yuddha., canto 67.) Our author, avoiding many details as he generally does, simply mentions Rāma alone as the vanquisher of Kumbhakarṇa.

जगुरप्सरसः सकला अगुरमितमुदं दिवौकसः सकलाः ।
दिवि दुन्दुभयो नेदुर्भुवि रामे दिव्यपुष्पवृष्टिमदुः ॥ १२६ ॥

अथ वैरिसोदरोदितपृथुधूमलसन्निकुम्भिलाहोमम् ।
रावणिमभिपेदेऽभीः पावनिमधिरुह्य लक्ष्मणोऽतिबलः ॥ १२७ ॥

स विभीषणमरिभीषणमभयाय सहायमर्पितं विभुना ।
प्राप्यापरदुष्प्राप्यां याप्यावृतिमाजगाम समयाप्याम् ॥ १२८ ॥

अथ तद्वचनाभिमुखैः प्रधनैकमुखैर्वलीमुखैः प्रमुखैः ।
निर्वृतिहेतुररातेर्निर्वृतिरासीन्निकुम्भिलाभीला ॥ १२९ ॥

बलिभिः प्रतिहतबलिभिः प्रविचलितसमाधिरिन्द्रजित् कपिभिः ।
अथ रथमास्थाय तथाविधबधवचसावधीरयन्निरयात् ॥ १३० ॥

स बली बलभिद्विजयी विजयायतनं निकेतनं त्यक्त्वा ।
परुषातिरुषा प्रहितः सहितः सहितैरुपाययावहितम् ॥ १३१ ॥

स्वविषयविधिरोधाय व्रजति निषेधो यथान्वयं विधिना ।
अभिमानघनस्तद्वद् रावणिररिणाभियोगमातेने ॥ १३२ ॥

स तु शितशरधाराभिः कपिकुलमपि सकलमादधद् विकलम् ।
लक्ष्मणमपि शुभलक्षणमुदभैत्सीत् तत्सखं पितृव्यमुखम् ॥ १३३ ॥

तस्मिन् घनघननादे वर्षत्यशनीषुवर्षमतिहर्षात् ।
निजबाणैः सौमित्रिर्निजगृह उग्राग्रहादवग्रहवत् ॥ १३४ ॥

स्वच्छेदकान् स परांश्चिच्छेद शिखावमच्छिखैर्विशिखैः ।
मेरुर्गिरिरिव धीरः सौमित्रिर्मित्रवत्सलो वत्सः ॥ १३५ ॥

दशरथदशमुखसुतयोर्दुःशममतिदारुणे रणे भवति ।
प्रचकम्प निलिम्पपतिः[स्त्र]र्लोकैः साकमीश्वरालोकैः ॥ १३६ ॥

अमरेशभयाधायकसमरे तत्रातिमात्रचातुर्यात् ।
रथसारथिवाजिध्वजमथनमरातेश्चकार सौमित्रिः ॥ १३७ ॥

कृतधीरतिधीरमतिर्वितथीकृतशत्रुनिर्जयानुमितिः ।
अधिरणमधिकृतसाधनमधिरुह्य रथं तदा स संददृशे ॥ १३८ ॥

शस्त्रैरथ दिव्यास्त्रैरिद्धं यद् वीरचित्रकृद् युद्धम् ।
तेनतुरतिवीरौ तौ तेन तुला केन कुत्र वादर्शि ॥ १३९ ॥

प्रतिकृतमेव कृतं यद् द्विषता सौमित्रिणा तदुन्मिषता ।
[उभयोर]तिवीरतया समरं समरंहसोरभूत् समरम् ॥ १४० ॥

शेषतया विष्कर्तुं स्वमशेषस्यापि तेजसान्येन ।
सौमित्रिरमित्रघ्नः समधत्तैन्द्रं तदस्त्रमस्त्रज्ञः ॥ १४१ ॥

रामो यदि धर्मात्मा दाशरथिः सत्यवाक् त्विषाप्रतिमः ।
शर जहि रावणिमेनं संश्रुत्यैवं समुत्ससर्ज बलात् ॥ १४२ ॥

अथ तल्लक्ष्मणमुक्तप्रोल्ललदस्त्रक्षतेन्द्रशत्रुशिरः ।
तालादिव पक्वफलं काले कायादवाप भूमितलम् १४३ ॥

दुद्रुवुरथ तदनुचरा वनचरनिहतावशिष्टरात्रिचराः ।
रुरुदुर्दैत्यसुदत्यः शुचमेत्य परामुरो निषूदत्यः ॥ १४४ ॥

यावत्यार्तिर्दैत्याधिपपुरि तु बभावभूतपूर्वभवा ।
तावत्यमरेन्द्रपुरे संप्रीतिः संबभूव दुर्वारा ॥ १४५ ॥

तनुभूनिधनप्रभवामनुभूय शुचं परां सुरारिपतिः ।
अवधाय हरिं रामं स्ववधाय धियं क्रुधा मृधे विदधे ॥ १४६ ॥

अथ शुक्रोक्तक्रमतः संहूयाग्निं पराहतः कपिभिः ।
सह दुष्टैरवशिष्टैः सहसाभिजगाम राममरारिः ॥ १४७ ॥

मानवदानववरयोर्यदभवदन्योन्यहानिसादरयोः ।
अद्भुतमभवद् युद्धं तद् दिवि भुवि वा न भावि भूतं वा ॥ १४८ ॥

तर्षपदीकृतविजयोत्कर्षे दिव्यास्त्रवर्षदुर्धर्षे ।
युद्धे तु तत्र रतयोः सप्ताहानि व्यतीयुरविरतयोः ॥ १४९ ॥

दशकं दशमुखशिरसां दशवारमुदारमच्छिनद् रामः ।
रामं सोऽपि शरौघैः कामं निरचेष्टयत् प्ररूढशिराः ॥ १५० ॥

अन्वादिशदनुपायं मन्वानाय द्विषद्धरापायम् ।
रामाय रवेर्हृदयं धीमानरिहारि कुम्भभूः सदयम् ॥ १५१ ॥

[1]त्रिस्तज्जप्त्वाऽत्रस्तः स हितं रथमास्थितो हरिप्रहितम् ।
निरतो युधि विधिशरतो रिपुमाशु जघान तं परः स पुमान् ॥ १५२ ॥

स रामशरदारितायतशिलाघनोरःस्थलः
करात्रगलितोग्रसायकशरासनो रावणः ।
पपात रणभूतले व्यसुरमुष्य तेजः परं
नृपालकुलशेखरे रघुपतावभूदद्भुतम् ॥ १५३ ॥

[1] The *avagraha* mark indicating *akārapraśleṣa* in the expression *atrastaḥ* is clearly given here in the MSS. (though this is a case of *savarṇadīrghasaṃdhi*). This seems to have been adopted just for clarity. I have noticed it earlier also in these MSS. in similar cases. See also note on XV. 42.

दिवानिशमवारितं यदभवद् भयं रामत-
स्ततोऽस्य हि निरन्तरं परमतीव रेमेऽन्तरम् ।
विधूत[निखिलै]नसो विदितशुद्धसत्तेजसो
महामहिमदास्यतः किमिदमद्भुतं स्यात्[1] स्वतः ॥ १५४ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये द्वादशः सर्गः

[1] The metre of the last two verses is *pṛthvī*. Verse 154 is found only in MS. B.

त्रयोदशः सर्गः

अथ दाशरथिर्दुर्जयबुधरिपुविजयाज्जयश्रिया युक्तः ।
करनिकरक्षततिमिरप्रातःप्रद्योतनप्रभः प्रबभौ ॥ १ ॥

त्रिभुवनवनदावमरिं प्रभुरुरुशरधारयावधीर्य रयात् ।
रामश्श्यामलमेघः प्रमदाम्बुदवद् बभूव सश्लाघः ॥ २ ॥

नेदुर्दिवि दुन्दुभयो ननृतुर्दिव्याप्सरस्त्रियो विभियः ।
अमरास्तुष्टुवुरनघाः समराजिरमेत्य राममिन्द्रमुखाः ॥ ३ ॥

निपपात यथा सुमनःसुमनोवृष्टिर्मनोरमा रामात् ।
निपपात तथा सुमनःसुमनोवृष्टिर्मनोरमा रामे ॥ ४ ॥

सुरपतिवरदानादधिरणधरणि सुधाभिवर्षणात् कपयः ।
व्यसवः सर्वेऽपि स्फुरदसवः सुप्तोत्थिता इवोदीयुः ॥ ५ ॥

बन्धूनिव तानापद्वन्धून् प्रेक्ष्य प्रमुक्तशुक्सिन्धून् ।
रामः कामं मुमुदे सर्वं प्रियमात्मनो हि कामाय ॥ ६ ॥

[1]नन्दिनमारूढः सन् वन्दिप्रस्तूयमानवरमहिमा ।
नगराजसुतासहितः खगराजतुरङ्गमाप तं रामम् ॥ ७ ॥

[1] Verses 7 to 14 are found only in MS. B. The arrival of Śiva, however, in this context is not found in the *V.R.* See the Introduction.

बहुधा प्रस्तुत्य शिवस्त्रिभुवनजनकण्टकासुरेन्द्रहतेः ।
रामं रविकुलसोमं निजधाम जगाम पार्वतीसहितः ॥ ८ ॥

विधिरथ विविधस्तुतिभिर्मुखरितदशदिङ्मुखः समेत्य तदा ।
श्रितदयया शारदया सह सहसा सत्यमाप सामात्य[म्] ॥ ९ ॥

प्रथमः सप्तर्षीणामथ निजनाम्नीव सार्थतां [विमृशन्] ।
वैवर्ण्येऽपि विजानन् रामे हरितां शशंस तद्गुणतः ॥ १० ॥

मुनयः सर्वेऽपि परे जनकण्टकदैत्यखण्डनाद् रामम् ।
तुष्टुवुरतिसंतुष्टा विष्टपरक्षा हि दुष्टजनशिक्षा ॥ ११ ॥

[भुवनत्रयेऽपि वराः] किंनरकिंपुरुषसिद्धगन्धर्वाः ।
नगनागोरगयक्षाः सर्वेऽपि ननन्दु[रन्तरतिमात्रम्] ॥ १२ ॥

त्रिभुवनवनदावानां प्रभुमतिवीर्येण पूर्वदेवानाम् ।
समिति विजिग्ये रामो विमलयशःसान्द्रसौरभारामः ॥ १३ ॥

आस्तम्बब्रह्मान्तं शस्तं श्रीरामविजयमाकर्ण्य ।
आनन्दैकनिकेतनमभवद् भुवनत्रयं यथेन्द्रपदम् ॥ १४ ॥

अथ रघुनाथहतं पतिमधिगत्य रणक्षितौ सती पतितम् ।
चक्रन्द रक्षितासुरचक्रं दनुजेन्द्रमिन्द्रजिज्जननी ॥ १५ ॥

नाथं रघुनाथहतं दृष्ट्वा मन्दोदरीममन्दशुचम् ।
अवरोधवधूजनता जनितार्तिरभूदभूतपूर्वशुचा ॥ १६ ॥

उद्दामभोगभासुरतद्दारोदाररोदनारावः ।
प्रबभाराखिलभुवनश्रेणीशुभलेखभारमपभारम् ॥ १७ ॥

सादरमवदद् रामः सोदरनिधनेन खिन्नखिन्नहृदम् ।
उत्तिष्ठ विभीषण सद्विविक शुक् तस्य मुक्तये न तु यः ॥ १८ ॥

प्रारब्धसमारब्धैः सद्भिरसद्भिः फलैरलं विद्वान् ।
हृष्यति न विषीदति वा सर्वनियन्तारमीश्वरं कलयन् ॥ १९ ॥

तत् त्वं तत्त्वविदसि भोस्तद्दारोदारशोकमपशोकः ।
हर हर निलयं प्रापय विप्रवरं तं च संस्कुरु क्षिप्रम् ॥ २० ॥

वैरं वैरिवधावधि निर्वृत्तं नः प्रयोजनं सुसखे ।
न्याय्यतया यद् यद्वत् कर्तव्यं तस्य तत्तदाशु कुरु[1] ॥ २१ ॥

इति रघुपतिवाङ्नुन्नः खिन्नः स विभीषणः प्रसन्नगिरा ।
प्रापय्य निकाय्यं ता विधिवद् भ्रातुश्चकार संस्कारम् ॥ २२ ॥

शुद्धेन तेन निजपुरि बुद्धेन प्रार्थितः प्रवेशाय ।
रामः स्त्रीजनकामः कामं नैच्छद् वियज्जलाच्छमनाः ॥ २३ ॥

मानय वाचं मम तामानय सीतां सतीं परं सुमताम् ।
अकलङ्कधिया सकलं लङ्काराज्यं प्रशाधि निःशङ्कम् ॥ २४ ॥

इति रघुपतिनादिष्टः प्रतिवचनमपास्य सत्यवादीष्टः ।
सीतां प्रीतां नत्वा रामस्त्वां द्रष्टुमिच्छतीत्यफणत्[2] ॥ २५ ॥

मातर्मन्दोष्णाम्बुभिरभ्यङ्गस्नानमारचय्याङ्गम् ।
सर्वाभिरलंकृतिभिः सत्कृत्य स दर्शनीय ईशस्ते ॥ २६ ॥

[1] The verse *vairaṃ vairivadhāvadhi*, etc. is not found in MS. A.

[2] In the *V.R.*, it was Hanumān who was requested by Rāma to convey the message to Sītā. (See *V.R.*, Yuddha., canto 112, v. 21.) See the Introduction.

इति निगदत्यसुरेन्द्रे क्षितितनया प्रश्रितं तमाचख्यौ ।
न तथा वितथालंकृतिमिच्छामि यथा यतेत तां तुच्छा ॥ २७ ॥

नाथं रघुकुलनाथं द्रष्टुमिहेच्छेयमेवमेवेत्थम् ।
शीलं जगति सतीनां नालंकरणं भवत्यलंकरणम् ॥ २८ ॥

चरितं परमाचरितं न नितान्तमलंकरोति किं वनिताम् ।
तत् तद्गुणगणशेवधिमवधिं विपदां विलोकयेऽद्यैव ॥ २९ ॥

सदृशं सुदृशां सदृशं मञ्जु गृणन्तीं स तां सतीं सीताम् ।
समनीनयदवनीशं चतुरश्चतुरन्तयानमारोप्य ॥ ३० ॥

दृष्ट्वा दूरादिव तद् दृष्ट्वा स हि बहुलसौविदल्लचयम् ।
रामो निदिदेश तदा सा मां समुपैतु पादचारेण ॥ ३१ ॥

मातरमिव तां सीतामुत्कण्ठन्ते निरीक्षितुं चैते ।
तस्मादवगुण्ठनमपि हित्वागन्तव्यमस्मदादेशात् ॥ ३२ ॥

यावदधीशितुराज्ञा तावद् विज्ञावरस्य तद्यानात् ।
अश्रावितदयिताज्ञा विश्रावितधर्मपद्धतिः सासीत् ॥ ३३ ॥

पद्भ्यां कृतसंपद्भ्यां सीता सालंचकार तं देशम् ।
गौरवमेव स्त्रीणां रौरवगतिरोधि भर्तरीशितरि ॥ ३४ ॥

तामाह ततो रामः प्रेमावृतमानसो गुणारामः ।
सति परवसतिगताया अतिशुद्धिं ते न जानते हि जनाः ॥ ३५ ॥

मामकमवगमनं यत् तावकयतवृत्तिगोचरं सीते ।
सामान्यमस्य सुतरामपवादोऽन्यापवाद एव न किम् ॥ ३६ ॥

तत् त्वामविदिततत्त्वां न प्रतिगृह्णामि संप्रति क्षितिजे ।
अथ वा प्रतिपद्यस्व स्वैरविहारं न मे मनोवैरम् ॥ ३७ ॥

अर्धशरीरस्य हृतौ व्यर्थविजीवी न पौरुषोऽयमिति ।
लोकापवादभीत्या लोकापकृद्दाहतो मयाभीत्या ॥ ३८ ॥

पत्याविंत्थं वदति स्वत्यागविरुद्धवाचमौद्धत्यात् ।
सत्या नोदश्रु यशोवत्या वदनं तु केवलं तत्र ॥ ३९ ॥

ब्रुवते यं बुधसुरतरुमेवं ब्रूते स एव किं ब्रूयाम् ।
लक्ष्मण लक्ष्मविहीनं वर्ष्म त्यक्ष्यामि वह्निमाघट्य ॥ ४० ॥

श्रुत्वा सीतावचनं भ्रातुर्मुखमैक्षत क्षताराते: ।
रामानुमतिं ज्ञात्वा सौमित्रिरकल्पयत् तदा वह्निम् ॥ ४१ ॥

रामादन्यमहं यदि कामाद्धृदि चिन्तयामि समसाक्षिन् ।
सहसा न सहस्वागो दह मां दहनेति साह साहसिका ॥ ४२ ॥

इत्युक्त्वायोनिजया पत्युः कृत्वा प्रदक्षिणप्रणतीः ।
वह्नावह्नाय वपुः प्रावेशि स्वप्रियोक्तविप्रियया ॥ ४३ ॥

ज्वलति ज्वलने पतितां सीतां समवेक्ष्य वृत्ततोऽपतिताम् ।
हाहाकारमकुर्वन् दिविजा दनुजाश्च वानराश्च नराः ॥ ४४ ॥

[1]इष्टां तामप्लुष्टां दृष्ट्वा दुष्टा न हीति संवुष्टाम् ।
साध्वीति समादिष्टामखिलेनास्वादि तत्र चित्ररसः ॥ ४५ ॥

[1] Before the verse *iṣṭāṃ tām apluṣṭām*, etc. the following defective verse is found only in MS. B:

vaideīhdehasamprajjvaladagnipraveśanāt tatra,
hemna ivātiviśuddhā chāyā jajñe jaganmanojñatamā.

अङ्केनादाय सतीं सीतां वह्निः स दिव्यरूपधरः ।
विज्ञाप्यातिविशुद्धामुपधामित्र रामपाणिसाच्चक्रे ॥ ४६ ॥

सीताचित्रचरित्रप्रीताः सर्वेऽपि तत्र चित्ररसे ।
जलधौ चेतसि चिरयति निमिशभावाद् बभुर्यथानिमिषाः ॥ ४७ ॥

अथ दशरथ आयातो देवत्वाद् दिव्ययानमारूढः ।
सीतालक्ष्मणसहितं स हि तं रामं समीक्ष्य संमुमुदे ॥ ४८ ॥

तातं दैवततातं सीतासौमित्रियुग् जगन्नेता ।
इन्द्रः श्रीमान् रामश्चन्द्रश्चित्रं चरन् ददर्श चिरम् ॥ ४९ ॥

समवन्दत तच्चरणे समविन्दत तत्तदाशिषस्ततः ।
महितः सीतालक्ष्मणसहितः स दत्रावमन्दमानन्दम् ॥ ५० ॥

आलिङ्ग्य स तां सीतां रामं रामानुजं च राजर्षिः ।
आघ्राय शिरांसि नरव्याघ्राय पफाण राघवाय वचः ॥ ५१ ॥

रामारिविराम परं धीमानपि मुह्यसीदमाश्चर्यम् ।
जनयति नः सर्वेषामनयोऽनलमेव यत् सतीमनयः ॥ ५२ ॥

नैनामवमन्यस्व स्वोनां तदुमारमासमानगुणाम् ।
इत्याख्यायाग्निस्फुटसत्त्वां सीतामनीनयत् स्वाङ्कम् ॥ ५३ ॥

अवधानपरे रामे रामेऽनवधानपरेऽपि परम् ।
मानिनि मा कुरु कोपं मानिनि मां वीक्ष्य रक्षितर्यधिपे ॥ ५४ ॥

कल्याणि नवीनाद्भुतकल्याणिमकल्पनीयकारुण्ये ।
नन्वभवः कष्टं परमन्वभवः श्रीसतीशिरोरत्नम् ॥ ५५ ॥

निरवधिकप्रेमरसस्फुरदतिमधुराक्षरं प्रफण्येत्थम् ।
सीतां स्वयमुपनिन्ये प्रीतामभिरामरामवामाङ्कम् ॥ ५६ ॥

पट्टाभिषेकसमये द्रष्टारं मां पुनर्युवां वित्तम् ।
नष्टाखिलदुरदृष्टाविष्टानि समं सहोदरैर्व्रजतम् ॥ ५७ ॥

इत्याश्वास्य मुहुस्तानत्यानतमस्तकान् महाप्रेम्णा ।
दिविजेश्वर इव राजा दिवमेव जगाम दैवतैः साकम् ॥ ५८ ॥

रमयाथ मनोरमया सहितः स हतासुरो हरिः स यथा ।
नृहरिर्विक्रमनृहरिः सदृशा विरराज सत्सुहृत्सुदृशा ॥ ५९ ॥

इन्दीवरनयना या बन्दीमबला बलादनायिषत ।
पापेन दुरन्तातनुतापेन पुरा सुरद्रुहाधिपुरम् ॥ ६० ॥

रामेण जगद्विमतविरामेण विमोचितास्त्रियस्तास्ताम् ।
रामं जगदभिरामं कामं निध्याय मेनिरे स्वन्ताम् ॥ ६१ ॥

पुष्पकमथ कौबेरं पुष्पवदयनप्रचारगम्भीरम् ।
स्वच्छायाजितभास्करमिच्छामात्रादथास्य संनिदधे ॥ ६२ ॥

जिगमिषति जगन्नाथे निजनगरमतिप्रतीतसामन्तम् ।
व्यग्राः सुग्रीवाद्याः प्राञ्जलयः प्रार्थयन्त रामं तम् ॥ ६३ ॥

अवतो नः सर्वेषां भवतो राज्याभिषेकमत्यर्थम् ।
राम द्रष्टुं कामः कामं घटय प्रसीद नः कामम् ॥ ६४ ॥

संतोषमुखो रामोऽनन्तोत्सवशालितद्वचःश्रवणात् ।
मन्तोरप्रतिपत्त्या [1]कन्तोर्जनको यथा तथाफाणीत् ॥ ६५ ॥

अस्माकं तु यदिष्टं दिष्टं भवदिष्टमेव तच्चक्रे ।
इदमद्भुतमाधत्ते धत्ते शुभसूचकत्वमुपरिष्टात् ॥ ६६ ॥

इति वदति क्षितिनाथे नाथौ रक्षोवनौकसामवनौ ।
स्थित्वापि त्रिदिवस्थावस्थितसानन्दतामविन्देताम् ॥ ६७ ॥

नयनरसायनमयनं रामं विजयश्रियो मनोरामम् ।
पीतामृतवदहर्षीत् सीता नेतारमाश्रिता सुश्रीः ॥ ६८ ॥

श्रीमान् रामस्तदनु श्रीमत्सीतावतंसितोत्सङ्गः ।
पुष्पकममलिनसुमनःपुष्पकमुदवाप साकमिष्टजनैः ॥ ६९ ॥

निध्यातुमयोध्यापुरमध्यास्य मनुष्यविग्रहान् जग्मुः ।
रामानुचरा वीराः कामगयानं तु कामरूपतया ॥ ७० ॥

रामनिदेशादथ तत् कामगयानं खमुत्पपात तथा ।
मानवनाथशराहतदानवपटली पुनर्बिभेति यथा ॥ ७१ ॥

रामो जगदभिरामो वामाङ्कवतंसितां स तां रामाम् ।
संनिहितसुरोद्यानं संनिहितमुदा शशंस तद् यानम् ॥ ७२ ॥

नन्दनवनमिदमयि हरिचन्दनमन्दारमुख्यतरुवृन्दम् ।
वृन्दारकपदमेषा मन्दाकिन्यन्तिकेऽस्य पश्य सखि ॥ ७३ ॥

[1] *kantu* seems to be used in the sense of Manmatha, which is one of the meanings noted in the *Vaijayantīkośa*. This verse (65) is missing in MS. A.

सखि पश्य दिशः सर्वाः सर्वामररूपभानुभानुमिताः ।
लोकालोकतटाहतिविनिवृत्तपयःपयोधिकावधिकाः ॥ ७४ ॥

मध्येधरणीतलमणुमध्ये मुग्धाक्षि देवि रत्नमयः ।
हरिरिव जगदाधारो गिरिरयमुद्वीक्ष्यते हि हेममयः ॥ ७५ ॥

शरदिन्दुसुन्दरश्रीस्फुरदिन्दुधरस्य मन्दिरं सुभ्रु ।
महितममुं शर्वाण्या विहितविलासं तु विद्धि कैलासम् ॥ ७६ ॥

कल्याणि नमस्कुरु तौ कल्याणकरौ हि दम्पती सुदति ।
विरचितविनतिस्तु ययोरुपचितधर्मार्थकाममोक्षफला ॥ ७७ ॥

इति पतिफणितिश्रवणादप्रतिमप्रेमभक्तिकं सीता ।
प्रणनामानादिभ्यां ताभ्यां प्रणवार्थभास्वरार्धाभ्याम् ॥ ७८ ॥

नृहरे नाथ क एष श्रीमानचलस्तथाविधोऽस्त्युच्चैः ।
इति पृच्छन्त्यै देव्यै तं शैलं शैलराजमाहेशः[1] ॥ ७९ ॥

क्षितिरयि गुरुभिर्गिरिभिर्नित्यं निम्नोन्नतापि भाति समा ।
उरुदलविततिकतरुभिर्मरकतखचितेव दृश्यते दूरात् ॥ ८० ॥

हारैरिव हीरोपलघटितैरच्छस्रवन्तिकापूरैः ।
भामेव भाति भूमिर्वेणीव कलिन्दनन्दिनी चास्याः ॥ ८१ ॥

मुक्ताविद्रुमयुक्ता काञ्चीव रुचिं तनोति काञ्चिरपि ।
लवणोदन्वानेतद्वेलावेलानितम्बबिम्बरुचिम् ॥ ८२ ॥

[1] The reference to *śailarāja* and Kailāsa, is perhaps to be justified on the assumption that the *śailarāja* was noticeable to them, as they were travelling by the Puṣpaka high in the sky.

हेतुस्तव पुनराप्तेः सेतुर्लवणोदमानदण्ड इव ।
एनं पुनरेनोहरमवनीजे पश्य मे मनो हरति ॥ ८३ ॥

एलामालतिकामुखलतिकाततिकातिसौरभा वेला ।
सखि मुदमातनुते सुखलीलावशवर्तिसत्सखीव सखी ॥ ८४ ॥

कलयालसशिशिरानिलनिलयः कल्याणि कामकृन्मलयः ।
स्वकुटीरपटीरकुरुट्कञ्चुकितकरालकञ्चुकिप्रकरः ॥ ८५ ॥

स ह्यविषह्यमरुत्कः सह्यधराभृद् वियोगिपीडोत्कः ।
प्रस्रवणोऽसावत्र प्रस्रवणः पश्य भासुराम्रवणः ॥ ८६ ॥

निष्किञ्चनतादूरा किष्किन्धामुष्य सत्यसन्धस्य ।
यत्र मया बलशाली वृत्रहतनयो हतः परो वाली ॥ ८७ ॥

पम्पासरिदियमप्यनुकम्पारहिता वियोगिनामहिता ।
सहितानां तु सतीभिर्महिता मन्दाकिनी कृतानन्दा ॥ ८८ ॥

शैलस्तु स एवासावैलेयि विदुर्यमृष्यमूकाख्यम् ।
अत्रैवामी हरयस्तव दृष्टा दुष्टनीयमानायाः ॥ ८९ ॥

आश्रमपदमिदमयि तद् विद्धि शबर्या विदीर्णशाम्बर्याः ।
अश्रममखिलार्थिभ्यो यासूत हि कामधेनुवत् कामान् ॥ ९० ॥

सस्मयविस्मयबन्धः सोऽस्मद्विस्मापयत्स्वदोर्बन्धः ।
निहतोऽत्रैव कबन्धः प्रापामरतामशापनिर्बन्धः ॥ ९१ ॥

गोदावरीयमसुमद्वेदा मोदाय दृश्यतां देवि ।
पञ्चवटीयं सीतेऽमुञ्चदसूंस्त्वत्कृते जटायुरिह ॥ ९२ ॥

तत्राश्रुपरीतायां सीतायां तत्र पक्षिणि प्रेम्णा ।
दाशरथिरथावादीद् दशरथभावेन स स्वरापि मया ॥ ९३ ॥

अश्रमहृतवातापेराश्रम एषोऽद्भुतप्रभावस्य ।
अम्भोधिस्मयहर्तुः कुम्भोद्भवितुर्मुनेर्नमस्कुरु तम् ॥ ९४ ॥

तद्भ्रातुरिमं चाश्रममुरुमुनिमहिमानसूथसत्यचयम् ।
विद्धि तपस्तीक्ष्णमनोबुद्धिसुतीक्ष्णस्य तत्परं चर्षेः ॥ ९५ ॥

पश्य महर्षेराश्रममश्रमदं वश्यवाग्विलासस्य ।
तन्वि तदन्तेवसतः परमिदमक्ष्णोर्मुदं दधाति सतः ॥ ९६ ॥

राक्षसबाधाभावान्मोक्षपरानन्दयोनयो मुनयः ।
अक्षतदीक्षाविधयोऽविक्षतवित्तेर्निराधयो निधयः ॥ ९७ ॥

अपकर्तापि परं रिपुरुपकर्तैवान्ततः स संवृत्तः ।
संतोषपदं यत् तन्मन्तोर्निष्कण्टकं जगत् त्रितयम् ॥ ९८ ॥

स चतुर्दशवर्षावधिदिवसे वचसेति लालयन् स्वसतीम् ।
प्राप भरद्वाजाश्रममश्रममवरुह्य पुष्पकाद् रामः ॥ ९९ ॥

भरताय निजागमनं ब्रूहीति प्राहिणोद्धनूमन्तम् ।
स्वसखाय सुखाय सुखासुगुहाय गुहाय च प्रभुः श्रीमान् ॥ १०० ॥

गत्वाथ तमाह हरिर्जित्वा रिपुकोटिमागतो नृहरिः ।
नियतेन्द्रिय ते ज्यायान् भरत भरद्वाजधाम्नि धीज्यायान् ॥ १०१ ॥

इति वदति शुभोदन्तं भरतः संश्लिष्य सप्रसादं तम् ।
कर्णरसायनमदिशो वर्णमयं मे कपीश्वरेत्यवदन् ॥ १०२ ॥

सत्यं ननु ते वचनं नित्यं यच्चापलं कपीनां वः ।
इत्युक्तवते तस्मै प्रत्युत वक्तास्य दास इत्यवदत् ॥ १०३ ॥

किं करवाणि प्राणप्रिय तेन यते प्रतिप्रियं कर्तुम् ।
या कृतिरसदृशफलिका व्याकृतिदूरा हि सा कृतिः पुंसाम् ॥ १०४ ॥

इत्युक्त्वाथ स हर्षाद् भरतः शत्रुघ्नसंयुतोऽभिरतः[1] ।
जगदभिरामं रामं द्रष्टुं निरगान्निरागसा मनसा ॥ १०५ ॥

अथ सर्वेऽपि समेताः प्रथमं पुरवासिनः समं पोतैः ।
पोतमिव भक्तिनिरतं भरतं सरितं तितीर्षवोऽन्वीयुः ॥ १०६ ॥

रामोऽथ भरद्वाजं दृष्ट्वा प्रणतोऽथ सत्कृतस्तेन ।
आतिथ्याय नियुक्तः साकं सकलैर्बलैर्मुनिना ॥ १०७ ॥

चक्रे स तथातिथ्यं मेध्यं श्रीराममूर्तये मुनिराट् ।
नगरं स्वमपि न यामो नैवायोध्यामिति प्रवादोऽभूत् ॥ १०८ ॥

मुनिमहिमोपनतस्वर्भोगभुजस्ते समस्तवीरभटाः ।
रघुपतिसेनानुचरा लघुभोगं मेनिरे मरुत्वन्तम् ॥ १०९ ॥

स्वर्धेनुरसूत कृतस्पर्धेव सुरद्रुमैः समं सर्वैः ।
रामभटा अपि तेऽमी कामं कलयन्ति नोच्चकैरमरान् ॥ ११० ॥

स्मृतसुरभिविभवकल्पितविविधामृतभक्ष्यभोज्यचर्यैः ।
काममपि तृप्तिमवापू रामभटास्तत्र नृत्तगीतिमुखैः ॥ १११ ॥

[1] The MS. B reads the first half thus:

harṣeṇa hanūmatkaram ālambyāthānujanmanā bharataḥ.

नेन्द्रो नैव कुबेरो न यमो न च पाथसां पतिर्वेत्ति ।
यादृशभोगस्तेषां तादृशभोगं कदापि तच्चित्रम् ॥ ११२ ॥

कृतसत्कृतिना कृतिना प्रीतो रामोऽथ मौनिना मुनिना ।
लब्ध्वा परमाश्चर्यं तुष्टाव तमुल्लसत्तपश्चर्यम् ॥ ११३ ॥

आबालवृद्धसंमतमातिथ्यं प्राप्य हृष्टहृद् रामः ।
तदनुज्ञातः पुष्पकमासाद्य पुनः पुरं प्रति प्रायात् ॥ ११४ ॥

आबालकगोपालकमभियान्तीमात्मनः पुरीं रामः ।
हनुमद्दर्शितपदवीमनुजन्मविशेषकामथाद्राक्षीत् ॥ ११५ ॥

सामरसुरराट्सदृशं रामं रमणीयपुष्पकारूढम् ।
दूरादेव दुरापामृतनिधिमिव तं पपुर्दृशा सुदृशः ॥ ११६ ॥

प्रणनाम प्रणयनिधिर्भरतस्तं भक्तिभावनम्रशिराः ।
रामोऽपि वसिष्ठादिभिरावृतमेनं निरीक्ष्य निस्तुल्मुत् ॥ ११७ ॥

कामगयानात् तस्माद् गामवरुह्यातिभक्तितो रामः ।
स वशी सवसिष्ठादीन् प्राणंसीत् प्राणतः प्रिया जननीः ॥ ११८ ॥

सीतालक्ष्मणसहितं प्रीतात्मानं निरीक्ष्य तं रामम् ।
विक्षतशात्रवमक्षतमक्षीणं तेऽभिलेभिरेऽक्षिफलम् ॥ ११९ ॥

तदनूद्वेलमुदम्बुधिमग्नाः सर्वेऽप्यभग्नवरकामाः ।
रामस्वाम्यसकामाः पुष्पकमधिरुह्य ते पुरं प्रापुः ॥ १२० ॥

मङ्गलजयसंघुष्टां रामः सर्वोपचारसुविशिष्टाम् ।
उद्यत्तारां द्यामिव चन्द्रश्चेन्द्रः पुरीमियाय स्वाम् ॥ १२१ ॥

हरिरिव वैकुण्ठपुरीमुत्कण्ठितधीरपौरनीरन्ध्राम् ।
परमनवद्यातोद्यां प्राप पुरं पित्र्यमाससाद सदः ॥ १२२ ॥

रामैकभक्तिभासुरभरतानुमतेन भूसुराः सपदि ।
निश्चिक्युरदुष्टं गुणपूर्तं पट्टाभिषेकसुमुहूर्तम् ॥ १२३ ॥

प्राह प्राञ्जलिरग्रजमग्रजसंसद्गुरुं गुरुं भरतः ।
अग्रे कृत्वा व्यग्रः पाहि समग्रं प्रभो भवद्राज्यम् ॥ १२४ ॥

श्रीमन् राम तवेदं प्राज्यं राज्यं प्रशाधि भृत्यान् नः ।
किं करवाम न वामं ब्रूहि महात्मन्नवेहि धर्मसृतिम् ॥ १२५ ॥

राजाख्या च समर्थं त्वामेवान्वेति नान्यमसमर्थम् ।
गोशिशुरिव गोभारं नाहं वक्ष्यामि भूप भूभारम् ॥ १२६ ॥

वन्ध्यो न हि कल्पतरुर्विन्ध्यो न स्वल्पतेजसे नम्रः ।
नावसि कस्मादस्मान् कथमन्यो नः प्रभोऽविता भविता ॥ १२७ ॥

धर्मं ब्रूत न तूष्णीमाद्ध्वं माध्यस्थ्यमास्थिताः सर्वे ।
ज्यायान् किं नु यवीयानर्हति राज्याय नित्यपूज्याय ॥ १२८ ॥

सर्वसुपर्वश्लाघ्यां सर्वसदस्याहितश्रवःसौख्याम् ।
अन्ववदन्नथ सर्वे मन्वनुमतिमङ्गलां गिरं तस्य ॥ १२९ ॥

रमणीयगुणग्रामो रामो रमणीयमास्थितो वर्त्म ।
अनुजनिमेवंवादिनमनुजग्राहालमग्रजानुमतेः ॥ १३० ॥

संभृतशुभसत्काराः सर्वे ते भ्रातरः पुरोभरतम् ।
सीतायाः प्रतिकर्मप्रीताश्चक्रुः पुरस्त्रियः शर्म ॥ १३१ ॥

रमणीयरत्नपीठे रामं रमणीयुतं समावेश्य ।
इष्टार्थसिद्धितुष्टाश्चक्रुः पट्टाभिषेकमखिलबुधाः ॥ १३२ ॥

आसेतुहिमाचलनृपसंसेव्यश्रीपदे स्वराज्यपदे ।
वासव इव वसुभिस्तैरभिषिक्तः सीतया समं शुशुभे ॥ १३३ ॥

अभिषिक्तमयोध्यायां रामं कामं निरीक्षितुं जनकः ।
दिव्यविमानारूढो दिव्यैः साकं समागतोऽतिमुदा ॥ १३४ ॥

अष्टावपि दिक्पाला विधिविधुविधुभृत्प्रभृत्यमर्त्यवराः ।
अभिषिक्तरामदर्शनलालसयायन्नतीव नालस्या[1] ॥ १३५ ॥

दिव्या ऋषयोऽप्सरसो भव्यावहनृत्तगीतवाद्यपराः ।
तुम्बुरुनारदमुख्या अम्बुजदृशमीडिरे समस्तदृशम् ॥ १३६ ॥

नतिकर्मीकृतशिरसः स्तुतिमुखरितदिङ्मुखाः सुरेन्द्रमुखाः ।
आनन्दमविन्दन्तामन्दं प्रेक्ष्येशमर्थिमन्दारम् ॥ १३७ ॥

अधिकरणघञन्ततया प्रबभौ रामस्य रामनाम तदा ।
कर्तृघञन्तभ्रान्तिं जह्रे नेतुः परार्ध्यपारार्थ्यात् ॥ १३८ ॥

श्रीदेवी सा साक्षाद् रमते सत्यं हि यत्र रूढरसात् ।
का कान्तिरखिलकान्ता नैकान्तिकतामुपैति तत्र परे ॥ १३९ ॥

अभिषेकसमयसंभृतसुभगंकरणप्रभा प्रभोस्तस्य ।
सर्वाङ्गीणा सर्वानानन्दाब्धौ न्यमज्जयन्नूनम् ॥ १४० ॥

[1] Verse 135 (*aṣṭāv api*, etc.) to 143 (*sarveśvarasaṃtoṣe*, etc.) are found only in MS. B.

सुदृशः स्वदृशां हि फलं सुगिरः स्वगिरां च लेभिरे निखिलम् ।
यत्र सकामा लक्ष्मीस्तत्र न कः प्रीतिमत्र वाप्नोति ॥ १४१ ॥

न ननन्द तदा कतमो जननन्दनरामपट्टबन्धनदृक् ।
आनन्दैकनिकेतनमासीत् [सत्यं तदा जगत्त्रितयम्] ॥ १४२ ॥

सर्वेश्वरसंतोषे सर्वेषामिष्यते हि संतोषः ।
बिम्बप्रतिबिम्बतया साधारणमेव तत्र साधर्म्यम् ॥ १४३ ॥

दिव्यैरथ दिव्येशाद् दिव्योपग्राह्यमग्रहीद् रामः ।
तेऽपि प्रणतादस्मात् पित्रा साकं प्रपेदिरे प्रीतिम् ॥ १४४ ॥

कोटिरविद्युतिमहितं कोटीरमथादधार दाशरथिः ।
तस्य शरद्विधुमित्रं छत्रं शत्रुघ्न आददेऽतिमुदा ॥ १४५ ॥

वानरदानवनाथौ वालव्यजने विधुप्रभाधवले ।
धृत्वा तमरञ्जयतां धृत्या जगदीश्वरं वरं जयताम्[1] ॥ १४६ ॥

तस्मिन्नुत्सवसमये सुमनःसुमनोमनोविलासमये ।
नानापत्त्यपहारान्नानावनिपा ववर्षुरुपहारान् ॥ १४७ ॥

नेदुर्दिवि दुन्दुभयो ननृतुर्दिव्याप्सरस्त्रियोऽप्यभयम् ।
जगुरधिकं गन्धर्वा भुवि सुभगा दिव्यपुष्पवृष्टिरभूत् ॥ १४८ ॥

[1] *jayatām* seems to be here the present participle (masculine genitive plural) form of the root *ji* (to win over) which is a *dvikarmaka*. *jagadīśvaram* is the *apradhānakarman* (having the sense of *jagadīśvarāt*). We might construe here: *jagadīśvarāt varaṃ jayatām*= *labhamānānām* (*puṃsām*) *dhṛtyā vālavyajane dhṛtvā taṃ rāmam arañjayatām*.

यावान् हि घनानन्दस्तावांस्त्रिजगत्यभूत् तदानन्दः ।
प्रथितं मादृक् कतमः कथयितुमीष्टे कथं तमज्ञतमः ॥ १४९ ॥

तात्कालिकार्थिसात्कृतघनकनकमणिप्रवालमुक्तानाम् ।
अधरितकनकधराभिर्धीराभिरभावि भूरिधाराभिः ॥ १५० ॥

भूसुरवर्णः समभूद् भासुरवर्णस्तदा सुवर्णनिधिः ।
कर एव तु कैवल्यं कल्यं यद् रामदर्शनं तस्य ॥ १५१ ॥

अभिराममथ स्तुत्वा रामं वामार्धजानिरजनिमुखैः ।
निजधाम निरर्गलया देव्या समवाप सर्वमङ्गलया ॥ १५२ ॥

नानोपायनदानान्नानासरसान्नपानदानाच्च ।
तत्र न कोऽपि न तृप्तो नरवानरदानवर्षिदेवेषु ॥ १५३ ॥

रामश्यामलमेघे वर्षति वरवर्षमाश्रितावनिषु ।
चिन्तानादरजासीच्चिन्तामणिकल्पवृक्षकामदुहाम् ॥ १५४ ॥

स्वार्पितकनकाब्जस्रजमाधाय करे निरीक्षमाणां स्वम् ।
सीतां रामो यस्मै प्रीता प्रदिशेति सोऽब्रवीत् तस्मै ॥ १५५ ॥

प्रेमभुवे पवनभुवे भव्या भव्यस्रजं ददौ दिव्याम् ।
शुशुभे तदनु हनूमानशुभेतरभूः स रत्नसानुरिव ॥ १५६ ॥

श्रीरामपट्टबन्धनदर्शनचरितार्थचक्षुषस्त्रिदशाः ।
प्रस्तुततत्कृतसत्कृतिमुद्भरमन्द्रा ययुः पुनः सेन्द्राः ॥ १५७ ॥

आलिङ्ग्य मुदा रामं मुहुराघ्राय प्रियं पिता मूर्ध्नि ।
सीतां लक्ष्मणभरतौ शत्रुघ्नं चाभिभाष्य भूयोऽगात् ॥ १५८ ॥

अथ नरनाथो वानरनाथं नानोपधाभिरभिपूज्य ।
प्राज्यं वानरराज्यं बन्धुमिव प्रापयद् दयासिन्धुः ॥ १५९ ॥

असुरेन्द्रमसुप्रियतममसुलभवसुदं सदाश्रितात्मपदम् ।
बहु संभाव्य स लङ्कामगमयतावेति काममकलङ्काम् ॥ १६० ॥

ज्ञानप्रामाण्यमिव स्वमर्जग्राह न स्वतः पुरतः ।
समधीतन्यायतयोपग्राह्यतयाग्रहीन्महीट् परतः ॥ १६१ ॥

प्रणमन्तमनन्तगुणं चिन्तितचिन्तामणिर्हनूमन्तम् ।
रामः प्राह महात्मन् न त्वां त्यक्तुं समुत्सहे हनुमन् ॥ १६२ ॥

हनुमत्सीतालक्ष्मणभरतारिघ्नैर्बहिश्चरप्राणैः ।
अधिगतमुद्भिरनाधिभिरधिकां प्रीतिं दधार दाशरथिः ॥ १६३ ॥

शिष्टप्रतिपालयिता दुष्टप्रकरप्रकामलोपयिता ।
निर्मलधर्मविनिर्मितयशसां पदमाससाद सर्वोच्चैः ॥ १६४ ॥

कृतप्रकृतिरञ्जनः प्रकृतिपेशलैः स्वैर्गुणैः
कृतादविकृतं जगद् विरचयन् मुदामास्पदम् ।
श्रियः पतिरिव श्रिया श्रितसुरद्रुमः सीतया
पुरे सह मुदावसच्चिरमकुण्ठवैकुण्ठवत्[1] ॥ १६५ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये त्रयोदशः सर्गः

[1] The metre is *pṛthvī*.

चतुर्दशः सर्गः

श्रीशैलजाथ नाथं श्रीशैश्वर्यं समुन्मनाः श्रोतुम् ।
आह प्रणयप्रणता माहात्म्यं ब्रूहि रामराज्यस्य ॥ १ ॥

देव्यनुयोगादिति तद्देव्यसमप्रेमपूर्णहृत् पुरभित् ।
कथयामास यथावच्छ्रवणसुधां सोऽथ रामराज्यकथाम् ॥ २ ॥

राज्यविधायिनि रामे पूज्यविधानेन नायके भूमेः ।
स्वदृशश्चरितार्थयितुं सुदृशः साकेतगा अगस्त्यमुखाः ॥ ३ ॥

मुनयः प्रतिहारगताः प्रणयघनास्ते रघूत्तमाय मुदा ।
दौवारिकैर्दिदृक्षां चक्रुर्विज्ञापयामवक्रधियः[1] ॥ ४ ॥

रामः श्रुत्वैव मुनीनभिगम्यानीनयन्नतो निलयम् ।
सच्चक्रेऽथ यथाविधि चक्री दिव्यर्षिचक्रमिव कामम् ॥ ५ ॥

धीरा अथ ते मुनयः श्रीरामयशःप्रतापवर्णनया ।
मुदममितां विदधाना दुष्करमाहुर्महेन्द्रजिद्विजयम् ॥ ६ ॥

श्रुत्वा रामस्तद्वाङ्मुद्राह्य मुदम्बुधौ बुधौत्कण्ठ्यम् ।
जिज्ञासुरथावादीदज्ञातरहस्यवत् तदाभिज्ञः ॥ ७ ॥

राक्षसराजं रावणमपहायामुष्य पुत्रमिन्द्रजितम् ।
दुष्करजयकर्मतया कथयन्ति कथं भवन्त उन्मनसः ॥ ८ ॥

1 See Note on II. 92 and the Introduction.

अथ तं प्रज्ञाप्रथितं प्राह मुनीनां स कुम्भभूः प्रतिभूः ।
किमिति स्वामिन् श्रीमन्नस्मान् विस्मापयन् ब्रवीषीदम् ॥ ९ ॥

श्रीमन्नयि राम हरे स्वामिन्नसि दृक् त्वमेक एव परे ।
दृश्यादृश्यगतस्ते कः संशयभेदिवाक्यवक्तास्ते ॥ १० ॥

सूषे भुवनमशेषं शेषे सर्वैकशेष आशेषे ।
कर्ता कारयिता त्वं नैवान्यः कश्चिदस्ति विश्वस्य ॥ ११ ॥

चिद्घन तव घनमहिमा नवघनमहनीयदेह न श्रुतिभिः ।
वक्तुं शक्यः साक्षाद् वक्ता सीतापते कुतो वान्यः ॥ १२ ॥

त्वमसि विधिर्विधुरपि तद्विधुरेखाभृच्च सच्चिदानन्दाः ।
रूपं तव गुणकल्पितमेतद्रूपं हि विश्वहेतुतया ॥ १३ ॥

कालत्रितयाबाध्ये शैलसुतावल्लभादिसंबोध्ये ।
कमलाकामुक भवतो धामनि भक्तिर्न पाति कान् भवतः ॥ १४ ॥

आनन्दघने घनचिति नूनं त्वय्येव तात्त्विकी सत्ता ।
तदधीनतत्कमेतद् विश्वं शश्वद् विभाति सद्धृदये ॥ १५ ॥

लीलाक्लृप्तत्रिजगज्जाला त्रिगुणात्मिकास्ति या प्रकृतिः ।
अपि तस्या आलम्बनमभवो ह्यभवो हरे परं भगवन् ॥ १६ ॥

दुर्दर्शोऽपि विमर्शस्तव तादृङ् नास्वयंप्रकाशस्य ।
अवलोके लोकेऽसौ नालोकमपेक्षते हि चालोकः ॥ १७ ॥

त्वयि नाथ मनोवृत्तिर्जनयति जननाथ नो फलव्याप्तिम् ।
न प्रकृतिर्विकृतिर्वा त्वं हि विवर्तः प्रवर्ततेऽत्र कथम् ॥ १८ ॥

भगवन् विज्ञानघनः खगराड्वाहस्त्वमेव राम हरे ।
अज्ञा वयमग्रे ते विज्ञा इव वक्तुमीश्महे किमहो ॥ १९ ॥

वशवर्तितया तव वयमनुशासनतस्तथापि वक्ष्यामः ।
शृणु गुणगणनीयासत्फणितिं फणिपाकलङ्कपर्यङ्क ॥ २० ॥

निर्माति जगज्जालं नाभिसरस्या य उन्ममज्जालम् ।
[1]कस्तव संस्तुत्यमतिर्निस्तुलधीस्तत्सुतः पुलस्त्य इति ॥ २१ ॥

श्रुतिमुखरितमुखपद्मः स पुलस्त्यः पूर्णकामतावाप्त्यै ।
राजर्षेस्तृणबिन्दोर्मेरावध्याश्रमं तपस्तेपे ॥ २२ ॥

तपसि स्थितवति तस्मिन्नपगतभयममरकन्यकास्तस्य ।
असमानगाननृत्तैः सुसमाधिमधीरदर्शना जह्रुः ॥ २३ ॥

कुपितेन तेन मुनिना शप्तास्ता देवकन्यकाः सपदि ।
यदि मामकदृष्टिपथं गच्छति कन्या दधातु गर्भमिति ॥ २४ ॥

अथ तस्य वचोभीतास्त्रिदिवं ता देवकन्यका याताः ।
अज्ञात्वादेशं तं राज्ञः पुत्री जगाम तं देशम् ॥ २५ ॥

मुनिनामोघवचःश्रीखनिना तेनावलोकिता चकिता ।
निर्भरमथ सा गर्भं दुर्भरमासाद्य सद्य एव सभीः ॥ २६ ॥

अवलोक्य सुतां राजा नवलक्षणलक्षितां विलक्षः सन् ।
ध्यानासादिततत्त्वः संप्रार्थ्य सुतां सते ददौ तस्मै ॥ २७ ॥

[1] *kaḥ* is in the sense of Brahmā.

प्रासूत सुतं साध्वी सानूपमिता पितुस्तथा भर्तुः ।
नाम्ना विश्रवसं तं चक्रे जनकः स वेदविच्छ्रवसम् ॥ २८ ॥

स तु कृतदारोऽथ मुनिप्रवरभरद्वाजकन्यया धन्यः ।
लेभे सुतमनुरूपं वैश्रवणं सर्वसंपदां प्रवणम् ॥ २९ ॥

स तु वैश्रवणः सहसाधूत धनदत्वं दिगीशतां सहसा ।
पुष्पवदयनाकुण्ठं पुष्पकमपि भाविताखिलोत्कण्ठम् ॥ ३० ॥

गुणनिधिरथ स तु पितरं प्रणतिभिराक्रीतचेतसं स्वस्य ।
अकुतोभयमावासं चकितश्चोरेभ्य एव पप्रच्छ ॥ ३१ ॥

स मुहूर्तमथ ध्यात्वा समुवाच वचो विनीतमात्मसुतम् ।
लङ्कापुरमकलङ्कां शङ्कामपहाय पुत्रकाधिवस ॥ ३२ ॥

तत्पुरगासुरविततिः संप्रति भीता हरेर्हि पाताले ।
निर्भय आवासस्ते निर्भरसौख्याय कल्पते स तु ते ॥ ३३ ॥

इत्थं पितुरादेशादिद्धं पुरमाप सर्वसंपद्भिः ।
अधरितदिव्यावासं प्रथममिव श्रीनिवास आवासम् ॥ ३४ ॥

विरराज राजराजः सुरराजविराजमानवैभवतः ।
करिराजरिपुवधोल्लसदरिराजशयाशयानुसंभवतः[1] ॥ ३५ ॥

तस्मिन् वसति कुबेरे विस्मितवृत्तेऽथ रक्षसां नगरे ।
पातालाद् गां सुतया प्राप सुमाली सुरद्विडभिमतया ॥ ३६ ॥

[1] The meaning of this line is not clear to me.

हर्षोत्कर्षाढ्यजने गुह्यकराजं स राक्षसाभिजने ।
सागरपरिखे लङ्कानगरेऽभिनिरीक्ष्य निस्तुलश्रीकम् ॥ ३७ ॥

कृतपुष्पकसंचारं चारं चारं तु चोरवत् तत्र ।
परदुरवापेऽनूपे जलधेश्चुक्षोभ रूक्षदृग् रक्षः ॥ ३८ ॥

स विचिन्त्य चिरं तत्पुरमपहाय विहायसान्यतश्चलितः ।
तनयां तत्कालोचितमुक्तं प्राहेदमुल्लसद्विनयाम् ॥ ३९ ॥

श्रीरिव धवलाक्षि हरिं कन्ये धन्यासि यत् परैर्वरैः ।
नोढा रूढवयस्का वृणु विश्रवसं त्वमद्य सुश्रवसम् ॥ ४० ॥

शृणु मद्वचनं कल्यं कल्याणि कुबेरतुल्यमनमित्रम् ।
श्रितवत्सलतस्तस्मादस्मदभीष्टाय लप्स्यसे पुत्रम् ॥ ४१ ॥

पाशं पितुरादेशं साथ निशम्यैव साधयामीति ।
जनकाय कृतप्रणतिः कनकाचलमाप विश्रवोवसतिम् ॥ ४२ ॥

आश्रममश्रमयोगाद् विश्रवसः प्राप सुश्रवःसेव्यम् ।
सानन्यधिया कन्या मुनिमुपतस्थेऽथ तं समीपस्था ॥ ४३ ॥

स कदाचिदुदारमतिः प्रमदामुदवैक्षताक्षतश्रीकाम् ।
विनिमीलितदृङ्मुनिराड् अनिमिषसंसेव्यपादपद्मस्थाम् ॥ ४४ ॥

कल्याणि कन्यके त्वं कासि किमत्रेति कैकसीमाह[1] ।
साप्याह त्वयि भगवन् विज्ञे विज्ञापयामि किं स्वामिन् ॥ ४५ ॥

[1] Kaikasī is the name of the girl, later the mother of Rāvaṇa.

तात्कालिकधीगोचरतत्कामस्तां तथा नमन्मस्ताम् ।
दारुणसमयागमनाद् दारुणपुत्रो भविष्यसीत्यफणत् ॥ ४६ ॥

साह पुनस्तं नत्वा भगवन् भवतोऽपि तादृशस्तनयः ।
वनितां सोऽप्याह पुनर्विनतां जायेत संमतस्त्वेकः ॥ ४७ ॥

नव्यामृतरुक्कलिकाभव्याकृतिराप दिव्यमुनिकृपया ।
क्रव्यादकन्यका सा दिव्यावलिदुर्जयं ततस्तनयम् ॥ ४८ ॥

रावणनामा स जगद्रावणतोऽन्वर्थनामतां गमितः ।
अधिताथ कुम्भकर्णं मथितनयं प्रथमवद् वधूस्तनयम् ॥ ४९ ॥

कन्या काचन समभूदन्यानधिगम्यघोरपातकभूः ।
शूर्पणखा नामाखिलकार्पण्यकरी सुताथ कालेन ॥ ५० ॥

अविभीषणवृत्तिरलं स विभीषणनामकस्तृतीयसुतः ।
यज्ञेश इवादित्याज्जज्ञे तस्यास्तु संमतः श्रीमान् ॥ ५१ ॥

हरिभक्तचक्रवर्ती दुरितायनदूरधर्मस्मृतिवर्ती ।
गुणगणगणनीययशा नयशाली सत्कथामनःशाली ॥ ५२ ॥

मूर्तो धर्म इवाभूदार्तोपकृदाश्रितैकतानमनाः ।
वसुदोऽर्थिजनस्यालं वसुदोपमया बभौ स भागवतः ॥ ५३ ॥

अधिसूर्यसमार्याश्रममधिकबलेष्वेषु वर्धमानेषु ।
भक्त्याथ राजराजः पितरं द्रष्टुं कदाचिदायातः ॥ ५४ ॥

आरुह्य पुष्पकं तं प्रेक्ष्यायान्तं स्फुरद्यशःकान्तम् ।
पुत्रं परमुदयन्तं प्राह प्रथमं प्रसूरसूयन्तम् ॥ ५५ ॥

पश्यामुमुदारश्रीवश्याखिललोकमुच्चकैर्यशसा ।
तव चेदेतत्तुलना शिवचेतःप्रीणनात् प्रहृष्यामि ॥ ५६ ॥

किमदःसाम्येन मम प्रमदस्तु तवास्तु तं जयेयमहम् ।
आराध्य शिवं मातः स्वाराज्यमपि स्वराज्यमधिकुर्याम् ॥ ५७ ॥

इति मातरमुल्लास्याप्रतिमानतपोनिरूढचेतस्कः ।
दनुजोऽथानुजसहितस्तूर्णं गोकर्णमाप समवहितः ॥ ५८ ॥

तत्र स वृत्रहृदादेश्चित्रकरं कुत्रचिद् वनोद्देशे ।
नियताहारो धीरः शरदयुतमितं चिरं तपश्चक्रे ॥ ५९ ॥

दशशतशरदस्तप्त्वा स्वशिरस्त्वेकैकमग्निसाच्चक्रे ।
अशमं तप आधातुं दशमं च शिरश्छिकर्तिषुः स यदा ॥ ६० ॥

प्रष्ठः परमेष्ठी तं जग्राह करे करालखड्गधरे ।
प्राह प्रीतोऽस्मीति प्रणतं वृणु वत्स वत्सलो दद्याम् ॥ ६१ ॥

इत्थं निगदति देवे बद्धाञ्जलिरेष रावणः प्रवणः ।
प्राह प्रणमन्ननयः साहसिकाग्र्यो जगज्जिगीषुरयम् ॥ ६२ ॥

प्रीतो यदि वरदोऽसि क्रीतस्तपसामुना मदीयेन ।
न हि वानरनरगणना देवादिभ्यः प्रदेह्यवध्यत्वम् ॥ ६३ ॥

इत्थं दैवादिष्टं दिष्टं प्रति तत्र चित्रमनुवदति ।
अस्तु तथेति स वत्सं वत्सलभावात् पितामहः प्राह ॥ ६४ ॥

जगदीश्वरसंकल्पं जगदीश्वर लङ्घयेत कः पुरुषः ।
यत् तस्य वरादाने नरवानरवर्जनं कृतं स्वेन ॥ ६५ ॥

चित्तामोदि विधातुस्तत्तादृगकारि कुम्भकर्णेन ।
यत्तप उत्तपसामपि तत् तपति न कस्य चित्तममराणाम् ॥ ६६ ॥

विश्रान्तसुरप्रार्थितशुभ्राङ्गप्रेरितः स देवारिः ।
एकैकदिनव्यवहितषाण्मासिकनिद्रतावरं वव्रे ॥ ६७ ॥

ब्रह्मा जिह्ममनस्कस्तस्मै स तथाविधं वरं दत्त्वा ।
अविभीषणकामं तं स विभीषणमेयिवान् वरं दित्सुः ॥ ६८ ॥

उत्तिष्ठ वत्स तपसः कृत्तिः शुष्का [हि] ते तपोवसते ।
वृणु वरमद्य हि दद्यां शृणु मद्वच इत्युदाजहाराजः ॥ ६९ ॥

इति वदति सुरश्रेष्ठे शिरसा प्रणतस्तमाह तद्रक्षः ।
धर्म्यामेव धियं मे दिश विशतोऽप्यापदं कृपा यदि ते ॥ ७० ॥

मामकमन्तःकरणं श्रितहरिचरणाम्बुजं जगच्छरणम् ।
भजतु भवाम्भोधेर्निस्तरणं नित्यं तथामृताहरणम् ॥ ७१ ॥

रक्षःकुलतिलके तद्रक्षसि वदतीत्थमद्भुतैकनिधिः ।
आह महाबाहो श्रीगेह चिरं जीव नान्यथेति विधिः ॥ ७२ ॥

विधिवद्विधिरधिगत्य प्रबलेभ्यस्तेभ्य आशरेभ्योऽर्चाम् ।
निजधाम ययावथ ते लब्धवरा मातुरङ्कमासेदुः ॥ ७३ ॥

निस्तुलभुजबलगर्वात् सर्वानवधीर्य वीर्यवन्तौ तौ ।
सर्वसुपर्वसुपीडामक्रमतश्चक्रतुः कृतापीडौ ॥ ७४ ॥

रावणकुम्भश्रवसौ तावभितस्तातभूतविश्रवसौ ।
श्रुत्वैव रसातलतः प्रससार बहिर्महासुरश्रेणिः ॥ ७५ ॥

रावणमासाद्य जितैरावणमसुराः सुरा इव स्वेशम् ।
आहुर्नः सर्वेषां बाहुबलेन त्वमेव राजेति ॥ ७६ ॥

परिपालय नः सर्वान् परिभाव्य सुपर्वणः सुपर्वरथात् ।
अभयं देहि महात्मन्नुभयं तव भूयसे भवेद् यशसे ॥ ७७ ॥

इति तैरनुनीतः सन् पतितैर्वरदानदर्पतोऽल्पमतिः ।
अनुमेने दनुजवचस्तनुजानिव वः प्रपालयेयमिति ॥ ७८ ॥

अथ ते कृतदुर्मन्त्रा रक्षोनाथाय बोधयामासुः ।
कर्तव्याभिजनत्वाल्लङ्कापूरेव राजधानीति ॥ ७९ ॥

भ्राता हि तवेदानीं तातादेशेन वर्तते तत्र ।
भवताद्य तदुच्चाटनमवता नः कार्यमुच्छ्रियो घटनम् ॥ ८० ॥

आर्यं कथमहमधुनानार्यमिवोच्चाटयेयमक्रौर्यम् ।
इति वदति राक्षसेन्द्रे मुकुलितहस्तः प्रहस्त इदमाह ॥ ८१ ॥

सनयोदितकामनयोर्नवयोरिव देव देवदानवयोः ।
बिभिदे तातः किमतो युद्धं वा नाभवत्तयोरिद्धम् ॥ ८२ ॥

स्वाम्येऽपि लसन्मनसा साम्येन न भाव्यमुच्चकैः पुंसा ।
भोग्यं हि महाभाग्यं शूरेण सुरारिचन्द्रसारेण ॥ ८३ ॥

क्षिप्रच्युतसौहार्दो विप्रतिपन्नस्य तस्य तद्वचसा ।
गाढजलाविलहृदयः प्राथमिकपुरं रुरोध रुद्धदयः ॥ ८४ ॥

अक्षोभ्यराजरक्षोविक्षोभ्यपुरः स यक्षराडिभ्यः ।
कनकाचलशिखरवसज्जनकाय जगाद रक्षसां रोधम् ॥ ८५ ॥

जडजनजनितार्तिपुरं झटिति जहीहीति जानकादेशम् ।
शिरसि विधाय विधेयः सविलासमथाययौ स कैलासम् ॥ ८६ ॥

तत्र त्र्यक्षं रक्षःशिक्षादक्षार्तरक्षणाध्यक्षम् ।
अक्षय्यमहिममेदुरमक्षय्यनिधिः सुहृत्तया भेजे ॥ ८७ ॥

तत्सख्यसमात्तासमसौख्यस्तत्सङ्गतुङ्गमाङ्गल्यम् ।
भुवनावलितिलकायितमलकापुरमध्युवास सुखवासम् ॥ ८८ ॥

अथ राजराजचालनराजत्तेजाः स रक्षसां राजा ।
आत्मानमनात्मज्ञैर्लङ्काराज्येऽभिषेचयाञ्चक्रे ॥ ८९ ॥

प्राज्यं लङ्काराज्यं प्राप्य ततः प्राप्तसैन्यसंनाहः ।
स्वर्गं दुष्टैर्दुर्गममरेन्द्रजयाय निर्ययौ समरे ॥ ९० ॥

उपहृतपटुभटपटलैरपहृततद्बलसंपदविपन्नः ।
अव्ययमपि तच्चक्रे सव्ययमात्मीयविक्रमक्रमतः ॥ ९१ ॥

शरचापशरण्यसुरासुरनाथसनाथदेवदानवयोः ।
अधिगतविविधायुधयोः समरं समरंहसोरभूदुभयोः ॥ ९२ ॥

स्यन्दनगजतुरगभटास्कन्दनसानन्दभूतभेताले ।
प्रधने विजयैकधने बुधततिभिरभूत् पराजितारिततिः ॥ ९३ ॥

अथ शितशरधाराभिर्धाराभिरिवाम्बुदो महीं महितः ।
अवकीर्याहितपृतनामतनुत तनुतापदं सुरारिपतिः ॥ ९४ ॥

त्रिदशानतिविध्यन्तं विधिवरदानात् सुरैरवध्यं तम् ।
बलभिन्निजबाहुबलादुग्राहवदुर्ग्रहं स जग्राह ॥ ९५ ॥

मृग इव मृगराजेन क्रान्तः क्रान्तः सुरद्विषामिन्द्रः ।
इन्द्रेण निबद्धः सन्निन्धे ध्वजदण्डमण्डनीभूय ॥ ९६ ॥

पितुरवलेपादागतमयशः परिमार्ष्टुमुन्मनास्तनुजः ।
विचचार चिरं शत्रुं शंकरमाराध्य निर्जयेयमिति ॥ ९७ ॥

शंकरमखिलवशंकरमन्वास्थैकाग्रचेतसा तपसा ।
साक्षात्कृततद्दैवाद् रक्षोराजात्मजो वरं लेभे ॥ ९८ ॥

यदि तेऽनुदिनं दानव निर्विघ्नश्चेन्निकुम्भिलाहोमः ।
सायुधरथहयसूतोपायमदृश्यः समित्यजेय इति ॥ ९९ ॥

तस्मात् सेवासुमुखाद् दैवाद् वरमाप दैवतप्रमुखात् ।
जेतुं सुरकुलकेतुं नाकं प्राप प्रतारितालोकम् ॥ १०० ॥

तेनादृश्येन ततस्त्रिदशास्त्रिदशाधिनायकेन समम् ।
शितशरशकलितवपुषः क्वापि रिपुं नोपलेभिरेऽभिरुषः ॥ १०१ ॥

विमनाः सुमनोविततिर्वितथीकृतदिव्यसाधनप्रततिः ।
असुधावनसंरोधात् स्वसुधापानममंस्त सा प्रबोधात् ॥ १०२ ॥

अथ विबुधपतिः सरथो बहुधा निर्धाव्य दिङ्मुखेषु च खे ।
पूर्णो विधुरिव दर्शं न मृषाशूरं ददर्श दुर्दर्शम् ॥ १०३ ॥

तुच्छरजन्यटपटुतररुक्छरधारावधीरितार्तरवः ।
अच्छयशोजितचन्द्रस्तच्छयवशवर्तितामवापेन्द्रः ॥ १०४ ॥

अथ तेन निबद्धः सन्निन्द्रः संमोचितस्वतातेन ।
वरदेन वृथेन्द्रजितः कृच्छ्रात् संमोचितः स्वतातेन ॥ १०५ ॥

प्रतपोविधिपटुमायात्रतपोतावाप्तसर्वकामस्य ।
तस्येन्द्रजितो विजयः कस्येन्द्रत्वं न दुष्करस्यैति ॥ १०६ ॥

निर्जितबलभेदितया निजतनयस्याथ रक्षसां राजा ।
प्रीतमना इव कार्यं वीतभयः किं चकार नाकार्यम् ॥ १०७ ॥

अथ राजराजसंपदमधरामरराजसंपदमरारिः ।
अप्यपहर्तुमनाः सुरपत्ययनं प्राप शैलराजशिरः ॥ १०८ ॥

अलकापुरममलतपःफलकां प्रेक्ष्यां समेत्य सामात्यः ।
विततारिवलसंपत्तिं प्रततान भ्रातुरात्मसादसुरः ॥ १०९ ॥

अक्रमकृतविक्रमतो भ्रातरमतिकातरं विनिर्जित्य ।
पुष्पकमप्यपजह्ने पुष्पवदतिभास्वरप्रभं प्रसभम् ॥ ११० ॥

स्वयमारुह्य स भव्यं दिव्यं तत् पुष्पकं सहानुचरैः ।
वरदमपि हरं दैवं सपदि विसस्मार रावणो मत्तः ॥ १११ ॥

यत् तत्क्रीडाक्रीडाधारस्य धराधरस्य धीरस्य ।
त्रिजगत्पूज्यस्योपरि निष्कम्पं निष्पपात पुष्पकतः ॥ ११२ ॥

रजतक्षितिभृत उपरि व्रजतस्तत्पुष्पकस्य तीव्रगतिम् ।
निरुरोध परं नन्दीश्वरशासनमेव शङ्करानन्दी ॥ ११३ ॥

निष्पन्नपुष्पकाचलभावभवह्रीः प्रभावयुक्ततया ।
कः स्यादिति कैकस्याः पुत्रो विममर्श रोषतो रोषी ॥ ११४ ॥

तमधस्तादथ हस्तोदितकाञ्चनवेत्रचित्रिताखिलकम् ।
वीक्ष्य वनौकोरूपं पापोऽपजहास सावहेलं सः ॥ ११५ ॥

स प्रेक्ष्य तदौद्धत्यं प्रशशाप तमाशु मादृशैरेव ।
अपहृतबलदर्पः स्या इति स तु नाश्रावि तेन मत्तेन ॥ ११६ ॥

विहरति देवोऽत्रेति व्यवहरति न हि व्रजेति नन्दीशे ।
देवः को वा स इति प्राह तमद्रिं विपाटयेयमिति ॥ ११७ ॥

वाचा व्यवहृत्याभीर्नीचात्मात्मप्रवेष्टृभिः पटुभिः[1] ।
इन्दुधरवसत्यचलं कन्दुकमिव लीलया चकार चलम् ॥ ११८ ॥

अथ चकितजायया स्वयमीशो विज्ञाय रावणाविनयम् ।
निजचरणकनिष्ठार्पणगुरुगिरिणा तत्करान् बबन्ध चिरम् ॥ ११९ ॥

तदनु स दनुजाधीशस्त्ववशीकृतबाहुमण्डलोऽनीशः ।
तुष्टाव हि दुष्टात्मा श्रुतिशिखरचयैश्चिरं शिवाय शिवम् ॥ १२० ॥

स वशी तुष्टात् तस्मात् स्ववशीकृतदोःसदोषदोषाटः ।
वरमपि लेभेऽथ परं मन्त्रमयं तत्र चन्द्रहासमसिम्[2] ॥ १२१ ॥

शाणोल्लीढो मणिरिव पुरहरपूर्णप्रसादतो द्युतिमान् ।
अव्याहतभव्यो हतभव्यावासश्चचार लोकांस्त्रीन् ॥ १२२ ॥

तदनु कदाचिद् दनुजः कुत्रचिदवनौ तपोवनेऽप्रतिमाम् ।
प्रददर्श दुराधर्षव्रतिकां राजन्यकन्यकामपि काम्[3] ॥ १२३ ॥

[1] *praveṣṭa* in the sense of *bhuja* is noted as *akārānta* in the *Amarakośa* and the *Vaijayantī*. Our author is using the word as a *ṛkārāntaśabda*.

[2] Verses 121 to 125 are found only in MS. B.

[3] This *kanyakā* is mentioned as Vedavatī in the *V.R.* (See Uttarakāṇḍa, canto 17). There she is described as having cut her hair with her hand (and not with the *darbha* grass as in V. 128).

नैवोर्वश्या वश्या सा जेतुं जातु मेनकापि न का ।
रम्भापि निरारम्भा विरचितनिरती रतिश्च तद्विजये ॥ १२४ ॥

एकैकतत्प्रतीकप्राप्तश्रीलोकने कृती नेन्द्रः ।
तदशेषपुरुषमोहकवेषविशेषस्तु शेषवाक्छेषः ॥ १२५ ॥

किं चरसि तपस्तीव्रं का त्वं तेनेति कन्यकाभिहिता ।
हरिवरणाय ममैतत्तप इति सा व्याजहार राजसुता ॥ १२६ ॥

तामाह ततः कामाकुलधीर्नहि मत्समः स कोमलधीः ।
नासि न जानासि हि मां शृणु मद्वचनं ततोऽधिकं वृणु माम् ॥१२७॥

इति कथयन्नपि सत्या प्रत्याख्यातस्तया स याहीति ।
प्रचकर्ष तां कबर्यां सा चिच्छेदाथ तां तु दर्भेण ॥ १२८ ॥

अक्षीणतपोविभवात् तत्क्षणक्लृप्तानले विशन्ती सा ।
भाविनि भव एवाहं त्वदभावायेति तं शशाप रुषा ॥ १२९ ॥

अथ मदमत्तो दृप्तः प्रथमानपराक्रमः सुरारातिः ।
अभिमुखपततः पतितः सर्वानविशेषतो जघान घनः[1] ॥ १३० ॥

अनरण्यमहाराजं विनिहत्याजावधर्मयुद्धेन ।
तस्माच्छापमवाप प्राप्नुहि मद्वंश्यतो विनाशमिति ॥ १३१ ॥

अपसृत्य तपोविपिनादुपसृत्य रजस्वलामथाप्सरसम् ।
प्रत्याख्यातोऽपि तया तत्याज न तां नितान्तकामनया ॥ १३२ ॥

[1] This verse is not found in MS. A.

मुनिना येन वृता सा परमनुरक्तापि दूषिता रजसा ।
दूरस्थे सति तस्मिन्ननुबुभुजे रावणो बलादबलाम् ॥ १३३ ॥

साथ स्नानविशुद्धा नाथं मुनिमेव नाथमाना तम् ।
प्राप्तापीतरभुक्ता शप्ता मकरी भवेति तेन चिरम् ॥ १३४ ॥

विज्ञाप्य दैत्यदुर्नयमज्ञानं स्वं दयालुना तेन ।
शापावसानमिति सा प्रापानिलजग्रहात् स्वविग्रहगा ॥ १३५ ॥

क्रुद्धेनाथ मनोभवविद्धेन स तेन रावणः शप्तः ।
अनुभवति बलादबलां यदि भवतु शिरः सहस्रधास्येति ॥ १३६ ॥

विदिततपोधनशापः स दिविजवैरी हृदि स्फुरत्तापः ।
निदिदेश सपदि माघन्नदिविजमनुजं जगद् विधेयमिति ॥ १३७ ॥

ब्राह्मणबृन्दं छिन्दन्नवनीपालान्निजौजसा चलयन् ।
व्यद्रावयदखिलजगत् तद्रावण एक एव भद्रमगात् ॥ १३८ ॥

तत एव भयादेते निर्णिद्रतया सुरा विराजन्ते ।
तेषां क्रतुभुक्छब्दः शिश्राय श्रीश भूतपूर्वगतिम् ॥ १३९ ॥

इन्द्रस्येन्द्रपदं चाशिश्राय श्रीश भाविसंज्ञात्वम् ।
अथ वा जय्योत्कर्षप्रतिपादितया प्रतीततद्विजयम् ॥ १४० ॥

वायोरपि बलजलधेर्यास्ते मुख्या प्रकम्पनाभिख्या ।
अधिकरणसाधनल्युड् बाहुलकात् संबभूव किं बहुना ॥ १४१ ॥

तद्भयचलितधृतिः सन् गच्छन् स सदा सदागतिर्जातः ।
तत्कृतदण्डधरत्वाद् दण्डधरोऽप्येति तादृशीमाख्याम् ॥ १४२ ॥

दैवतमानवदानवदुर्दमबहुबाहुसारसंपन्नः ।
कामवशंवदहृदसौ राम न कान्तां जहार कां कान्ताम् ॥ १४३ ॥

अपि वह्निरमुष्य पुरः [1]पौरोगवभावभासुरः स पुरः ।
मनसाभीप्सितमर्थं घनसारसमं रसायनं कुरुते ॥ १४४ ॥

क्रव्यात्कुलजन्मतया क(?)व्याद्दिव्यारिणामुना युक्तः ।
न क्षीरनीरसंगतिमक्षीणमुदा तनोति न निकामम् ॥ १४५ ॥

स मर्त्यकुलखादनः परममर्त्यविच्छेदनः
करालकरवालतर्जितजगत्त्रयस्त्रीलतः ।
सहाप्तदितिनन्दनैरधिगतासमस्यन्दनै-
र्जिगाय जगतां त्रयं न तु जगाम तापत्रयम्[2] ॥ १४६ ॥

इति [3] श्रीहरिकुलतिलकपद्मनाभशास्त्रिणा विरचिते श्रीहरिचरिते महाकाव्ये
चतुर्दशः सर्गः

[1] *paurogava* means a cook.

[2] The metre is *pṛthvī*.

[3] In MS. B it is clearly given as *śriharikula-tilaka-padmanābha-śāstriṇā*, etc. This shows the significance of the expression *śrīhari* of the name of the author. See the Introduction.

पञ्चदशः सर्गः

वाली भुजबलशाली सुग्रीवश्चाग्रणीः सुसाराणाम् ।
कुत उत्पन्नावेताविति नेता कुम्भजं समायुङ्क्त ॥ १ ॥

ताविन्द्ररविप्रभवौ प्रतिभातस्तत्प्लवङ्गताद्भुतकृत् ।
आभ्यामिभ्यः को वा पुत्री च स्त्री प्रवीरसूः का वा ॥ २ ॥

इति रघुपतिना पृष्टः प्रहसन्नथ कुम्भसंभव. प्राह ।
त्वयि जिज्ञासति नृहरे मम किमकथनीयमस्ति वच्मि हरे ॥ ३ ॥

माणिक्यगिरेस्तुङ्गे मणिमयशृङ्गे महासभास्ति शुभा ।
तस्यां सरसीरुहभूः स्वस्यामधिरूढराजयोगोऽभूत् ॥ ४ ॥

लोकनतः परमात्मालोकनतस्तत्र स प्रहृष्टात्मा ।
आनन्दाश्रु शयाभ्यां पीनं दधदक्षिपत् क्षितौ स्वाभ्याम् ॥ ५ ॥

तज्जलभवभवचक्षुर्मुज्जलसेकादभूत् कपिः कोऽपि ।
ऋक्षरजा इति नाम्ना धाम्ना स्वेनाधरीचकार गिरिम् ॥ ६ ॥

अथ किं करवाणीति प्रणतं पदयोः स तं सुतं प्राह ।
कंचन कालं काञ्चनशृङ्गे वस वत्स मत्समीप इति ॥ ७ ॥

सोऽपि तथा कुर्वाणः क्वापि सरस्यात्मबिम्बमालोक्य ।
प्रतिवनचरमुद्भाव्य प्राविशदम्भः प्रसह्य तं जेतुम् ॥ ८ ॥

तत्रानुपलभ्य जले कमपि प्रतिपक्षमात्मनः स कपिः ।
पुनरपि तीरं प्राप्य स्त्रीरूपमवाप मोहनं महताम् ॥ ९ ॥

आराध्य तदा देवं दूराद् गच्छन्निरीक्ष्य तां वनिताम् ।
कामवशंवदहृदयः स्खलितेन्द्रियतामवाप देवेन्द्रः ॥ १० ॥

इन्द्रियमैन्द्रं तदधो न्यपतत्तद्वालमूल एवालम् ।
तत एवाभूद् वाली दुर्जयजगदेकसारदोःशाली ॥ ११ ॥

रविरपि स तथैवैत्य स्खलितेन्द्रियतामवाप तां वीक्ष्य ।
ग्रीवागततद्वीर्यात् सुग्रीव उदग्रवीर्य आविरभूत् ॥ १२ ॥

तावादाय कुमारौ सा वानररूपिणी तदा रमणी ।
नीत्वाथ निशां प्रातः पुनरपि कपिरूपमाप चित्रकरम् ॥ १३ ॥

चित्रीयमाणहृदयः स्वत एव चरित्रतः स ऋक्षरजाः ।
पुत्रद्वयमथ पित्रे कर्त्रे जगतां व्यजिज्ञपद्धात्रे ॥ १४ ॥

स्रष्टाथ स तत्तनयद्रष्टा संतुष्टमानसः स्पष्टम् ।
आभ्यां हि कुमाराभ्यामधिकां श्रियमाश्रयिष्यसीत्यफणत् ॥ १५ ॥

आहूय देवदूतं प्राह विधिः कंचनात्मसंनिहितम् ।
एनं नय किष्किन्धामनशिवगन्धामनार्तिसंबन्धाम् ॥ १६ ॥

भुवि विश्वकर्मनिर्मितसौधोत्सेधावरोधभूयिष्ठाम् ।
निस्तुलवस्तुविचित्रामलकामिव संपदास्पदं नगरीम् ॥ १७ ॥

त्रिभुवनवनचरराज्यावनमहनीयासने निवेश्यैनम् ।
अभिषेचय राजानं कुरु सुतसहितं ममाज्ञया याहि ॥ १८ ॥

इति वदति विधौ विधिवत् स विधाय विधिं तथा समस्तमपि ।
विधिमधिगतवान् पुनरपि वितथा न हि धातुरप्रतीपाज्ञा ॥ १९ ॥

ऋक्षरजा अप्यरजाः किष्किन्धामेत्य राजधानीं ताम् ।
पूज्यं वनचरराज्यं चिरमुपभुज्याप दिव्यसायुज्यम् ॥ २० ॥

इन्द्रार्पितकनकस्रग् वाल्यथ पित्र्यं शशास तद्राज्यम् ।
दुर्जयदोःसारतया कान्तारचरेश्वरः प्रशान्तारिः ॥ २१ ॥

दोर्मददुर्ललिततया दैत्यवरादित्यराजदारकयोः ।
कथमविरोधावस्थितिरिति वदति रघूत्तमे मुनिः प्राह ॥ २२ ॥

वरभुजशालिनि वालिनि जलनिधितीरे जगज्जयोदारे ।
मीलितदृशि सावित्रीं जपति जडात्मा ददर्श दैत्येन्द्रः ॥ २३ ॥

आहवदुःसाधममुं राहुरिवेन्दुं प्रपीडयिष्यामि ।
इति मत्वा निर्णिनदं मतिमत्त्वादेष तस्य संनिदधे ॥ २४ ॥

दैवादुन्मीलितदृक् तादृशमवलोक्य रावणं हरिराट् ।
जग्राह दशग्रीवं स्वयमेवोदग्रदोर्बलो वाली ॥ २५ ॥

संक्षिप्तावयवं तं कक्षे निक्षिप्य राक्षसावन्तम् ।
सप्तस्वपि जलधिषु निःसुप्तविधिस्तं निमज्जयामास ॥ २६ ॥

संध्यां स समाप्य परं संध्याय स्वानुवर्तनैकपरम् ।
विन्ध्याचलमिव मुनिराट् वन्ध्याखिलशृङ्गकं चकार चिरम् ॥ २७ ॥

विजयश्रीसंधानं निजपुरमधिगत्य सोऽरिमन्थानम् ।
शश्वपजयसंधानं मित्रमिवाप द्विषामसंधानम् ॥ २८ ॥

ऊर्जितवालिभुजाबलनिर्जितदोर्मण्डलोऽथ दैत्येन्द्रः ।
वाचायाचत मैत्रीमुच्चैः प्रतिपत्तिमाश्रितोऽनुच्चैः ॥ २९ ॥

रावणकार्पण्योक्तिश्रावणतः स प्रसेदिवान् वाली ।
विससर्ज दुर्जनं तं न सतामिव नासतां हि सौहार्दम् ॥ ३० ॥

ह्रियमिव स परं विजयश्रियमपि संत्यज्य रज्यदयशःश्रीः ।
तनयेनेन्द्रजिता स्वयमनयेन जिगीषुराप निजधाम ॥ ३१ ॥

जातुचिदनुचरसहितः स्नातुमनाः प्राप नर्मदामहितः ।
प्रमदामिव परमृदितामसुदावहवारिपूरपरिपूर्णाम् ॥ ३२ ॥

प्रेक्ष्य तदीयाणीयोजलझरमसुरेश्वरः स जिज्ञासुः ।
कार्श्यनिदानमवादीत् पार्श्वचरान् स्वस्य पश्यतेत्यादौ ॥ ३३ ॥

विज्ञाय भर्तुराज्ञामज्ञास्ते तीरतो गता दूरम् ।
स्त्रैणेन हि विहरन्तं कमप्यपश्यन् पुमांसमन्तरपाम् ॥ ३४ ॥

उज्जलकामनया तं तज्जलमवरुध्य दोर्भिरर्घैः स्वैः ।
क्रीडन्तमिलावलयापीडं कृतवीर्यनन्दनं स्त्रीभिः ॥ ३५ ॥

दृष्ट्वैव सहस्रभुजं पुरुषं पुनरेत्य पूर्वदेवेन्द्रम् ।
निजबाहुनिवहनिर्जितजलपूरं पूरुषं तमाचख्युः ॥ ३६ ॥

दोर्मददुर्ललिततया निर्मर्यादस्य तस्य तच्छ्रवणात् ।
योद्धुमचीकमत मनो बोद्धुं न हि भावि शक्यते रोद्धुम् ॥ ३७ ॥

मदमत्तमिव स्तम्बेरममसमबलं बलावलेपेन ।
भुक्कण इव धिक्कुर्वन् व्याधूय पदे तमभ्यगाद् वेगात् ॥ ३८ ॥

अयि मन्दमते नृपते मयि मन्दिममोचकेऽत्र मन्दानाम् ।
आगच्छति किं क्रीडसि रागस्त्यागाय हा तवासूनाम् ॥ ३९ ॥

सिष्णासोर्मम यत् त्वं पुष्णास्यागः प्रवाहरोधितया ।
तत् त्वां मदमत्तमहं मत्वा त्यक्ष्यामि नैव शिक्षार्हम् ॥ ४० ॥

इति दितितनयाधीशे प्रतिवदति स हैहयः स्त्रियस्त्यक्त्वा ।
आदाय गदां त्रिजगन्मोदाय जयश्रिया रिरंसुरभूत् ॥ ४१ ॥

तदनु तयोः सुरनुतयोरुभयोरिभयोरिवाद्रिसंनिभयोः ।
अतिदारुणरणरङ्गेऽकृत[1] कृतवीर्यात्मजस्तदा वीर्यम् ॥ ४२ ॥

पटुतरकृतवीर्यसुतप्रबलगदाघातभग्नदोःशाखः ।
आरात् कारानिलयं निन्ये धन्येन तेन दैतेयः ॥ ४३ ॥

चारानन‌श्रुतैतच्चतुराननीतिवाक्यचातुर्यात् ।
अपि स मलिम्लुचचरितस्तेनामरसंमतेन संमुमुचे ॥ ४४ ॥

स्वयशोधवलितहरितामयशोभीतात्मनामथात्यर्थम् ।
न चरीकरीति चित्रं प्रत्यर्थिजनप्रहाणमर्थ्यर्थम् ॥ ४५ ॥

अर्थिमनःपूरणतः प्रत्यर्थिशिरःपदप्रसारणतः ।
किं फलमुद्यद्धनुषाममलक्षितिभृत्कुलोल्लसज्जनुषाम् ॥ ४६ ॥

विधिविधिविषयाशेषस्वागःपरिमार्जनोर्जितोर्जस्कः ।
पुनरथ सुररथसहितस्तेपे भुवनं वनं वनाग्निरिव ॥ ४७ ॥

[1] The *avagraha*-mark in *akṛta* is clearly given in MS. B. This point is noted just for information regarding the method followed in the MS. See fn. I, p. 203.

दण्डधरादपि भीकरदण्डश्चण्डप्रतापमार्ताण्डः ।
अण्डजपतिगतिमूढश्चण्डगतिः पुष्पकं समारूढः ॥ ४८ ॥

सोऽसावासादितबलिसद्मा पद्मापतिप्रतीहारात् ।
भीतोऽभीतस्तु ततस्त्यक्तस्त्यक्तप्रभः प्रयाहीति ॥ ४९ ॥

भासां निधिसांनिध्ये कासां भासां विकासितान्यासाम् ।
विलसति सति तत्र परं सद्यो न द्योतते हि खद्योतः ५० ॥

हृतमामकधृतिरभवत् कोऽसाविति सोऽतिवेपमानमनाः ।
विधिवरविहितालम्बः स बली बलिदैत्यमित्युवाचैत्य ॥ ५१ ॥

हरिहरमुख्याः सर्वे गीर्वाणाः सङ्गरे मया निहताः ।
क्वापि न भीरस्माकं नाथाधस्तादनाथवत् किमिह ॥ ५२ ॥

एहि मया सममिह नः पाहि युवा स्यामहं त्वमेवेशः ।
इत्याख्यातवति परं प्रत्याचख्यावमुं स दैत्यवरः ॥ ५३ ॥

अथ कथमपि तद्दासीजनघनहस्तानुहस्तिकाकलितः ।
कृततत्करतलरशनस्ताभिर्मुमुचे दशाननः स्त्रीभिः ॥ ५४ ॥

जितसकलजगज्जातुचिददितिमनुजमवेक्ष्य पूरुषं दनुजः ।
बलवानिव भासि त्वं कलहायस्वेति कंचनारौत्सीत् ॥ ५५ ॥

मदमत्तममुं मत्तद्विपमिव नृहरिः समेत्य वामेन ।
हस्तेन चपेटामधिगण्डं चक्रेऽस्य चण्डदोर्दण्डः ॥ ५६ ॥

अधिगत्य ततो मूर्च्छामधिपतिरमरद्विषां विषादपरः ।
तदनु ससंज्ञः पुरुषं पुनरपि नैवाददर्श दोःपरुषम् ॥ ५७ ॥

विधिवरदाननिदानं धैर्यं दुर्वारदर्पमादाय ।
आलम्ब्य चन्द्रहासं विचिकायान्तर्हितं हि तं पुरुषम् ॥ ५८ ॥

अज्ञ इव प्राज्ञं तं स्वयमनवेक्ष्य स्फुरत्तमोविवरम् ।
वीक्ष्य दुरापं सविधे तस्मिन्नतिधीरधीः पदं निदधे ॥ ५९ ॥

गाढतमोवृतविवरे प्रौढमतिर्दूरतश्चिरं विचरन् ।
गूढप्रकाशमक्ष्णा गूढमिव स्वर्गमग्रहीदुग्रः ॥ ६० ॥

[1]अवलोकितपुरुषोत्तमसमपुरुषपरं परं पुरं तदभीः ।
अवगाह्यारुद्धगती राजगृहं राजमार्गतः समगात् ॥ ६१ ॥

तत्राप्यवारितः सन् वित्रासविधायिवेत्रहस्तवृते ।
अवरोधमवजगाहेऽनवरोधं रावणो विरोधेन ॥ ६२ ॥

मणिमयकाञ्चनमञ्चे गुणगणनीयोपबर्हणाद्यर्हे ।
काञ्चनचेलपिधानं भुवननिधानं पुमांसमद्राक्षीत् ॥ ६३ ॥

प्रच्यावितमुखवसनानुच्याविततद्वरसयश्वसनात् ।
व्यसनं समवाप्यामितमसनं निर्वोढुमक्षमः सोऽभूत् ॥ ६४ ॥

उरुचक्रमरुच्चङ्क्रमचलजीर्णतृणं यथा स्थिरस्थितिकः ।
हंसीव मामहिंसापरकस्त्वमिति प्रभीरफाणीत् तम् ॥ ६५ ॥

तन्मन्दस्मितमारुतजितभुजवीर्यावलेपधूर्विजितः ।
याहि यथासुखमचेत्यहितोऽभिहितस्ततो निवृत्तोऽभूत् ॥ ६६ ॥

[1] After verse 60 (*gāḍhatamo*, etc.) and before this verse (*avalokita*, etc.) there seems to be some seven verses in MS. B, describing the *pura* in some more detail. These are not very clear.

धैर्यस्थैर्यहरं तं पुरुषं पुरुषोत्तमं विनिश्चित्य ।
चित्राब्धिमग्नहृदयः पुरमापात्मीयमञ्जसास्तदयः ॥ ६७ ॥

न क्वाप्यस्य सुरारेः प्रतिबन्धः सत्यसन्ध राजेन्द्र ।
राम बभूव स तादृग् भगवन् भवता हतोऽवतारवता ॥ ६८ ॥

स ततोऽपि दुराधर्षः सततोदितविक्रमो महामायी ।
शक्रजिदक्रमरणविघ्नकवदीशेन लक्ष्मणेन हतः ॥ ६९ ॥

तावकतेजःसंक्रममहिमा स हि मानुषं यदत्येति ।
निर्जरदुर्जयदानवनिर्जयि तेजः परं कपीशानाम् ॥ ७० ॥

महिमा न हि माति मनोवचसामयने च सामगायन[1] ते ।
सर्वमिदं यद्भासा भाति नुतिस्तस्य ते कुतो वचसा ॥ ७१ ॥

आस्माकानेकजगद्विस्मापकपूर्वपुण्यपरिणामात् ।
दृष्टोऽसि कृतार्था वयमष्टापदगर्भतात तेऽस्तु नमः ॥ ७२ ॥

प्रस्तुत्य स्तुत्ययशा वस्तु समस्तावधि प्रधीः स मुनिः ।
मुनिभिः साकमनुज्ञां लब्ध्वानुपलब्धविक्रियोऽथ ययौ ॥ ७३ ॥

गोप्तरि तस्मिन्नाप्तानाप्तानुव्याप्तसंपदापत्के ।
चरणैश्च चतुर्भिर्भुवमभिपेदे धर्मधेनुरत्यर्थम् ॥ ७४ ॥

सुकृतैकपदेऽपि कृतादकृतासुकृते जगत्यलं जयति ।
द्विजशिशुरजशासनतश्चलितासुरसूययेव शूद्रमुनौ ॥ ७५ ॥

जनकस्तं निजदोर्भ्यां कनकमिवादाय राजकीयकरम् ।
रामाय हतारिजनक्षेमाय तदा न्यवेदयत् कटुगीः ॥ ७६ ॥

[1] Perhaps our author was a *Sāmavedin*.

जरतस्तस्यार्तरवं शपतः श्रुतिशूलमीश्वरः श्रुत्वा ।
अप्रतिपन्नेऽमात्ये विप्रतिपन्ने सुधीः स्वयं दध्यौ ॥ ७७ ॥

रामः स्वयमेवेषद्ध्यानाध्यक्षीकृतार्तिकृद्दोषः ।
आशुगमाशुगतोऽपि प्रतिकर्तुं पुष्पकं समस्मार्षीत् ॥ ७८ ॥

अधिगत्य स्मृतिमात्रादधिगतमीशः स पुष्पकं रामः ।
यत्र तपस्यति शूद्रस्तत्र चकारामलान्तरात्मानम् ॥ ७९ ॥

तेनैव समं गतवति तस्मिन्नानन्ददायके याने ।
तीव्रे तपसि चरन्तं शूद्रं निददर्श निर्विचारं तम् ॥ ८० ॥

अच्छेन हृदा युक्तश्चिच्छेद शिरः स तस्य शूद्रस्य ।
यत्तज्जीवातुरभून्मृतविप्रसुतस्य तद् विचित्रमभूत् ॥ ८१ ॥

सुप्तोत्थितमिव पुत्रं प्रेक्ष्योत्थितमग्रजः पुरे तत्र ।
तुष्टाव पतिं बहुधा दृष्टाखिलधर्ममङ्गलैकविधिम् ॥ ८२ ॥

शंसन्ति श्रुतयो यं सर्वज्ञतया च सर्वयन्तृतया ।
रामं तमनन्तगुणं न गृणन्ति कथं गुणग्रहाः कवयः[1] ॥ ८३ ॥

चपलप्रकृतिरपि श्रीर्यत्र स्थिरतामवाप सैव रता ।
रामे सुगुणग्रामे न रमेत रमेश्वरे नरः कतमः ॥ ८४ ॥

[1] See from the *Anargharāghava*, the following:

yadi kṣuṇṇaṃ pūrvair iti jahati rāmasya caritaṃ
guṇair etāvadbhir jagati punar anyo jayati kaḥ,
svam ātmānaṃ tattadguṇagarimagambhīramadhura-
sphuradvāgbrahmāṇaḥ katham upakariṣyanti kavayaḥ.
(I. 9)

अलघुस्तुतिपात्रीकृतरघुपतयः [प्रकृतयश्च वीतभयाः[1]] ।
सर्वा अपि वैकुण्ठं प्रापुरिवाकुण्ठमुत्कटोत्कण्ठम् ॥ ८५ ॥

प्राज्यं तदमरराज्यं राज्यं रामस्य वीक्ष्य कस्त्याज्यम् ।
नामनुत समस्तनुतं यत्परमं रामनामकं धाम ॥ ८६ ॥

अधिकरणघञन्ततया व्युत्पन्नं रामनाम सर्वेषाम् ।
कर्तृघञन्तभ्रममित् स्मर्तृजनानन्दकन्दरूपतया ॥ ८७ ॥

यादृशमानन्दं ययुरुच्चैरधिरामराज्यमखिलजनाः ।
तमभूतपूर्वमनुभवसाक्षात्करणीयमन्वभून्नेन्द्रः ॥ ८८ ॥

अभिनवजलदश्श्यामे रामे रमणीयसद्यशःसोमे ।
नगराय निवृत्ते कृतकृत्येऽभीयाय कोऽपि काकस्तम् ॥ ८९ ॥

त्रस्तस्तमनुद्रुत्य प्रीतंमन्यं च गृध्रराट् कश्चित् ।
कृतकलहौ च कुलायं प्रति तौ रामाय तं न्यवेदयताम् ॥ ९० ॥

आसागरशैलोदयमात्मीयं नीडमाह काकस्तत् ।
गृध्रस्तु यदा तरवः प्राह तदादि स्वकं कुलायं तत् ॥ ९१ ॥

रामस्तु चिरन्तनयोः कारुणिकः काकगृध्रयोरुक्तिम् ।
परिभाव्य सत्यवचनं गृध्रं नीडाधिकारिणं चक्रे ॥ ९२ ॥

काकस्तु बलीयानपि रामधनुर्मुक्तपत्त्रिसंभीतः ।
गृध्रं विहाय सहसा साकं शोकेन दुद्रुवे दूरम् ॥ ९३ ॥

[1] MSS. seem to read the last part of the second foot as *vītabhītayaḥ prakṛtayaḥ*. This reading affects the metre. What is given in square brackets is only my suggestion.

स निदर्शनतां प्राप्तः स्वकुलायमुपेत्य गृध्रराड् जगति ।
आर्तं प्रावर्तयत श्रीमद्रामानुवर्तनाय जनम् ॥ ९४ ॥

अपर्याप्तखेदमोदनपर्याप्तपराक्रमः परं रामः ।
पावनवनवासावनसेवननिष्णातकीर्तिराप पुरम् ॥ ९५ ॥

अभिनवजलदश्यामं रामं रामामनोरमं रामाः ।
कामं कामयमानाः काममलब्ध्वापि पूर्णकामास्ताः ॥ ९६ ॥

रामे राजनि भूमेर्दाने धर्मे च केवलान्वयिनि ।
त्रैकालिकसंसर्गाभावप्रतियोगितात्वधर्मगता ॥ ९७ ॥

रामो रमणीयगुणग्रामो गुरुगीयमानरम्ययशाः ।
धर्मात्मा स सुधर्मासदृशं सद आससाद सामोदः ॥ ९८ ॥

वृत्रारिरिव श्रीमांस्तत्रासीनो नृपासने रामः ।
विजयं नामामात्यं निजमनुयुयुजे मिथः कथाकथने ॥ ९९ ॥

स तु तत्तद्विविधकथाः कुतुकाद् व्याहृत्य मां किमाहुरिति ।
व्यवहरतीशेऽनीशः किमपि न वचनं समाददे त्रस्तः ॥ १०० ॥

सत्यं बोधयति न यः स्वयमधिपतिमीहमानमस्तनयः ।
न श्रेयस्तमुपैति श्वःश्रेयसदूरमित्युदीर्याह ॥ १०१ ॥

ब्रूहि न भीतिस्ते स्यादैहिकमामुष्मिकं च मे देहि ।
इति वदति श्रीरामे पतिमतिमनुसृत्य सत्यमवदत् सः ॥ १०२ ॥

रामो रमणीयतया रिपुनिलयचिरोषितामपि स्ववधूम् ।
स्वयमेव नियन्तृतया प्रतिगृह्णातीति पामरा ब्रुवते[1] ॥ १०३ ॥

[1] In the *V.R.* it is Bhadra, who conveys the bad rumours.

तद्जेयजगद्वार्तास्पदकर्णयुगः स घूर्णमानमनाः ।
मामपि जगदपवादः कामार्तमिवैति का कथाऽन्येषाम् ॥ १०४ ॥

यं व्रजति परीवादस्तं व्रजति न संपदत्र चामुत्र ।
परिहारमृते पत्न्याः परिहारोऽस्त्यस्य नापवादस्य ॥ १०५ ॥

वोढुं वाञ्छैव यशः सोढुं शक्नोमि नायशस्तज्जम् ।
पत्नीमन्तर्वर्त्नीं त्यक्ष्यामि कथं सतीमनन्यगतिम् ॥ १०६ ॥

किं कर्तव्यमिदानीं पङ्कजनयनां पतिव्रतां सीताम् ।
जाने जगदज्ञानादेनामाशङ्कते सतीमसतीम् ॥ १०७ ॥

नन्वयमेव परं पदमन्वयमपि दूषणस्य कारयति ।
तज्जगति परीवादः सद्गतिलिप्सोः परं परीहार्यः ॥ १०८ ॥

सकलङ्कितमात्मानं सकलजगद्भिः सभाजितं कुर्याम् ।
संभावितापकीर्तिः पुंभावविमार्जनी न किं पुंसाम् ॥ १०९ ॥

इति धीरमनास्त्रिजगन्नुतिपदमात्मानमन्यथाकर्तुम् ।
लक्ष्मणमाह मिथस्तां पक्ष्मलनयनां परं प्रहातुमनाः ॥ ११० ॥

मेचकचिकुरा चकमे मधुरमहाभोगलालितापि मया ।
अमथनकुसुमापीडां शमधनकन्याजनैर्वनक्रीडाम् ॥ १११ ॥

आश्रितचेतःपूरणमस्माकमतीव कारणं यशसः ।
पत्नी चान्तर्वत्नी प्रीता सीता सती विधेयातः ॥ ११२ ॥

तदनुज दनुजहर्तां तामुपनय वनमेव पावनं कान्ताम् ।
तत्र विहाय महात्मन् कुत्रचिदेहि त्वमेक एव पुनः ॥ ११३ ॥

इति वदति श्रीरामे सौमित्रिरुदश्रुरित्युवाच विभुम् ।
किमिदानीमपराद्धं भगवन् भवते तया जगन्नुतया ॥ ११४ ॥

शङ्कामपनीयैव हि लङ्कानगरादियं समानीता ।
किंकारणतः सीतामङ्कारोपेण लालितां त्यजसि ॥ ११५ ॥

इति विहिताञ्जलिबन्धं मतिमति तस्मिन् फणत्यनिर्बन्धम् ।
रामस्तमाह सकलं दैविकमिति धीरचेतसाविकलम्[1] ॥ ११६ ॥

अथ सौमित्रिरमित्रहशासनतस्तां पुरात् सतीं सीताम् ।
रथ आरोप्य यथासुखमनयद् वनमेव पावनं प्रयतः ॥ ११७ ॥

अविदितपतिपरिहाणा सवितृकुलोत्तंसधर्मपत्नी सा ।
अधिगतघनवनवीथिर्देवरतं देवरं जगाद मुदा ॥ ११८ ॥

वन्यावासिमहामुनिकन्याकमनीयदर्शनाय मुहुः ।
कामयमानासमये मयि दयमानेन मानिता समये ॥ ११९ ॥

नवपल्लवकुसुमासमकमनीयमहर्षिकन्यका वीक्ष्य ।
आवामचिरादयि तं लक्ष्मण वीक्षावहे पुनर्दयितम् ॥ १२० ॥

श्रितजनचेतःपूरणकारणकरुणाकटाक्षविस्फुरणम् ।
यस्य तमीशं हित्वा पावनमपि मां वनं न मोदयति ॥ १२१ ॥

[1] Our author says: *rāmas tam āha sakalaṃ daivikam iti*. See the following from the *Uttararāmacarita*:

ikṣvākuvaṃśo 'bhimataḥ prajānāṃ
jātaṃ ca daivād vacanīyabījam,
yaccādbhutaṃ karma viśuddhikāle
pratyetu kas tad yadi dūravṛttam. (I. 44)

अज्ञानादभिलषितं यज्ञायतनाभिवीक्षणं विपिने ।
विज्ञाननिधेस्तस्य प्रज्ञानन्दप्रदं हि सांनिध्यम् ॥ १२२ ॥

बहुलानुरक्तिभक्तिं सीतां सीतापतेः प्रियस्त्वनुजः ।
अभिवीक्ष्य सभीकम्पः प्रमुमोच शुचास्रमस्फुरद्वाचा ॥ १२३ ॥

वक्तुमुदन्तमरं तं मृत्युमिव स्वं रुदन्तमुरुदन्तम् ।
वीक्ष्य विलक्षा लक्ष्मणमफणत् सा खेदकारणं किमिति ॥ १२४ ॥

इत्यभिदधतीमथ तामविदितविपदं पदं महर्धीनाम् ।
धन्यां धरणीकन्यां स गिरा सौमित्रिराह गद्गदया ॥ १२५ ॥

सत्यानुभाववानपि तत्याज त्वामनागसं रामः ।
मातः किमिति वदेयं प्रातः कमलाक्षि वेत्सि नेषदपि ॥ १२६ ॥

अथ चित्रगतप्रतिमाप्रतिमशुचं प्राप्य मैथिलेन्द्रसुता ।
श्रुतिपुटपाटनपटुतद्वचसा निश्चेतना पपात च सा ॥ १२७ ॥

अधिगत्य चिरात् संज्ञां विधिगत्यनुतप्तहृत् तदा विज्ञा ।
सीताप्रातिविचित्रा भीताश्रुमुखीत्युवाच सौमित्रिम् ॥ १२८ ॥

एवंविधमपराधं किमिहातनवं शुभाभिजात नवम् ।
सत्यं वद न शरण्ये गत्यन्तरमस्ति किं नु मेऽरण्ये ॥ १२९ ॥

न मनोवाक्कायैरहममनोहरमार्यपुत्रकेऽकरवम् ।
ब्रूहि महीनाथो मामाहितकरुणः किमित्यहो विजहौ ॥ १३० ॥

पत्युर्मम दाशरथेरत्युत्सवकारिणः कृपाजलधेः ।
करुणा केनापहृता शरणागतवत्सलस्य शान्तस्य ॥ १३१ ॥

किं करवाणि महात्मन् प्राणिमि कथमत्र तं विना शरणम् ।
किंकारणकमिदानीं मामकपरिहाणमार्यपुत्रस्य ॥ १३२ ॥

नाकारि प्रतिकूलं लोकाधिपतेः कदाप्यमुष्य मया ।
आगः किमपि न जाने त्यागः कुत एष मे कृतो विषमे ॥ १३३ ॥

कृतवत्यसीदमागस्तत एव त्वां त्यजामि कृतपापे ।
इति मां प्रति किमिति क्षितिपतिरवदन्नैव दैवतं स मम ॥ १३४ ॥

अङ्कगताया मम तत्पङ्करुहाक्षः प्रसादविमुखश्चेत् ।
किं करणीयमिमां निःशङ्कमितो याहि मां विहाय वने ॥ १३५ ॥

देवर किं कुरुषे त्वं दैवगतिस्तादृशी ममाविरभूत् ।
प्राक्तनकर्मनिमित्तं प्राणवतां विप्रियं प्रियं हि तथा ॥ १३६ ॥

यावत् प्राणाः प्राणप्रियमप्रियकारकं प्रियं तावत् ।
ध्यायन्तीह तमेव स्यामेवं गच्छ लक्ष्मणाचक्ष्व ॥ १३७ ॥

इत्युद्वेलाश्रुजलामत्युद्वेगेन दूयमानमनाः ।
नत्वा स्वस्त्यस्त्विति तामुक्त्वा प्रमुमोच साकमश्रुझरैः ॥ १३८ ॥

तामेव सतीं सीतां सौमित्रिश्चिन्तयन्ननन्तार्तिः ।
रामायामायिकतत्प्रेमाकुलचेतसेऽब्रवीन्मुक्ताम् ॥ १३९ ॥

तारामिव भुवि पतितामारादागत्य मैथिलेन्द्रसुताम् ।
स्वाश्रममश्रमविपदं वाल्मीकिरनीनयन्मुनीन्द्रस्ताम् ॥ १४० ॥

निर्भरगर्भभरा सा दुर्भरदुःखा निरासतो भर्तुः ।
सीतासीदुपचारैः प्रीता वल्मीकजन्मनोऽथ मुनेः ॥ १४१ ॥

अथ मुनिकन्या धन्याः सीतां परिवार्य शीतलप्रकृतिम् ।
अप्रीणयन्त तत्तत्क्रीडाभिश्चानुरूपगाथाभिः ॥ १४२ ॥

पाकारिमुखप्रस्तुतचरिता लोकाधिनायकस्य वधूः ।
असमशुभावहसमये प्रसवनिमित्तातिवेदनां प्राप ॥ १४३ ॥

मुनिवरवनिताः सर्वा निन्युस्तामुचितमुटजमायस्ताम् ।
सुषुवे तत्रैव सती सीता पुत्रद्वयं प्रतीतजयम् ॥ १४४ ॥

विक्रमविजितकुमारौ सुकुमारौ मारसुन्दराकारौ ।
तौ तत्रावर्धेतां युग्मभवौ स्वप्रभावतोऽतिभवौ ॥ १४५ ॥

मुनिरेव तयोः सुतयोश्चक्रे जातादिसंस्क्रियाः सकलाः ।
अनवद्याखिलविद्या रामायणमप्युपादिशत् प्रेम्णा ॥ १४६ ॥

[1]चापेन पितुः स्तुत्या कोपेन कृतान्ततः समावसमौ ।
रूपेणाश्विसमानौ रविचन्द्राविव सुतावकाशेताम् ॥ १४७ ॥

प्रतिबिम्बाविव बिम्बाद् रामाद् रामात्मसंभवावुदितौ ।
नैवान्तरमीषदपि प्रापतुरवनीसुतासुतौ स्वपितुः ॥ १४८ ॥

अथावनिसुता सुताननसरोरुहावेक्षण-
क्षणक्षपितदुर्लभप्रणयवल्लभत्वव्यथा ।
मुखेन चिरविस्मृतस्मितसखेन सौख्यप्रमा-
प्रमापकविलासिना सपदि शैलजेवोल्ललौ[2] ॥ १४९ ॥

इति श्रीहरिपद्मनाभशास्त्रिविरचिते श्रीहरिचरिते महाकाव्ये पञ्चदशः सर्गः

[1] Verses 147 & 148 are found only in MS. B.
[2] The metre is *pṛthvī*.

षोडशः सर्गः

श्रीमानथ दाशरथिर्धीमानपहाय तां सतीं सीताम् ।
पुंभावमितो धर्मो दम्भावविभावनीयभूमिरभूत् ॥ १ ॥

निर्मलधर्मसरण्या निर्मायाधर्मदूरधीः शर्म ।
नवनीतसमानमना अवनीतलमाततान नाकतुलम् ॥ २ ॥

अथ यमुनातटशरणाः शरणागतवत्सलस्य रामस्य ।
श्रवणातिथिमातेनुर्लवणासुरमात्मदीपनं मुनयः ॥ ३ ॥

पाद्यार्घ्यासनवन्दनमुखनिखिलनमस्ययातितृप्तेभ्यः ।
तेभ्यः शरणाप्तेभ्यः प्रहसन्नभयं जगाद गोप्तेभ्यः ॥ ४ ॥

कामं करोमि कामं व इति श्रीरामवाचमाकर्ण्य ।
जनितमुदथ मुनिजनता लवणं मेने यमालयप्रवणम् ॥ ५ ॥

तदनु तदनुजन्मान्त्यस्तमसमसमरावधानमवधाय ।
स्वयमपि स चिकीर्षुः स्वं नाम ननामार्थवत् तमत्यर्थम् ॥ ६ ॥

शत्रुघ्नः स कृताञ्जलिरग्रजमीशं भुवस्तथार्थयत ।
स यथा नयधामैनं सुरशत्रुजयाय शातबुद्धिरशात् ॥ ७ ॥

मुनिविनिवेदितलवणाधीनाधिकशैलशूलमूलश्रीः ।
अनुजाय दुर्जयायुधदनुजासुहरं दिदेश दिव्यास्त्रम् ॥ ८ ॥

तद्वैष्णवास्त्रलाभादद्वैतं विष्णुना समायन्तम् ।
इदमाह महीजानिः पदमाहवसाग्रहद्विषद्विजये ॥ ९ ॥

स्वविजयमूलं शूलं शैवं स यदा यदा करोति करे ।
स जयति विमतग्रामं न जयति तं कोऽपि तस्य तद्धाम ॥ १० ॥

वरदोऽपि पुरारातिः करधृतशूलं तमब्जनाभिरपि ।
नायोधनकेलिमिलन्मायोपायादिना विजेतुमलम् ॥ ११ ॥

तत्स न शूलं धत्ते वत्स यदा त्वं तदा तमारुध्य ।
अहितमसारं जहि तं हितमभिहितमेतदास्मरन्नरिहन् ॥ १२ ॥

याहि यशः पौरुषजं याहि समायाहि निर्जितारातिः ।
अरिकुलजलनिधिमन्था हरिकृपया चास्तु ते शिवः पन्थाः ॥ १३ ॥

इति रघुपतिना प्रहितः प्रतिपक्षजयाय मन्त्रकृतरक्षः ।
घोरासुरजयनिघ्नः श्रीरामं तं ननाम शत्रुघ्नः ॥ १४ ॥

अरिहाथ धरासुरशुक्परिहाराय प्रधीतधीः प्रययौ ।
नैशतमःशमकारकगोशतदशको गभस्तिमालीव ॥ १५ ॥

शात्रवनिर्जयनिघ्नः शत्रुघ्नः शत्रुदर्शिभिर्मुनिभिः ।
साकं शोकपराङ्मुखलोकं व्यालोकयन्नगादरिगाम् ॥ १६ ॥

स सुरासुरदुर्दमदोरसुराधिपतिर्वनेऽमुना ददृशे ।
करिकेसरिमुखमृगशवकीलितशूलावतंसितैकांसः ॥ १७ ॥

पर्वतमिव तं चलितं गर्वत उद्वीक्ष्य धीरधीररिहा ।
अरुण इव तामसायनमरुणत् तत्तामसायनं सहसा ॥ १८ ॥

अथ स विविक्षुर्वेश्म प्रधनाय कृतोद्यमं तु शत्रुघ्नम् ।
दृष्ट्वा सस्मयमवदद् दिष्ट्या मृत्योर्मुखं गतः कस्त्वम् ॥ १९ ॥

लवणासुर एष हि न श्रवणातिथितामनायि केनापि ।
तव तद्धि ममादृष्टं त्वामघ्नि हठात् ककुद्मदभिपुष्टम् ॥ २० ॥

अरिहापि तमाह मुहुः परिहासपरं परं निरीक्ष्य मुहुः ।
उद्धारयिताहं त्वज्जग्धाखिलमौनिमांसखण्डानाम् ॥ २१ ॥

इति वीरवादपूर्वकमतिवीरपदानुगीतयोस्तु तयोः ।
अतिदारुण रण आसीत् पत्रितरुप्रस्तरच्छटापटलैः ॥ २२ ॥

अमरेशभीतिदायिनि समरे तत्रारिणारिहाभिहतः ।
तरुणा तरुणारुणवत् तमसा तमसावृतस्तदा न बभौ ॥ २३ ॥

दनुजस्तदनु जडात्मा मनुजं मत्वा मृतं निकाय्यगतः ।
आसादितभुङ् मनुजग्रासायासाधनोत्तमस्तमगात् ॥ २४ ॥

यावत् दनुज उपेतस्तावत् तरुणार्कवत् तमोमुक्तः ।
धनुरादाय दिदीपे नृहरिर्हरिवत् तदा करिप्रमुखे ॥ २५ ॥

किमरे समरे क नु मामवमत्य गमिष्यसि क्षपाट हठात् ।
हन्मि दुरात्मन्नद्य त्वामिति शत्रुघ्न आजघान घनः ॥ २६ ॥

युद्धाभिनिवेशश्चेद् बद्धादर एव तत्र तेऽहमपि ।
साधनमादाय मयायोधनमुपगम्यते दिशाध्वानम् ॥ २७ ॥

इति वदति तदा दनुजे दनुजालयतोरणादरस्फुरणः ।
बहिरेव निरुध्यारिं महिताशुगधारयारिहाफाणीत् ॥ २८ ॥

मुनिमांसमांसलं त्वामनिमिषवैरिन्निमिस्थितं हित्वा ।
चोरं शूरंमन्यं राज्ञे विज्ञापयामि रे किमरे ॥ २९ ॥

तत् त्वामत्रैवारिं हत्वा निष्कण्टकं जगत् कुर्वे ।
श्रीरामराजशासनमनुजातस्यैवमेव मे जातम् ॥ ३० ॥

शत्रुघ्नवचः श्रुत्वा शत्रुस्त्रिदिवौकसां स्वदोःशक्त्या ।
गिरिगुरुतरुनिकुरुम्बानरिशिरसि ववर्ष वार्षिकाब्द इव ॥ ३१ ॥

उरुतरुगिरिवरवर्षं परिकरकरकल्पितं च तत्तर्षम् ।
सममसममलं कुपितस्त्वरिहा परिहारमानिनाय शरैः ॥ ३२ ॥

परिकरविरहव्याकुलमरिकुलकालस्तमक्षिपन् कालम् ।
अस्त्रविदस्त्रं व्यसृजद् दैत्यं प्रति जिष्णु विष्णुदैवत्यम् ॥ ३३ ॥

तेनाभिहतो लवणो लवणोदन्वन्तमात्मनः पतनात् ।
धरणीवरणं चक्रे चक्रेण सह द्विजन्मनामरुजा ॥ ३४ ॥

जितवति जगदपकारव्रतमथ लवणं हि लक्ष्मणावरजे ।
सुमनःसुमनोवृष्टिः सममभवदभूतपूर्वसंतुष्टिः ॥ ३५ ॥

दिवि दुन्दुभयो नेदुर्ननृतुर्नाकेऽप्सरस्स्त्रियो विभियः ।
प्रससाद पयो वायुः सुखमेव ववौ दिशः प्रसेदुरपि ॥ ३६ ॥

दुर्नयदैतेयविपन्निर्णयनिर्णीतसंपदोऽथ बुधाः ।
रामं रविकुलसोमं सोमं प्रशशंसुरग्रतः कृत्वा ॥ ३७ ॥

अथ समधिगतजयश्रीः शत्रुघ्नः शत्रुसंपदा हृतया ।
हृतमहितमथ प्रणतो व्यज्ञापयदग्रजन्मने राज्ञे ॥ ३८ ॥

स मनुजनाथो दोर्भ्यां स्वमनुजमालिङ्ग्य मूर्ध्नि चाघ्राय ।
स्वमिव तमानन्दमयं समतनुतानन्दबाष्पसेकेन ॥ ३९ ॥

अकलङ्कयशःपटलैः सकलं जगदाहितामितामोदम् ।
कुर्वन् सर्वसुपर्वग्रामण्यनुमोदितो बभौ रामः ॥ ४० ॥

मधुरे मधुरानगरीराज्ये रामेण पूर्वमभिषिक्तः ।
तनयस्थापिततद्भूः शत्रुघ्नो राममेव शिश्राय ॥ ४१ ॥

भरतेन रामशासननिरतेन पुरे स्वमातुलस्य परे ।
द्विजशापसारवत्तरनिजशरनिहतास्त्रिकोटिगन्धर्वाः ॥ ४२ ॥

पुष्कलतक्षाभिख्यौ पुष्पवदाभावुभावथात्मभवौ ।
तत्राधाय पुरीं स्वां पुनरपि स इयाय रामसेवायै ॥ ४३ ॥

अत्यवलिप्तप्रत्यङ्मल्लम्लोचान् निहत्य दुर्ललितान् ।
स्थापय तत्र तनूजाविति लक्ष्मणमादिदेश जयरामः ॥ ४४ ॥

सौमित्रिरित्थमात्मजकामं संपूर्य रामशासनतः ।
स्वयमतिभक्तिप्रीतात् तस्माद् विज्ञानमग्रहीदग्र्यात् ॥ ४५ ॥

रामस्तात्त्विकदर्शी कौसल्यां कैकयीं सुमित्रां च ।
तत्त्वज्ञानसुधामथ दत्त्वा सममुद्दधार भवजलधेः ॥ ४६ ॥

स्वर्णमयार्णवरशनातनयां विनयाम्बुधिर्विधाय वधूम् ।
अधिगम्य गुरोराज्ञां विधिवद् विदधे मखाननन्तमुखान् ॥ ४७ ॥

अधिगम्य गुरोराज्ञामनुमोदनतस्तथा सुधी राज्ञाम् ।
अभिरामयशा रामो हयमेधविधित्सयोत्ससर्ज हयम् ॥ ४८ ॥

रामविमुक्तः स यथाकाममिलामण्डलं चरन् सकलम् ।
क्रमशो वल्मीकभुवो धाम मुनेः पावनं विवेश वनम् ॥ ४९ ॥

तदनु च तदनुचरत्वे स्वामिनियुक्ते नियोजितात्मानः ।
सौमित्रिमुखा वीरा वीरालापानुवादिनोऽनुययुः ॥ ५० ॥

समिदाहरणाय गुरोरमितौजस्कौ तदाश्रमान्तगतौ ।
सीतातनयावश्वं विश्वं संमोहयन्तमैक्षेताम् ॥ ५१ ॥

अग्रजकुशशासनतो व्यग्रमतिस्तं लवोऽथ सोल्लासम् ।
वन एव मतल्लिकया वनवल्लिकया बबन्ध गन्धर्वम् ॥ ५२ ॥

तदनु परीतानुचरस्तदनुचरस्तं निरीक्ष्य सौमित्रिः ।
रुद्धं हयमविरुद्धं बालं च रुचा दृशा चुचुम्बालम् ॥ ५३ ॥

चित्रीयमाणहृदयो मित्री सौमित्रिराह तं बालम् ।
हयमेधाय विमुक्तं हयमेनं विद्धि वत्स रामस्य ॥ ५४ ॥

तस्य हि जेतुर्जगतामस्य निरोधाच्छमस्ति वत्स कथम् ।
मुञ्च हयं सहसा त्वं वञ्चनबुद्ध्या न पथ्यमाचकथम् ॥ ५५ ॥

इति वदति स सौमित्रावत्रासलवस्तदा जगाद लवः ।
अजितो न जहाति हयं विजितो नैव त्वयानुनेतव्यः ॥ ५६ ॥

बालकहयपालकयोर्लवलक्ष्मणयोरथात्तयुत्क्षणयोः ।
भीकरशरधाराभिर्भास्करसरणिश्चिरं तिरश्चक्रे ॥ ५७ ॥

तुमुले तत्र समीके लवशरलवनेन लक्ष्मणे क्षीणे ।
वार्ताश्रवणादनुमितवार्ताः सर्वेऽपि जग्मुरभिरामम् ॥ ५८ ॥

श्रीमान् रामस्तु तदा लक्ष्मणमवलोक्य बाणभिन्नतनुम् ।
स्वयमेव यो[द्धुमैच्छत्ते तु गतं]तं निवारयाञ्चक्रुः ॥ ५९ ॥

प्रतिपक्षजयाशक्यप्रतिपक्षगजाङ्कुशः कुशः स तदा ।
मत्सरमलिनमनस्कं वत्सं तूत्सारयांचकार रणात् ॥ ६० ॥

स्वयमेव युयुत्सुस्तैरयमहमस्मीति चापभृत् तस्थौ ।
तेन समं ते वीराः प्रधनं व्यातेनिरेऽथ कीर्तिधनम् ॥ ६१ ॥

तत्रासमसंग्रामे वित्रासवशंवदेषु सर्वेषु ।
अधिकं युद्ध्वा रामो व्यथितः सीतासुताशुगाभिहतः ॥ ६२ ॥

चिरमभिरामे समरादरमत विजयश्रिया कुशः कामम् ।
वृत्तान्तममुं वन्याः सीतायै केचिदूचुरतिचित्रम् ॥ ६३ ॥

सीता तच्छ्रवणादतिभीता तत्रैत्य सोदरैः सत्रा ।
समराजिरनिःसंज्ञं रामं विज्ञाय सा शुशोचार्ता ॥ ६४ ॥

कुशमथ शत्रुगजाङ्कुशमभिभर्त्स्य सभीरभीलवं च लवम् ।
विससर्ज हयं सदयं स्वसुतावपि तावनीनयन्निलयम्[1] ॥ ६५ ॥

अथ ते रामप्रमुखाः क्रमशः संप्राप्तचेतनाः सर्वे ।
हयमालोक्य विसृष्टं प्रतिभटविरहाच्च मेनिरेऽदृष्टम् ॥ ६६ ॥

[2]चिच्छक्तितया तस्यास्तच्छक्तिविनाकृतेर्जितो रामः ।
अत्रास्ति गतिर्यद्वा पुत्रादिच्छेत् पराजयं स्वमिति ॥ ६७ ॥

[1] The story of Lakṣmaṇa and Rāma coming to the battle with Lava and Kuśa is not found in the *V.R.*

[2] The reason for the defeat of even Rāma (and others) given by our author is very interesting.

हायनपरिपूरणतो हयमादायाथ तेऽवतारणतः ।
साकूतदृशोऽन्योन्यं साकेतमयुर्निरस्तसामान्यम् ॥ ६८ ॥

अमरा अथ तत्राययुरमराधीशेन साकमिन्द्रेण ।
मुनयः सर्वेऽपि तथा जनयन्तः प्रीतिमेव रामस्य ॥ ६९ ॥

मुनिरपि वल्मीकजनिः सहसा सह शिष्यमण्डलैर्महसा ।
महितः कुशलवसहितः साकेतं प्राप तत्र साकूतम् ॥ ७० ॥

अथ हयमेधं चक्रे रामः स्वपुरोहितं पुरोधाय ।
कनकमयजनकतनयाकल्पितपत्नीविधिः स दाशरथिः ॥ ७१ ॥

तत्र सुतौ सीतायाः सदसि मुनीनां मनोहरं मधुरम् ।
कृत्स्नं रामचरित्रं चित्रमगास्तामगाधममृतनिधिम् ॥ ७२ ॥

कुशलवगानमहिम्ना वाल्मीकिवचःप्रभावसंपत्त्या ।
रामकथासुधयालं कामपि मुदमाप तत्र मुनिजालम् ॥ ७३ ॥

वञ्चितसर्वव्याप्रतिरञ्चितगानैकतानचित्तकृतिः ।
समवायः स मुनीनां समवायमुपेयिवानिवास्त तयोः ॥ ७४ ॥

अजिनं वृजिनहृदेको दण्डं कृतदण्डमेनसामपरः ।
वल्कं कल्कहृदन्यः कुशलं च कुशासनं ददावन्यः ॥ ७५ ॥

उपदा उपगृह्णन्तावुपधावन्तावुपार्षमतिहर्षात् ।
कर्णसुधां रामकथां पूर्णमनस्कावगायतामयुतौ ॥ ७६ ॥

प्रशशंसुरलं मुनयो वाल्मीकिमुनिं च काव्यकर्तारम् ।
कृतिनेतारं रामं कृतिनौ कृतिगायकौ कुमारौ च ॥ ७७ ॥

पुरतः प्रशशंसुरलं रामस्य प्रेमतस्तदा मुनयः ।
वाल्मीकिकृतिमुदारां कुशलवपदभाक्कुशीलवोद्गीताम् ॥ ७८ ॥

रामः स्वयमपि तां कृतिमथ शुश्रूषुर्महर्षिवाक्छ्रवणात् ।
अवभृथमखिलबुधैः सह सहसा विदधे यथाविधि प्रयतः ॥ ७९ ॥

परिपूर्णमना रामः परिपूर्णमनोरथान् विधाय बुधान् ।
निजगुरुमृत्विग्गणमपि चक्रेऽसमसंपदास्पदं प्रेम्णा ॥ ८० ॥

घनकनकवस्तुवाहनमणिमौक्तिकविद्रुमादिवर्षेण ।
घन इव स घनश्यामो जनमखिलमवाकिरच्चिरं रामः ॥ ८१ ॥

मधुराकृतिरथ रामो मधुराकृतिबालकद्वयोद्गीताम् ।
बालकसहितं महितं वाल्मीकिमनाययत् पुनः स्वसभाम् ॥ ८२ ॥

अभ्यर्च्य यथार्हं मुनिमिभ्यस्तावप्यतीव निष्कामौ ।
ताभ्यां निजमपदानं द्वाभ्यामुपगीयमानमश्रौषीत् ॥ ८३ ॥

गानामृतपानादपि लोकं बालावलोकनप्रीतम् ।
दृष्ट्वा रामः कुतुकात् कावेतावित्यपृच्छदच्छकृतिम् ॥ ८४ ॥

आनन्दमयं रामं जानन् मुनिपुङ्गवोऽथ वाल्मीकिः ।
श्रीराम तवैवैतौ तनयाविति तुष्टचेतसावोचत् ॥ ८५ ॥

तत्र सदस्याः सर्वे चि[-त्रतरोदा-]रसिन्धुसंमग्नाः ।
प्रेक्ष्याकृतिसामान्यं प्रेक्षावन्तस्तथा विनिश्चिक्युः ॥ ८६ ॥

सत्येन शपे श्रीमन्नत्यन्तविशुद्धमानसा सीता ।
त्यक्ता त्वयाश्रमे मम व्यक्तावासे सुतावसूताम् ॥ ८७ ॥

रामा [-तिशुद्धहृदयां-] तामानय मानयावमानय मा ।
जानाति भवानपि तां का नाम कथा मुधापवादस्य ॥ ८८ ॥

विक्रमविजितकुमारौ विद्धि कुमाराविमौ तवैव विभो ।
अनृतं नोदितपूर्वं तन्नृपचूडामणेऽनुगृह्णीष्व ॥ ८९ ॥

सप्रत्ययमेवं तं विप्रशिखाशेखरं वचोऽवन्तम् ।
आह तमात्मारामः श्रीहरिशरणं मुनिं गुणारामः ॥ ९० ॥

जानामि सतीं सीतामेनांसि न तत्र संशयो न तु मे ।
स [त्वं] तस्याः सत्यं तत्त्वज्ञतया परं प्रकाशितवान् ॥ ९१ ॥

आनय तामाशु यतां ज्ञानवदग्रेसरानुगृह्णामि ।
कान्ते व्याहरतीत्थं स्वान्तेवसता समानिनाय स ताम् ॥ ९२ ॥

वाल्मीकिमहामुनिना रामा रामाय सार्पिता कुपिता ।
जनसंसदि जननाथं नाथं स्वं त्रिः परीत्य परमफणत् ॥ ९३ ॥

लोकप्रत्ययहेतुं प्रत्ययमेषा करोति निर्दोषा ।
यद्यहमस्मि सतीयं ह्यवकाशं ददातु मे जननी ॥ ९४ ॥

इति कथयत्यै तस्यै पतिमुखविनिबद्धदृष्टये देव्यै ।
आविर्बभूव भूमेरद्भुतसिंहासनं तदा दिव्यम् ॥ ९५ ॥

अथ भूदेवी साक्षात् तां तत्र निवेश्य चाङ्कमारोप्य ।
आश्वास्य तदा लोकैः साकं स्तुतया तिरोदधे सुतया ॥ ९६ ॥

सर्वे तत्र सदस्यास्तस्या महिमानमद्भुतं प्रेक्ष्य ।
विजहावेनां किमिति व्यवहृत्यादर्शनादथार्तिमधुः ॥ ९७ ॥

रामोऽपि सतीविरहादामोदपराङ्मुखो विलक्षमुखः ।
आह वचो विह्वलहृन्मोहमुपादाय तत्प्रसादाय ॥ ९८ ॥

नय मामपि हा सीते नयहीनमपि प्रियं प्रियासि मम ।
क्व स्त्री विजहाति पतिं न स्त्री स्वातन्त्र्यमर्हतीत्याहुः ॥ ९९ ॥

रामं विद्धि सकामं कामं वैदेहि दर्शनं देहि ।
असुमति मयि भगवति हे वसुमति सीतां समर्पयेः कृपया ॥ १०० ॥

याचे त्वामेव परं नो चेन्न करोमि किं रुषाप्यपरम् ।
आनय लक्ष्मण चापं मानवती चैतु मेदिनी चापम् ॥ १०१ ॥

इति विलपति सीतां प्रति रामावद्धीरस्चेतसा रामे ।
बाष्पं कस्य सबाष्पं नयनं च रुरोध [1]नुः शुशुन्नयनम् ॥ १०२ ॥

कुलगुरुरथ तं रामं कुशलवकुशलं प्रदर्शयन् वचसा ।
आश्वास्य तदङ्के तावाश्वास्य सुतौ शुचं चकाराधः ॥ १०३ ॥

प्रीतिस्निग्धमनस्को नीतिनिधिस्तौ सुतौ समाश्लिष्य ।
स वधूविरहज्ञानं चक्रे तत एव किंचिदपनोदम् ॥ १०४ ॥

प्रतिपत्तिगुरोः स गुरोः प्रतिपत्तिमुपेत्य चाज्ञवद् विज्ञः ।
तावेव तरी चक्रे दुस्तरवैधुर्यवार्धिनिस्तरणे ॥ १०५ ॥

विधिमिव विधिवन्मघवा वाल्मीकिमुदारधीः स दाशरथिः ।
समतनुतान्तःप्रमदं समतनुतान्तप्रदानतो रामः ॥ १०६ ॥

[1] *nuḥ* seems to be the genitive singular of *nṛ* (*nā narau naraḥ*; *nuḥ*=*narasya*).

रामो रामापगमाशर्मा शर्मावहं स वाल्मीकिम् ।
बहुधा बहुधामानं भूयो भूयोऽभिवाद्य चास्तौषीत् ॥ १०७ ॥

दुस्तरपित्र्यर्णोदधिनिस्तरणेऽसि त्वमेव नस्तरणिः ।
यद् रक्षितवानसि तामसितापाङ्गीं कुलप्ररोहाय ॥ १०८ ॥

इति मुनिपतिमतिभक्त्या मतिमान् रामः प्रशस्य हरिभक्तम् ।
तमकाममपि सुकामैश्चक्रे शक्राद्यनूनसंपत्कम् ॥ १०९ ॥

शारदपार्वणचन्द्रश्रीरमणीयोरुतेजसा यशसा ।
अधिवास्याखिलभुवनं तनुभवसहितोऽध्यशेत साकेतम् ॥ ११० ॥

अथ चिरयति रामे रिपुवधकृति कुण्ठं विलोक्य वैकुण्ठम् ।
देवा देवागमने के वा नैवाभिलेभिरे कुतुकम् ॥ १११ ॥

परिपूर्णहृदोऽथ बुधाः परिपूर्णमनोरथं रथाङ्गधरम् ।
हेतुं पुनरानेतुं कालं समचोदयन्निमन्त्र्यालम् ॥ ११२ ॥

स सुरः सुरसंदेशाद् देशं तं प्राप्य यत्र दाशरथिः ।
राजद्वारि रराजे द्विजरूपो राजदर्शनार्थीव ॥ ११३ ॥

विप्रं तं प्रश्रितधीः क्षिप्रं पप्रच्छ लक्ष्मणः क इति ।
तमुदारमुवाच स मां राज्ञे विज्ञापयेति भूमिसुरः ॥ ११४ ॥

स तथेति तथा कृत्वा नेत्रानेतव्य इत्यथोत्सृष्टः ।
यत्र स रामो राजा सनिदेशं तं निनाय देशं तम् ॥ ११५ ॥

तमथ प्रथमानार्चं रामं स मिथः कथामचीकमत ।
तत्रान्यस्यागमने वध्यत्वं तस्य चावनीदेवः ॥ ११६ ॥

स तथेति तदा धरणीदेवाय श्रीपतिः प्रतिज्ञाय ।
समवहिततया लक्ष्मणमगमयत मिथो गृहप्रतीहारम् ॥ ११७ ॥

विविशतुरथ तावालयमध्यं मध्यंदिनार्कतेजस्कौ ।
निजरूपेण स दिव्यो दिव्योदन्तं तदा प्रकाशितवान् ॥ ११८ ॥

दैवादेव स देवो यावत् काले मिथः कथां चक्रे ।
तावद् दुर्वासा बहिरवतीर्य मुनिः क्व राम इत्यफणत् ॥ ११९ ॥

सौमित्रिरञ्जसा तं नत्वा बद्धाञ्जलिः पफाण मुनिम् ।
रामो रहसीदानीं कार्यं कथयाद्य तत् तथा कुर्याम् ॥ १२० ॥

प्रत्याहेति वदन्तं दान्तं देदीप्यमानदृक् स रुषा ।
दर्शय रामं नो चेद् वः सर्वानद्य भस्मसात् कुर्याम् ॥ १२१ ॥

स तथा वदति मुनीन्द्रे वितथोत्साहो निवृत्य सौमित्रिः ।
मत्वा वरमात्मवधं सर्ववधाद् राममाजगाम मुदा ॥ १२२ ॥

दुर्वाररोषवेगो दुर्वासा द्वारि तिष्ठतीत्यफणत् ।
श्रुत्वैव लक्ष्मणोक्तिं रामो मुनिमाजगाम भक्तिनतः ॥ १२३ ॥

अयमस्मि किंकरस्ते किं करवाण्यादिशेति रामोक्तेः ।
स्मित्वा सोऽभ्यवहारं समकामयतासमस्तपस्वी तम् ॥ १२४ ॥

सरसान्नपानदानात् स रसादाश्लिष्य राममतितृप्तः ।
काल इवाकालगतः स्तुत्वा रामं ययौ स्वधाम मुनिः ॥ १२५ ॥

अथ [दुस्तरसन्धा]या आविष्करणेन खिद्यमानमनाः ।
वृद्धानाहूय कलावृद्धांस्तेभ्यो जगाद निजसंधाम् ॥ १२६ ॥

परिभाव्याभव्यधियस्ते सर्वे दुर्वचं वचः फेणुः ।
सत्यप्रतिश्रवत्वात् तव कर्तव्यैव सा प्रतिज्ञेति ॥ १२७ ॥

रामः स्वयमेव सुधीस्तत्त्वं प्रपफाण तत्र तत्त्वज्ञः ।
